
एद् बहुस्भोसि ।१।४।४।।

बृ०न्यास–**एद् बह्वि**त्यादि। **(बहुस्भोसी**ति-) सश्च भश्चेत्यकारेणोच्चारणार्थेन द्वन्द्वं कृत्वा ततो बहुशब्देन बहुत्वार्थेन सप्तमीतत्पुरुषं च, पुनरोस्शब्देन समाहारद्वन्द्वात् सप्तमी, तत्र च "सप्तम्या आदिः" (७.४.११४) इत्यादौ संप्रत्यय इत्याह–**सकारादावि**त्यादि। **एषु (एषाम्),** इदम्शब्दात् सप्तमीबहुवचने (षष्ठीबहुवचने) च एकत्र नामपवादसामादेशे "अनक्" (२.१.३६) इत्यदादेशे "एद् बहुस्भोसि" (१.४.४) इत्येत्वे "नाम्यन्तस्था०" (२.३.१५) इति षत्वम्। **अमीषामि**ति–अदस्शब्दादामि अत्वादौ सामादेशेऽनेनैत्वे षत्वम्, एवम्–**सर्वेषामि**त्यादि। श्रमणशब्दात् षष्ठीसप्तम्योर्द्विवचने एत्वेऽयादेशे च **श्रमणयोः**। वृक्षशब्दात् "टा-ङसो०" (१.४.५) इति ङसः स्यादेशे **वृक्षस्य,** एवम्–भ्यामि "अत आ०" (१.४.१) इत्याकारे **वृक्षाभ्याम्,** अनयोर्बह्वर्थविषयसकारादयभावादेत्वाभाव इति। सर्वशब्दात् "जस इः" (१.४.९) इति जस इकारादेशे "अवर्णस्ये०" (१.२.६) इत्येत्वे **सर्वे**। अत इत्यधिकारात् साधुष्वित्यादौ बह्वर्थविषयसकारादावप्येत्वं न भवत्यत आह–**अत** इत्यादि ।।४।।

टा-ङसोरिन-स्यौ ।१।४।५।।

बृ०न्यास—**टा-ङसो**रित्यादि। वृक्षशब्दात् टायामनेन इनादेशे एत्वे णत्वे च **वृक्षेण,** एवम्–**अतिजरेण**। ङसः स्यादेशे **वृक्षस्य, अतिजरस्य। अत इत्येवे**ति–अतिजरशब्दात् टा-ङसोरिन्-स्यौ कुतो न भवत इत्याह–**अत्र परत्वादि**त्यादि–अयमर्थः 'वृक्षेण वृक्षस्य, जरसौ' इत्यादौ द्वयोरपि चरितार्थत्वाद्, एकत्र च युगपत् प्राप्त्या स्पर्द्धसम्भवात् परत्वात् ❊ कृताकृतप्रसङ्गित्वेन ❊ नित्यत्वाच्च प्रागेव जरसादेशे कृतेऽकारान्तत्वाभावादिनाद्यादेशाभाव इति। **अन्ये त्वि**ति–आचार्य***पाणिनि***सूत्रानुसारिणः, यदाह ***स्थविरः*** —यदि हि 'अतिजरसिना' इत्येतत् सूत्रकारस्य *नाभिमतं स्यात् तदा 'टा' इत्येतस्य नकारादेशमेव कुर्यात्, तत्रापि ह्येत्वे कृते वृक्षेणेत्यादि सिध्यत्येव, कथमेत्वमिति चेद् "एद् बहुस्भोसि" (१.४.४) इत्यत्र टावचनप्रक्षेपात्, अत्र ***जयादित्यः***–यथा तु भाष्यं तथा नैतल्लक्ष्यत इति ।।५।।

ल.न्यास–**टा-ङसोरि**त्यादि। **अन्ये त्वि**ति–यदि हि 'अतिजरसिना' इत्येतत् सूत्रकारस्य *नाभिमतं स्यात् तदा 'टा' इत्येतस्य नकारादेशत्वमेव कुर्यात्, तत्रापि ह्येत्वे कृते वृक्षेणेत्यादि सिद्ध्यत्येव, कथमेत्वमिति चेत्? "एद् बहुस्भोसि" (१.४.४) इत्यत्र टावचनप्रक्षेपात्, अत्र ***जयादित्यः***–यथा तु भाष्यं तथा नैतल्लक्ष्यते ।।५।।

ङे-ङस्योर्यातौ ।१।४।६।।

बृ०न्यास—**ङे-ङस्यो**रित्यादि। वृक्षशब्दादनेन ङे-ङस्योः स्थाने यादेशे (आदादेशे) च "अत आः स्यादौ०" (१.४.१) इत्यात्वे "समानानां०" (१.२.१) इति दीर्घत्वे च **वृक्षाय, वृक्षात्,** एवम्–**अतिजराय, अतिजरात्** जरसादेशस्य विकल्पितत्वात् तदभावादकारान्तत्वादत्र ङे-ङस्योर्या-ऽऽतौ भवतः। **अत्र इत्येवे**ति–अतिजरशब्दाद् ङे-ङस्योः स्वरादित्वे परत्वान्नित्यत्वाच्च प्रागेव

❊ **ला.सू. सम्पादितपुस्तके 'साधुत्वेनाभिमतं स्यात्' इत्येतादृशः पाठोऽस्ति।**

जरसादेशेऽकारान्तत्वाभावादादेशाभाव इति। अन्ये तु आकारकरणसामर्थ्यात् प्रागेव जरसादेशात् ङसेरादादेशे स्वरादित्वाज्जरसादेशे च अतिजरसादिति मन्यन्ते, अन्यथाऽकारोपदेशमेव कुर्यात्, तत्रापि ह्यकारकरणाद् "रागाट्टो रक्ते" (६.२.१) इत्यादिज्ञापकाच्च 'लुगस्यादेत्यपदे" (२.१.११३) इति बाधित्वा समानदीर्घत्वे 'वृक्षाद्' इत्यादि सिध्यत्येवेत्याह–**केचित् त्वित्यादि–*पाणिनिसूत्रानुसारिण* इति ।।६।।**

***ल.न्यास*–ङे-ङस्योरित्यादि।** नन्वत्र 'अत्' इत्येव क्रियताम्, किं दीर्घकरणेन? न चैवं कृते "लुगस्या०" (२.१.११३) इति प्राप्स्यतीति, तदा हि 'त्' इत्येवं कुर्यात्, सत्यम्- मतान्तरेऽतिजरसादित्यपि मन्यन्ते, तत्सिद्ध्यर्थं दीर्घकरणम्, दीर्घकरणाच्च स्वमतेऽपि सम्मतमिति बोध्यम् ।।६।।

सर्वादेः स्मै-स्मातौ ।१।४।७।।

बृ०न्यास–**सर्वादेरित्यादि।** सर्वशब्द आदिर्यस्य स सर्वादिरिति बहुव्रीहिः, ननु बहुव्रीहेरन्यपदार्थप्रधानत्वात् सर्वशब्दाद् यदन्यत् तस्यैव सर्वादिकार्यं स्याद्, न सर्वशब्दस्य, यथा-चित्रगुरानीयतामित्युक्ते स्वामिन एवानयनम्, न तु गवाम्, यथा चित्रा गावो यस्येति गवां विशेष्यत्वं तद्वतश्च विशेषणत्वमवगम्यते, तथेहाप्यवगंस्यते, परमत्रार्थे बहुव्रीहिर्नेष्यते, यदा हि स्वामिनः प्राधान्यं गवां विशेषणभावस्तदा बहुव्रीहिरत एव चित्रा गावो यस्य स चित्रगुरिति गवामप्राधान्यं प्रदर्श्यते, तस्मात् सर्वशब्दसङ्ग्रहार्थं बहुव्रीहि-तत्पुरुषयोरेकशेष आवृत्तिर्वाऽऽश्रयितव्या, तत्र सारूप्यार्थं सर्वश्चासावादिश्च सर्वादिरित्यादिशब्द उपादीयते, न त्वस्य प्रयोजनान्तरमस्ति, एकशेषे च सौत्रिकमेकवचनं भविष्यति, नैष दोषः-संयोग-समवायलक्षणसम्बन्धे यदा बहुव्रीहिस्तदा तद्गुणसंविज्ञानं भवति-शुक्लवासाः, लम्बकर्ण इति, अत्र हि दण्डी विषाणी वाऽऽनीयतामित्यादिवत् संयोगसमवायलक्षणेन सम्बन्धेन सम्बन्धिनि कार्ये विज्ञायमाने उपलक्षणस्याप्यन्तर्भावो भवति, राम्बन्धान्तरे तु बहुव्रीहौ तद्गुणसंविज्ञानाभावश्चित्रगुरानीयतामिति, अत्र हि स्व-स्वामि-भावसम्बन्धः षष्ठ्यर्थ इति स्वविशेषोपलक्षितस्य स्वामिन एवाऽऽनयनं भवति, न तु गवाम्, सर्वादेरित्यत्र चाऽऽदिशब्दस्यावयववाचित्वात् समवायसम्बन्धादुद्भूतावयवभेदः समुदायस्तद्गुणसंविज्ञानस्य बहुव्रीहेरर्थः, तस्य च समुदायस्य युगपल्लक्ष्ये प्रयोगाभावात् तदन्तर्भूतानामेव पृथग्-योगात् कार्येण भाव्यमिति सर्वशब्दस्यापि तत् सिध्यति, यथा-'देवदत्तशालाया ब्राह्मण आनीयताम्' इत्युक्ते देवदत्तोऽपि यदि ब्राह्मणो भवति स्वशालास्थश्च तदा सोऽप्यानीयत एवेति निष्प्रयोजने एकशेषा-ऽऽवृत्ती, यतस्तस्यान्यपदार्थस्य गुणा उपलक्षणानि तेषामपि कार्ये संविज्ञानं तद्गुणसंविज्ञानम्, यत्र तु तिरोहितावयवभेदः *समुदायस्तद्गुणसंविज्ञानबहुव्रीहिसमासार्थः यथा-लम्बकर्ण आनीयतामिति, तत्रोच्यतेऽवयवेन विग्रहः समुदायः समासार्थः, इह तत्र संभवतीति; अत्राऽऽदिशब्दोऽवयववाची न व्यवस्थावाचितामतिक्रामति, उत्तरावयवापेक्षयैव कश्चिदाद्यो भवितुमर्हति, तेन गणपाठव्यवस्थिताः 'सर्व, विश्व, उभ, उभयड्' इत्यादयो गृह्यन्ते। अथैवम्, 'मध्यमस्याम्, अधमस्याम्' इति न प्राप्नोति गणे पाठाभावात्, तस्मादस्तु प्रकारार्थोऽयमादिशब्दः, प्रकारार्थप्रदर्शनाः पश्चादभियुक्ता गणान् पठन्ति, यथोक्तम्–श्रेण्यादयः पठ्यन्ते, कृतादिराकृतिगण इति, कृतादयश्च निदर्शनार्थं वृत्तिकारैः पठिता इति, नैष दोषः-'मध्यमस्याम्, अधमस्याम्' इति प्रयोगस्याऽऽर्षत्वात्, प्रकारार्थत्वे च सति कृत्स्न-जगदादिशब्दा-नामपि सर्वादिकार्यप्रसङ्गात्। **सर्वस्मै** सर्वशब्दाच्चतुर्थ्येकवचनस्यानेन स्मैरादेशः। स्याद्याक्षिप्तस्य नाम्नः सर्वादिभिर्विशेषणाद् विशेषणेन च तदन्तविधेर्भावात् "न सर्वादिः" (१.४.१२) इति द्वन्द्वे निषेधाद् ※ नामग्रहणे न तदन्तविधिः ※ इत्यस्यानुपस्थानात् तदन्तं **'परमसर्वस्मै'** इत्याद्युदाहृतम्। न सर्वोऽसर्वस्ततो ङे-ङस्योः स्मै-स्मादादेशे **असर्वस्मै, असर्वस्माद्,** एवमन्यदपि। ननूभशब्दस्य नित्यं द्विवचनविषयत्वात् सर्वादिकार्यस्य बहुत्वैकत्वविषयत्वेन तत्राभावात्, तद्वृत्तिविषये च 'उभये देवमनुष्याः, उभयो मणिः, उभयपुत्रः' इत्यभेदविषयस्योभयशब्दस्यैव प्रयोगात्, 'उभाबाहु' इत्यादेर्द्विदण्ड्यादित्वेन साधुत्वात् सर्वादौ व्यर्थः पाठः, अगर्थस्तर्हि, अन्यथा यद्यपि अकि के च रूपार्थयोरभेदस्तथापि 'द्विवचनेऽनन्तरे श्रूयमाणे उभशब्देन साधुना भाव्यम्, न लुप्ते नापि व्यवहिते'

※ **ला.सू. सम्पादितपुस्तके 'समुदायोऽतद्गुण' इति पाठो दृश्यते।**

इति प्रतिज्ञानस्य बाधः स्यात्, अकः तन्मध्ये पतितत्वेन तु व्यवहितेरभावात् के पुनः सति पूर्वस्य द्विवचनस्य लुप्तत्वादपरस्य च केन व्यवधानात् 'कविषये व्यवहितद्विवचनविषय उभशब्दः साधुर्भवति' इति वक्तव्यं स्यादिति चेत्? तदर्थोऽपि न युक्तः-कस्य स्वार्थिकत्वात् स्वार्थिकाश्च प्रत्ययाः प्रकृतेरविशिष्टार्था भवन्तीति प्रकृतिग्रहणेन ग्रहणात्, 'द्विवचनविषयत्वाद्' इत्यत्र द्वयर्थाभिधानसमर्थ इत्यर्थस्य विवक्षितत्वात् द्विवचनशब्देन स्यादिप्रत्ययाग्रहणात् स्वार्थिकत्वेन चोभार्थस्याहानात्, आप्वद् वचनमन्तरेण द्विवचनपरतायाः सिद्धत्वात्, ननु यथा स्वार्थिकत्वेन परार्थानभिधानात् कप्परस्य साधुत्वमेवं त्र-तस्परस्यापि साधुत्वप्रसङ्गः, नैवम्-त्र-तसादीनां विभक्त्यर्थमात्रवचनत्वेन सर्वस्यैव भेदस्य परित्यक्तत्वादसाधुत्वमुभशब्दस्य, अत एवोच्यते **पूर्वैः**-'उभयोऽन्यत्र' इति, एवं तर्हि हेत्वर्थप्रयोगे "सर्वादेः सर्वाः" (२.२.११९) इति सर्वविभक्त्यर्थ इत्याह-**उभशब्दस्ये**त्यादि। उभशब्दाद् हेतुशब्दाञ्चौकारे "ऐदौत् सन्ध्यक्षरैः" (१.२.१२) इत्यौत्वे "इदुतोऽस्त्रेरीदूत्" (१.४.२१) इत्यूत्वे **उभौ हेतू।** नन्वन्यतर इत्यन्यशब्दो डतरप्रत्ययान्तः, ततश्चान्यतरशब्दस्य डतरग्रहणेनैव सर्वादिकार्यं भविष्यति, किं पुनरस्योपादानेनेत्याह-**डतरग्रहणेनैवे**त्यादि-अयमर्थः-डतरग्रहणेनेवान्यतरशब्दस्य डतमग्रहणेनान्यतमशब्दस्यापि सर्वादित्वं स्यादिति, तेन **'अन्यतमाय, अन्यतमं वस्त्रम्, अन्यतमे'** इत्यादौ स्मै-दकार-स्मिन्नादयो न भवन्ति; अन्ये तु डतर-डतमविधावप्यन्यशब्दं नाधीयते, तेषामयं डतरार्थ एव पाठः, अन्यतरमिति त्वन्य एवायमव्युत्पन्न इत्यपरे ब्रुवन्ति, अयमन्यतरशब्दो डतरान्तो न भवति, निर्धारणे हि सः, अनिर्धारणेऽयमव्युत्पन्नः, यद्वा तरणं तरः, अन्यश्चासौ तरश्चेति अन्यस्तरोऽस्येति वा द्वयोः प्रकृष्टोऽन्य इति वाऽन्यतरः, तन्मते डतमान्तस्यापि सर्वादित्वमस्तीत्याह-**एक** इत्यादि। तत्र यथा सर्वस्मिन्निति प्रयुक्ताः सर्वादयो दृश्यन्ते, न तथा डतरस्मिन् डतमस्मिन्निति प्रयुक्तं दृश्यते, रूपनिग्रहश्च प्रयोगाद् भवति, तत् कोऽयं शब्दो 'डतर डतम' इतीत्याह-**डतर-डतमावि**त्यादि। न परं रूपनिग्रहहेतुः प्रयोग एव, किन्तु शास्त्रमपि, तत्र "यत्-तत्-किमन्यात्०" (७.३.५३) इति डतर-डतमौ प्रययौ विधीयेते, तयोर्यदादिभ्यो विधीयमानयोः केवलयोः प्रयोगाभावात् डतर-डतमग्रहणं तदन्तान् प्रयोजयति, एवं तर्हि स्वार्थिकत्वात् प्रकृत्यविशिष्टतया यत्-तदादिप्रकृतिद्वारकमेव सर्वादित्वं भविष्यति, किमनयोरुपादानेनेत्याह-**तयोरि**त्यादि-यदि हि डतर-डतमयोः पाठो गणे न क्रियेत तदेतरस्वार्थिकप्रत्ययान्तस्यापि सर्वादेः सर्वतमायेत्यादावपि सर्वादिकार्यं स्यात्। प्रयोजनानन्तरं चाऽऽह-**अन्यादी**त्यादि-डतर-डतमान्तानां "पञ्चतोऽन्यादेरनेकतरस्य दः" (१.४.५८) इत्यन्यादित्वाद् दादेशो यथा स्यादित्येवमर्थं च डतर-डतमग्रहणम्, नहि 'अन्य अन्यतर इतर डतर डतम' इत्यपाठे पञ्चतोऽन्यादेरुच्यमानो दादेशो लभ्येत, ननु च सत्यस्मिन् प्रयोजने कथं स्वार्थिकप्रत्ययान्तानां सर्वादित्वाभावार्थं स्याज्ज्ञापकमिदम्, अन्यथाऽनुपपद्यमानं ज्ञापकं भवति, न च सत्यस्मिन् प्रयोजनेऽस्यान्यथानुपपत्तिरस्ति, न च दादेशार्थमात्रत्वे दादेशविधावेव डतर-डतम-ग्रहणं कर्तव्यम्, गणे तु करणात् स्वार्थिकप्रत्ययान्तानां सर्वादित्वाभावार्थमपि भवतीति वाच्यम्, गणे करणमसंज्ञायामिति विशेषणार्थं स्याद्, गुरुश्च 'अन्या-ऽन्यतरेतर-डतर-डतमस्य' इति निर्देशः स्यादिति; उच्यते-यथेदं दादेशार्थमन्यादिपञ्चके भावाद् भवति तथा स्मै-स्मादाद्यर्थमपि स्यात् सर्वादित्वात्, तथाहि-यदि स्वार्थिकप्रत्ययान्तानां सर्वादित्वं स्यात् तदा स्मैस्मादादेशार्थं डतर-डतमोपादानमनर्थकम्, अतः स्वार्थिकप्रत्ययान्तानां सर्वादित्वं न भवतीति तदुपादानं स्वार्थिकप्रत्ययान्तानां सर्वादित्वाभावार्थं विज्ञायत इति, तदुदाहरति-**सर्वतमाये**त्यादि। **त्वशब्द** इति अन्यशब्दस्यार्थोऽस्येत्यन्यार्थः। **त्वस्मै** अन्यस्मै इत्यर्थः। त्वशब्द इति अकारान्तसन्देहव्युदासार्थं **त्वच्छब्द** इति निर्देशः, तत्रैकमर्थं प्रति द्वयादीनां तुल्यबलानामविरोधिनामनियतक्रम-यौगपद्यानां भेदेन चीयमानता समुच्चयः, तस्य पर्यायस्तद्वाचक इत्यर्थः। अथास्य तकारान्तत्वात् स्मैप्रभृतिसर्वादिकार्यायोगादुपादानमनर्थकमित्याह-**तस्ये**त्यादि। **अज्ञातादि**ति-त्वच्छब्दस्याज्ञातार्थे "त्यादि-सर्वादेः" (७.३.२९) इत्यन्त्यात् स्वरात् पूर्वमकि पञ्चम्येकवचने च **त्वकतः। नेमशब्द** इति-अर्धशब्दस्यार्थोऽस्येति विग्रहः। **सम-सिमौ सर्वार्थावि**ति-सर्वशब्दः संख्याप्रकारकयावद्विषये कात्स्न्र्ये वर्तते, तत्र सङ्ख्याकात्स्न्र्ये यथा-सर्वे आयाताः, यावन्तो लिखिता दश द्वादश वा ते कात्स्न्र्येनायाता इत्यर्थः, एवंविधसर्वार्थे वर्तमानौ सम-सिमशब्दौ सर्वादी इत्यर्थः। सर्वार्थत्वाभावे न भवतीत्यनेनार्थान्तरवृत्तिव्यवच्छेदफलं दर्शयति— **समाये**त्यादि-अविषमायेत्यर्थः। **स्वाभिधेयापेक्षे**त्यादि-अवधिर्मर्यादा तस्य नियमोऽऽवश्यम्भावोऽवधिभावादभ्रंशो व्यवस्थाऽपरपर्यायः, तथाहि-नात्र काचिद् व्यवस्थाऽरित, अव्यवस्था वर्तते, व्यवस्था कर्तव्येति व्यवस्थाशब्दान्नियमो गम्यते, स च स्वाभिधेयापेक्षः, पूर्वादीनां शब्दानां स्वाभिधेयो दिग्-देश-काल-स्वभावोऽर्थस्तमपेक्षते यः स स्वाभिधेयापेक्षः, **चो**ऽवधारणे,

दिगादीनां ह्यर्थानां पूर्वादिशब्दाभिधेयानां यत् पूर्वादित्वं तन्नियोगतः कञ्चनावधिमपेक्ष्य सम्पद्यते, न त्ववधिनिरपेक्षम्, तथाहि-पूर्वस्य देशस्य यत् पूर्वत्वं तत् परं देशमवधिमपेक्ष्य भवति, परस्यापि यत् परत्वं तत् पूर्वं देशम्, तस्मात् पूर्वादिशब्दवाच्यापेक्षणेऽवश्यं केनचिदवधिना भाव्यम्, तत्रैतस्यैवावधेर्यः पूर्वादिशब्दाभिधेयापेक्षोऽवधिभाव एकान्तिकः स नियमो व्यवस्थापरपर्यायस्तस्मिन् गम्यमाने पूर्वादीनां शब्दानां स्वाभिधेय एव वर्तमानानां सर्वादिकार्यं न तु वाच्ये, यो हि पूर्वादिशब्दाभिधेयादर्थादन्यस्यावधिभूतस्य नियमः स कथं पूर्वादिशब्दवाच्यो भविष्यतीति, अतस्तस्मिन्नान्तरीयकतया गम्यमाने 'पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर' इत्येतानि सप्त शब्दरूपाणि सर्वादीनि भवन्ति। अवधिमति दिगादिलक्षणे वर्तमानानि पूर्वादीनि सर्वादीनि भवन्तीत्युदाहरति-**पूर्वस्मै** इत्यादि-शब्दरूपापेक्षया च नपुंसकनिर्देशो नार्थापेक्षया, तेन स्त्री-पुं-नपुंसकेषु सर्वेष्वप्यर्थेषु सर्वादित्वमिति। व्यवस्थापरपर्याय इत्यस्य व्यवच्छेद्यं दर्शयति-**व्यवस्थाया** इत्यादिना। **दक्षिणाय** प्रवीणायेत्यर्थः, अत्र हि प्रावीण्यमात्रेण निमित्तेनावधिनिरपेक्ष एव दक्षिणशब्दो वर्तत इति व्यवस्था न गम्यते। केचित् तु यावद्द्रव्यभाविनी व्यवस्थेत्याहुः, तेषां पूर्वस्मै पुरुषायेत्यादि न भवति, नहि दिग्योगलक्षण-पूर्वत्वादि पुरुषे यावद्द्रव्यभावीति। परस्परस्थित्यपेक्षयाऽऽत्मस्थितिर्व्यवस्थेत्येके, तेषां सर्वे विशेषण-विशेष्यशब्दाः सम्बन्धिशब्दाश्च व्यवस्थाशब्दाः स्युरिति दक्षिणाय गाथकायेत्यत्रापि प्राप्नोति। **आत्माऽऽत्मीये**त्यादि-आत्मा च आत्मीयश्च ज्ञातिश्च धनं च तान्येवार्थस्तत्र वृत्तिर्यस्येति विग्रहः, मिन्प्रत्ययविषये त्वैश्वर्यवाची। **स्वशब्द आत्माऽऽत्मीययोः** सर्वादिरिति शेषः। **यत् स्वस्मै रोचते तत् स्वस्मै ददाती**त्यस्यार्थं व्याचष्टे-**यदात्मन** इत्यादिना। **स्वाय दातुमि**त्यादौ तु ज्ञातिधनवृत्तित्वात् सर्वादित्वाभाव इत्यर्थः। यत्र शब्दान्तर-निरपेक्षः स्वशब्दो ज्ञाति-धने स्वरूपेणाऽऽचष्टे तत्राऽसौ संज्ञारूपेण तयोर्वर्तत इति तत्र न भवतीत्याह-**ज्ञाति-धनयोरि**त्यादि। कथं पुनरयमर्थो यावता 'स्वे पुत्राः' इति ज्ञात्यर्थो गम्यते, 'स्वे गावः' इति धनार्थः, नैतदस्ति-पुत्र-गोशब्दयोरिह संनिधानेनोभयं गम्यते, स्वशब्दात्त्वात्मीयत्वमात्रं प्रतीयते। ननु यदि शब्दान्तरनिरपेक्ष एव स्वशब्दो ज्ञाति-धनयोर्वर्तते, कथं तर्हि "उल्मुकानीव मेऽमी स्वा ज्ञातयो भरतर्षभ!" इत्यादौ ज्ञातिशब्दस्यानुप्रयोगः, नैष दोषः-यत्र हि शब्दोऽनेकार्थो भवति सन्दिग्धार्थो वा तत्र तदर्थस्य व्यक्तीकरणे पर्यायशब्दस्यानुप्रयोगो न विरुध्यते, यथा-मेधाद्यनेकार्थस्य वराहशब्दस्य प्रयोगे शूकरशब्दस्य, यथा च सन्दिग्धार्थस्य पिकशब्दस्य प्रयोगे कोकिलशब्दस्य, स्वशब्दश्चायमनेकार्थस्तत्रासत्यनुप्रयोगे किंविषयोऽयं प्रयुक्त इति संदेहः स्यादतस्तन्निरासार्थमुपपद्यते ज्ञातिशब्दस्यानुप्रयोगः, एवं धनशब्दस्यापि द्रष्टव्यम्। 'अन्तरं बहिर्योगोपसंव्यानयोः' इति वक्ष्यति, तदर्थं व्यक्तीकुर्वन्नुदाहरति-**बहिर्भावेने**त्यादि -बहिरित्यनावृतो देशस्तस्य भावः स एव वा भावस्तेन योगः, स च बाह्यस्याबाह्यस्य च भवति, यथा-**अन्तरस्मै गृहाय नगरबाह्यायेत्यादि**-नगरं हि चतुष्प्रतोलीयुक्तप्राकारावृतमुच्यते, यदाह-"नगरमुरुचतुर्गोपुरोद्भासिसालम्" इति, तत्र च प्राकारावृतदेशे चाण्डालादिगृहस्यानौचित्यादनावृतप्रदेशेन योगो गम्यत इति, यदा तु बहिःशब्देन बाह्य उच्यते तदा बाह्येनानावृतदेशप्रयुक्तेन चाण्डालादिगृहेन योगे आभ्यन्तरस्यानाभ्यन्तरस्य बहिर्भावेनैव सिद्धत्वादित्यर्थः, अर्थभेदेऽपि रूपस्य समानत्वात् पृथक् प्रयोगो नोक्तोऽर्थभेदस्तु दर्शितः, चाण्डालादिगृहयुक्ताय वा नगराभ्यन्तरगृहायेत्यर्थः। उपसंव्यानशब्दः कर्मसाधनो यथा-उपसंवीयते यदिति "भुजिपत्यादिभ्यः कर्माऽपादाने" (५.३.१२८) इति कर्मण्यनटि, उपसंवीयतेऽनेनेति "करणाऽऽधारे" (५.३.१२९) इति करणे वाऽस्तीत्याह-**उपसंव्याने उपसंवीयमाने** चेति। ननु कर्मार्थकरणार्थभेदाद्भिन्नेऽपि उपसंव्यानार्थे सर्वत्र बहिर्योगेनैव सिद्धत्वाद् व्यर्थमेतदिति, न च यदा समप्रमाणेऽपरिहिते शाकटयुगे इदं न ज्ञायते-किमुत्तरीयं किमन्तरीयमिति तदर्थमेतद् भविष्यतीति वक्तुं शक्यम्, यतस्तत्र यथा प्रेक्षापूर्वकारी भाविबुद्ध्योपसंव्यानत्वं व्यवस्थापयति तथा बहिर्योगमपि, उच्यते-पटचतुष्टयार्थम्, तत्र शाटकानां त्रये चतुष्टये वा प्रथम-द्वितीययोर्बहिर्योगेनैव सिद्धत्वात् तृतीय-चतुर्थयोर्बहिर्योगाभावादुपसंव्यानग्रहणमितीत्याह-**अन्तरस्मै पटाये**त्यादि। पुरि तु न भवति, **अपुरी**ति प्रतिषेधादिति शेषः, तेन **अन्तरायै पुरे क्रुध्यती**ति-अत्र "सर्वादेर्डस्पूर्वाः" (१.४.१८) इति डस् न भवति, पूश्च कस्मिंश्चिद् देशे प्राकाराभ्यन्तरे क्रियते क्वचित् प्राकाराद् बहिरित्यस्ति बहिर्योगः। द्व्यादीनामनकारान्तत्वात् स्मायादेः सर्वादिकार्यस्या-सम्भवेऽपि प्रयोजनान्तरमस्तीति तदाह-**द्वियुष्मदि**त्यादि। **सर्वविभक्त्यादय** इति - "सर्वादेः सर्वाः" (२.२.११९) इति हेतुप्रयोगे सर्वविभक्तय इति, आदिशब्दाद् यथायोगं शेष-पूर्वनिपात-पुंवद्भाव-डद्रि-आत्-आयनिञ्-मयट्-अकः प्रयोजनानि ज्ञायन्त इति। ननु सूत्रे विषयस्यानिर्देशात् संज्ञायामपि सर्वादीनां सर्वादिकार्यप्रसङ्गः, नैष दोषः-तत्र गणपाठात् पर्युदासः, शुद्धान्येव हि गणे सर्वादीनि

सन्निविष्टानि न संज्ञाभूतानि, तेन यत् सामान्यं स्मायादिकार्यं यच्च विशिष्टं "पञ्चतोऽन्यादेरनेकतरस्य दः" (१.४.५८) "आ द्वेरः" (२.१.४१) इति तत् सर्वं गणपाठोपलक्षितानामेव, यत् तु कार्यम् "अमौ मः" (२.१.१६) इत्यादिस्वरूपमात्राश्रयं न संनिवेशापेक्षं तदविशेषेण भवति, तत्र हि न गणपठितयोः युष्मदस्मदोर्निर्देशः, अपि तु औणादिकयोः, अथवा सर्वादिविशेषणार्थमसंज्ञायामिति गणे साक्षात् पठनीयमित्याह-**सर्वेऽपि चामी संज्ञायां सर्वादयो न भवन्ती**ति। ननु संज्ञायां गौणत्वादेव न भविष्यति, सर्वाय देहीति प्रसिद्ध्यप्रसिद्धिवशात् सम्भवत्येव ※ गौण-मुख्य※ न्याय इति किमसंज्ञायामिति विशेषणेन? नैवम्-पदकार्येष्वेवायं न्याय उपतिष्ठते, न नामकार्य इति, तथाहि-स्वार्थे वृत्तान्नाम्न उत्पन्नायां विभक्तौ तत्कार्ये *(षु कृतेषु) शब्दान्तरसंनिधानाद् गौणत्वं प्रतीयते, यथा-गां वाहीकमानयेति, पूर्वं क्रियासम्बन्धापेक्षया विभक्तावुत्पन्नायां ※ वाक्यीय ※ न्यायात् सामानाधिकरण्याद् गौणार्थप्रादुर्भावो भवति, तस्य तु स्वार्थस्य मुख्यव्यपदेशो नास्ति गौणापेक्षया सम्बन्धिशब्दत्वान्मुख्यव्यपदेशस्य गौणाभावेऽभावात्, न चैवं शब्दान्तरात् संज्ञाप्रतीतिरस्ति, यदि वा गुणादागतो गौणो यथा-गोशब्दस्य जाड्यादिनिमित्तोऽर्थो वाहीकः, मुखमिव मुख्यः, स्वं रूपमित्यत्र रूपग्रहणेनार्थपरिग्रहस्य ज्ञापितत्वादर्थवतः कार्येण भवितव्यम्, स चार्थः प्राधान्याद् मुख्य एव गृह्यते, गौणे ह्यर्थे शब्दः प्रवर्तमानो मुख्यार्थारोपणैव प्रवर्तते, अनियतश्च गौणार्थः, न च संज्ञाशब्दो गुणद्वारेण प्रवर्तते येन प्रसिद्ध्यप्रसिद्धिवशाद् गौणत्वं तस्य संभाव्येतेति। ननु मा भूत् सर्वो नाम कश्चित्, सर्वायेत्यादौ 'असंज्ञायाम्' इति विशेषणात् सर्वादिकार्यम्, प्रियाः सर्वे यस्य सर्वानतिक्रान्तो य (इत्यादौ) उपसर्जनस्य तु प्राप्नोतीत्याह-**सर्वादेरि**त्यादि-अयमर्थः-षष्ठ्या यदुच्यते तद् गृह्यमाणविभक्तेर्भवति, यद्येवं 'परमसर्वस्मै' इत्यादौ स्मायादि न प्राप्नोति, नह्यत्र गृह्यमाणात् सर्वादेर्विहिता विभक्तिः, अपि तु समासादिति, न-गृह्यमाणस्य सर्वादेरर्थद्वारेण सम्बन्धिनी या विभक्तिस्तदर्थगतसङ्ख्याकर्मादिवाचिनी तस्याः सर्वादिकार्यमित्यर्थोऽत्र विवक्षितः, सर्वादिसङ्ख्याप्रधानश्चैष समास इति, अथवा सर्वमादीयते गृह्यतेऽभिधेयत्वेन येनेत्यन्वर्थाश्रयणात्, सर्वेषां यानि नामानि तानि सर्वादीनि, संज्ञोपसर्जने च विशेषेऽवतिष्ठेते, तथाहि-यदा सर्वशब्दः संज्ञात्वेन नियुज्यते तदा प्रसिद्धप्रवृत्तिनिमित्तपरित्यागात् स्वरूपमात्रोपकारी प्रवर्तत इति विशेष एवावतिष्ठते, उपसर्जनमपि जहत्स्वार्थमजहद् वाऽतिक्रान्तार्थविशेषणतामापन्नमतिसर्वायेत्यादावतिक्रान्तार्थवृत्ति भवति, एवं बहुव्रीहावपि 'प्रियसर्वाय, द्व्यन्याय' इत्यादावन्यपदार्थसंक्रमाद् विशेषार्थवृत्ति, वाक्ये त्वसंश्लिष्टार्थत्वात् स्वार्थमात्रं प्रतिपादयतो न विशेषावस्थानमिति स्यात् सर्वादित्वम्। यद्येवं सकल-कृत्स्न-जगदादेरपि प्राप्नोति, एतेषामपि शब्दानामेकैकस्य यो विषयस्तस्मिंस्तस्मिन् विषये यो यः शब्दो वर्तते तस्य तस्य तस्मिन् वर्तमानस्य सर्वादिकार्यं प्राप्नोति, ततश्च 'सर्वस्मिन्नोदने' इत्योदनशब्दस्यापि स्मिन्नादिप्रसङ्गः सामानाधिकरण्यादनयोः, ननु प्रतिनियतभागाभिनिवेशित्वाच्छब्दानां सर्वत्वमोदनशब्देन नाभिहितमोदनत्वमपि सर्वशब्देनेति कुतोऽयं प्रसङ्गः? तत्रेदं दर्शनम्-सर्वशब्दोऽप्योदनार्थावग्रहेण प्रवृत्त ओदनशब्दोऽपि सर्वार्थावग्रहेण, प्रतिपत्ता तु केवलात् सर्वादिशब्दाद् विशेषं न प्रतिपद्यते, रूपसादृश्यात्, नापि ओदनशब्दादिति तत्प्रतिपत्त्यर्थमुभयोपादानम्, तत्रैकस्य सर्वादिकार्यं भवति नापरस्येति प्रमाणाभावादतिप्रसङ्ग उद्भाव्यते, एवं तर्हि उभयमनेन क्रियते-पाठश्चैव विशेष्यते विधिश्च, कथं पुनरेकेन यत्नेनोभयं लभ्यते? तन्त्रेणाऽऽवृत्त्या वा, सर्वेषां यानि प्रतिपादनानि सर्वादीनि तेभ्यः, संज्ञोपसर्जने च विशेषेऽवतिष्ठेते, एवं च सर्वादीनां विशिष्टो धर्मोऽनुमीयते-नूनमेवामून्यन्वर्थप्रवृत्तिनिमित्तेन सर्वाभिधेयत्वेन युक्तानि सर्वादीनि, अतः सर्वादिकार्यमन्तर्गणकार्यं च सर्वाभिधेयत्वयुक्तानामेव भवति, न संज्ञोपसर्जनानामिति सिद्धम्। अथाढ्यो भूतपूर्वो मयूरव्यंसकादित्वात् समासे आढ्यपूर्वस्तस्मै आढ्यपूर्वाय देहीत्यत्र कथं सर्वादिकार्यं न भवति? न च व्यवस्थाया अभावः, पूर्वमाढ्यो न च सम्प्रतीति व्यवस्थाप्रतीतेः, उच्यते-अत्र हि पूर्वत्वमाढ्यत्वस्य विशेषणम्, यथा-अतिस(पू)र्वायेत्युपसर्जनत्वात् पूर्वार्थस्य स्मायादि न भवति। ननु अहकं पिताऽस्य मकत्पितृकः, त्वकं पिताऽस्य त्वकत्पितृकः, द्वकौ पुत्रावस्य द्वकिपुत्र इति, अन्तरङ्गत्वात् सर्वाभिधाननिमित्तेनाका तावद् भाव्यम्, पश्चात् पदान्तरसन्निधाने वृत्तिपदार्थविवक्षायां बहुव्रीहिणेत्यनुपसर्जनत्वात् प्राप्नोति, मत्कपितृकः, त्वत्कपितृकः, द्विकपुत्र इति चेष्यत इति तदर्थं बहुव्रीहेरप्रयोगसमवायि यत् प्रक्रियावाक्यं तत्र प्रतिषेधो वक्तव्यः, न तु लौकिके वाक्ये प्रयोगार्हे तस्याक्प्रयुक्तस्यैव प्रयोगात्, तत्र-तत्राप्यक्प्रयोगस्यैवेष्टेः, यदाह-गोनर्दीयः—

"अकच्-स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयौ। मकत्पितृकः त्वकत्पितृकः" इति। न च ※ अन्तरङ्गानपि विधीन बहिरङ्गो

※ **ला.सू. सम्पादितपुस्तके 'तत्कार्ये' इत्येतावानेव पाठो दृश्यते, परं सोऽपूर्णः प्रतिभाति।**

विधिर्बाधते ※ इति वक्तुं शक्यम्, लुब्विषयत्वेनैव तस्य ज्ञापितत्वात्। "सृं गतौ" अतो "लटि-खटि-सलि०" (उणा० ५०५) इति वे **सर्व।** विशतेः "निघृसीष्यृषि-स्तु-प्रुषि०" (उणा० ५११.) इति वे **विश्व।** "उभत् पूरणे" अतो "नाम्युपान्त्य०" (५.१.५४) इति के **उभ,** तत्पूर्वाद् यातेः "आतो डोऽह्वा-वा-मः" (५.१.७६) इति डे निपातनाट्टित्त्वे **उभयट्।** अनितेः "स्था-छा-मा-सा०" (उणा० ३५७) इति येऽन्य। अन्यशब्दात् डतरेऽन्यतर। एतेः "इण्-पूभ्यां किद्" (उणा० ४३८) इति तरे **इतर। डतर डतम** इति प्रत्ययानुकरणम्। "त्रित्वरिष् सम्भ्रमे" अतः "क्वचित्" (५.१.१७१) इति डे **त्व,** अस्यैव धातोः "संश्वद्-वेहत्-साक्षादयः" (उणा०८८२.) इति निपातनात् **त्वत्।** नयतेः "अर्तीरि-स्तु०" (उणा० ३३८.) इति मे **नेम।** "षम वैक्लव्ये" अतोऽचि **सम।** सिनोतेः "सेरी च वा" (उणा० ३४३.) इति किति मे **सिम।** "पूर्व पूरणे" अतोऽचि **पूर्व,** "पृश् पालन-पूरणयोः" अतो वा "निघृषीष्यृषिस्तु-प्रुषी०" (उणा० ५११.) इति किति वे "ओष्ठ्यादु०" (४.४.१११) इत्युरि "भ्वादे०" (२.१.६३) इति दीर्घत्वे **पूर्व।** पृणातेरौणादिकेऽकारे **पर।** "अव रक्षणादौ" अतः "अवेर्ध् च वा" (उणा० ३९८.) इत्यरप्रत्यये **अवर।** "दक्षि शैघ्र्ये च" इत्यस्माद् "द्रु-ह-वृहि-दक्षिभ्य इणः" (उणा० १९४.) इतीणे **दक्षिण।** उत्पूर्वात् तरतेरचि औणादिकेऽकारे वा **उत्तर।** नञ्पूर्वात् पृणातेरकारे **अपर।** अवतेः "अवेर्ध् च वा" (उणा० ३९८.) इत्यरे धादेशे च **अधर।** "असूच् क्षेपणे" इत्यस्मात् "प्रह्वाऽऽह्वा-यह्वा-स्व०" (उणा० ५१४.) इति निपातनाद् वे **स्व।** "अन श्वसक् प्राणने" अतः "अनिकाभ्यां तरः" (उणा० ४३७.) इति तरे **अन्तर।** "त्यजं हानौ" "तनूयी विस्तारे" "यजीं देवपूजा-संगतिकरणदानेषु" इत्येभ्यः "तनि-त्यजि-यजिभ्यो डद्" (उणा० ८९५.) इति डित्यदि अन्त्यस्वरादिलोपे **त्यद्, तद्, यद्।** "अदंक् भक्षणे" अतः "अदेरन्ध् च वा" (उणा० ९६३.) इत्यसि **अदस्।** एतेः "इणो दमक्" (उणा० ९३८.) इति दमकि "इणस्तद्" (उणा० ८९६.) इति तदि "भीण्-शलि-वलि०" (उणा० २१) इति के **'इदम्'** प्रत्यक्षनिर्देशे, **'एतत्'** प्रत्यक्षसमीपे, **'एक'** एकत्वसंख्यायाम्। उभेः "उभेर्द्व-त्रौ च" (उणा० ६१५.) इतीकारे द्वादेशे च **द्वि** द्वित्वे। युषेः सौत्रात् "युष्यसिभ्यां क्मद्" (उणा० ८९९) इति क्मदि **युष्मद्** प्रत्यक्षवचनः। "भाक् दीप्तौ" अतः 'भातेर्डवतुः' (उणा० ८८६.) इति डवतौ **भवतु** परोक्षवचनः। अस्यतेः "युष्यसिभ्यां०" (उणा०८९९) इति क्मदि **अस्मद्** प्रत्यात्मवचनः। "कुंक् शब्दे" अतः "कोर्डिम्" (उणा० ९३९) इति डिमि **किम्** प्रश्ने क्षेपे च ।।७।।

ल.न्यास*–सर्वादेरित्यादि। परमसर्वस्मायिति-स्याद्याक्षिप्तस्य नाम्नः सर्वादिविशेषणाद् विशेषणेन च तदन्तविधेर्भावात् "न सर्वादिः" (१.४.१२) इति द्वन्द्वे निषेधाद् वा ※ ग्रहणवता नाम्ना न तदन्तविधिः ※ इत्यस्यानुपस्थानात् तदन्तं 'परमसर्वस्मै' इत्युदाहृतम्, केवलस्य व्यपदेशिवद्भावात् तदन्तत्वं दृश्यम्। **विश्वस्मै** इति–सर्वशब्दसाहचर्याद् विश्वशब्दस्यापि समस्तार्थस्यैव ग्रहणम्, न तु जगदर्थस्य। **स्वार्थिकप्रत्ययेति**–इत्थं वदतोऽयमाशयः--स्वार्थिकप्रत्ययोऽपि गणपाठफलमिति। सिमोऽश्वाद्यर्थोऽपि। **अधराणी**ति-शब्दरूपापेक्षया नपुंसकनिर्देशो नार्थापेक्षया, तेन स्त्री-पुं-नपुंसकेषु सर्वेष्वप्यर्थेषु सर्वादित्वमिति। **स्वाभिधेयेति**-पूर्वादीनां शब्दानां स्वाभिधेयो दिग्-देश-काल-स्वभावोऽर्थः, तमपेक्षते यः स स्वाभिधेयापेक्षः, **चो**ऽवधारणे, दिगादीनां ह्यर्थानां पूर्वादिशब्दाभिधेयानां यत् पूर्वादित्वं तद् नियमेन कञ्चिदवधिमपेक्ष्य संपद्यते, न त्ववधिनिरपेक्षम्, तथाहि–पूर्वस्य देशस्य यत् पूर्वत्वं तत् परं देशमवधिमपेक्ष्य भवति, परस्यापि यत् परत्वं तत् पूर्वदेशमपेक्ष्य भवति, तस्मात् पूर्वादिशब्दवाच्यापेक्षणेऽवश्यं केनचिदवधिना भाव्यम्, तत्र तस्यैवावधेर्यः पूर्वादिशब्दाभिधेयापेक्षोऽवधिभाव एकान्तिकः स नियमो व्यवस्थापरपर्यायः, तस्मिन् गम्यमाने पूर्वादीनां शब्दानां स्वाभिधेय एव वर्तमानानां सर्वादिकार्यम्, न तु वाच्ये, यो हि पूर्वादिशब्दाभिधेयादर्थादन्यस्यावधिभूतस्य नियमः स कथं पूर्वादिशब्दवाच्यो भविष्यति? इति, अतस्तस्मिन्नान्तरीयकतया गम्यमाने 'पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर' इत्येतानि सप्त शब्दरूपाणि सर्वादीनि भवन्ति। अवधिमति दिगादिलक्षणे वर्तमानानि पूर्वादीनि सर्वादीनि भवन्तीत्युदाहरति–**पूर्वस्मै** इत्यादि। **दक्षिणायै** इति–यज्ञकर्मकृतां वेतनदानं दक्षिणा। **बहिर्भावेने**ति–धर्मे बहिष्टे धर्मिणि च बहिर्भवे बहिः शब्दः। अन्तं रातीति "आतोडोऽह्वा-वा०" (५.१.७६) इति डः। **पुरि वर्तते** इति–'पुरि' इति शब्दप्रधानो निर्देशः, यदा अन्तरशब्दस्य पुर्व्यञ्जनान्तो वाच्यो भवति तदा सर्वादित्वस्य निषेधः, यदा अकारान्त ईकारान्तो वा पुरं पुरी द्रङ्गादयश्च वाच्या भवन्ति, तदा सर्वादित्वमस्त्येव। **द्वाभ्यामि**ति–"सर्वादेः सर्वाः" (२.२.११९) इत्यत्र मतद्वयाभिप्रायेण प्रथमा-द्वितीयावर्जनात् तृतीयां प्रारभ्यात्रोदाहरणानि दर्शितानि। स्वमते **'द्वौ हेतू'** इत्यादि भवत्येव। **सर्वविभक्त्यादय** इति–आदिशब्दाद् यथायोगमेकशेष-पूर्वनिपात-पुंवद्भाव डद्रि-आत्-आयनिञ्-मयट्-अकः प्रयोजनानि ज्ञायन्त इति। अत्र सर्वमादीयते गृह्यतेऽभिधेयत्वेन येनेत्यन्वर्थाश्रयणात् सर्वेषां यानि नामानि तानि सर्वादीनि, संज्ञोपसर्जने च विशेषेऽवतिष्ठेते तथाहि–यदा सर्वशब्दः संज्ञात्वेन नियुज्यते तदा प्रसिद्धप्रवृत्तिनिमित्तपरित्यागात् स्वरूपमात्रोपकारी प्रवर्तत इति विशेष एवावतिष्ठते, उपसर्जनमपि जहत् स्वार्थमजहद् वाऽतिक्रान्तार्थविशेषणतामापन्नम् 'अतिसर्वाय' इत्यादावतिक्रान्तार्थवृत्ति भवति, एवं बहुव्रीहावपि प्रियसर्वाय द्वयन्यायेत्यादावन्यपदार्थसंक्रमाद् विशेषार्थवृत्ति, वाक्ये त्वसंश्लिष्टार्थत्वात् स्वार्थमात्रं प्रतिपादयतो न विशेषेऽवस्थानमिति स्यात् सर्वादित्वम्। "उभत् पूरणे" अतो "नाम्युपान्त्य०" (५.१.५४) इति के **उभ,** तत्पूर्वाद् यातेः "आतो डोऽह्वा वा-मः" (५.१.७६) इति डे निपातनात् टित्वे **उभयट्। डतरे**ति–प्रत्ययानुकरणम्। **त्व** "त्रित्वरिष् संभ्रमे" अतः "क्वचित्" (५.१.१७१) इति डे, ***त्वत्-अस्यैव धातोः "संश्वद्-वेहत्-साक्षादयः" (उणा० ८८२) इति निपातनात् ।।७।।

ङेः स्मिन् ।१।४।८।।

बृ०न्यास—**ङेरित्यादि**। **ङेरिति** स्थानसम्बन्धे षष्ठी। **सम्बन्धिन** इति-सर्वादेः शब्दस्वरूपस्य यः सम्बन्धी ङिस्तस्येत्यर्थः, तत्सम्बन्धित्वं च तदर्थगतसंख्याद्यभिधानादर्थद्वारकं द्रष्टव्यम्। **सर्वस्मिन्, विश्वस्मिन्निति**-सर्व-विश्वशब्दाभ्यां ङेः स्मिन्नादेशः। **सर्वादेरित्येवेति**-'असंज्ञायाम्' इति-विशेषणात्, अर्थविशेषे च सर्वादित्वात् संज्ञायामर्थविशेषाभावे च न सर्वादित्वमित्यर्थः। **समे देश** इति अविषमेऽनिम्नोन्नत इति यावत्। "तदस्यास्त्यस्मिन्०" (७.२.१) इति ज्ञापकाद् ङेरिति सप्तम्येकवचनस्य परिग्रहः, तथैवात्र वाक्यार्थस्य घटनात् ।।८।।

जस इः ।१।४।९।।

बृ०न्यास—**जस** इत्यादि। सर्वशब्दात् प्रथमाबहुवचने जस इकारादेशे "अवर्णस्य०" (१.२.६) इति एत्वे **सर्वे**, एवमन्यत्रापि। अथ नपुंसके सर्वशब्दाद् ※ नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणाद् ※ जसः स्थाने इकारादेशः कस्मान्न भवति? उच्यते-परत्वाच्छि-रेवास्य बाधक इत्याह-**सर्वाणी**त्यादि ।।९।।

नेमा-ऽर्ध-प्रथम-चरम-तया-ऽया-ऽल्प-कतिपयस्य वा ।१।४।१०।।

बृ०न्यास—**नेमार्धे**त्यादि-अत्र समाहारद्वन्द्वात् षष्ठी। **नेमस्ये**ति-सर्वादित्वात् पूर्वेण प्राप्ते इति शेषः। व्याख्यानात् तयाऽयौ प्रत्ययौ, तयोश्च केवलयोरसम्भवात् तदन्तस्य कार्यं दर्शयति-**द्वितये** इत्यादि-द्वि-त्रिशब्दाभ्याम् "अवयवात् तयट्" (७.१.१५१) इति तयटि "द्वि-त्रिभ्यां०" (७.१.१५२) इत्ययटि जसोऽनेन विकल्पेन इकारादेशः। उभयट्शब्दस्य जस इकारादेशो विकल्पेन कस्मान्न भवतीत्याह-**उभयडि**त्यादि-प्रागेव निर्णीतम्। अथ कुत्सिता अल्पा, अज्ञाता अल्पा अल्पका इत्यादिकप्रत्ययस्य स्वार्थिकत्वाद् अल्पादिसम्बन्ध्येव जसिति इभावः कस्मान्न भवति? उच्यते-ज्ञापितमेवैतत्-डतर-डतमग्रहणेन यदत्र प्रकरणे स्वार्थिकप्रत्ययान्तस्य ग्रहणं न भवतीति। नेमशब्दस्य सर्वादित्वात् तत्रासंज्ञायामिति विशेषणादर्धादीनां च व्यवस्थितविभाषाविज्ञानात् संज्ञा-स्वार्थिक इकारो न भवतीत्याह-**सर्वादेरि**त्यादि। व्यवस्थितं मर्यादानतिक्रान्तं प्रयोगजातं विशेषेण भाषत इति व्यवस्थितविभाषा ।।१०।।

ल.न्यास—**नेमार्धे**त्यादि। **तयेति**-"तयि रक्षणे च" "अयि गतौ" इत्याभ्यामचि तया-ऽयौ शब्दावपि स्तः, परं व्याख्यानात् तयायौ प्रत्ययौ, तयोश्च केवलयोरसंभवात् तदन्तस्य कार्यं दर्शयति-**द्वितये** इत्यादि। व्युत्पत्तिपक्षेऽपि तयट्साहचर्यात् अयस्य तद्धितस्य ग्रहणम्, न तु "गय-हृदय०" (उणा० ३७०) इत्यौणादिकस्य। **व्यवस्थितविभाषेति**-व्यवस्थितं मर्यादानतिक्रान्तं प्रयोगजातं विशेषेण भाषत इति। **अर्धा नाम केचिदिति**-नामेत्यदन्तमव्ययम्, नाम नाम्ना संज्ञया, नाम प्रसिद्धार्थो वा, केचिद् वर्तन्ते, किं नाम? अर्धा नाम, तदा क्लीबः ।।१०।।

द्वन्द्वे वा ।१।४।११।।

बृ०न्यास—**द्वन्द्वे** इत्यादि। पूर्वसूत्रे नेमं प्रति व्यभिचाराभावाद् विशेषणानर्थक्याद् इतरान् प्रत्यसम्भवाज्जसः सर्वादेरित्यनेन सम्बन्धो न दर्शितः; इह तु सम्भव-व्यभिचारयोर्भावात् प्रदर्शित इत्याह-**सर्वादेः सम्बन्धिनो जस** इति। **(प्रियकतर-कतमाः)** प्रियाः कतरकतमे कतरकतमा वा येषामिति विग्रहः। **(वस्त्रान्तर-वसनान्तराः)** वस्त्रमन्तरं येषां ते वस्त्रान्तराः, "राजदन्तादिषु" (३.१.१४९) दर्शनात् सर्वादिपूर्वनिपातबाधायां वस्त्रशब्दस्य पूर्वनिपातः, एवं वसनमन्तरं येषां ते वसनान्तराः, वस्त्रान्तराश्च वसनान्तराश्चेति

सहोक्तौ बहुव्रीहेर्द्वन्द्वः, वसनशब्दो वसत्यत्रेत्यावासवचनः, यदि तु "वसिक् आच्छादने" वस्यते तत् तेन वेति तदा वसनशब्दोऽपि वस्त्रार्थ एवेति वस्त्रान्तर-वसनान्तरशब्दयोरेकशेषः स्यात्, अत्र द्वन्द्वाधिकरणत्वेऽपि वस्त्रान्तर-वसनान्तरशब्दयोः सर्वादेः सम्बन्धी न जसिति इभावो न भवति। ननु चान्तरशब्दो बहुव्रीहौ वर्तत इति कथमस्य प्रत्युदाहरणम्? न-तदवयवको बहुव्रीहिर्द्वन्द्व इति सोऽपि द्वन्द्व इति प्रत्युदाहियते। **उत्तरेणे**ति-द्वन्द्वस्य शब्दप्रधानत्वात् उत्तरपदस्य सर्वादेः सर्वादित्वात् "जस इः" (१.४.९) इति प्राप्तस्य "न सर्वादिः" (१.४.१२) इति निषेधादप्राप्तस्य च जस इकारस्य अनेन पुनः पक्षे विधिः क्रियत इत्यर्थः ।।११।।

***ल.न्यास*—द्वन्द्वे वे**ति। कतरे च दशनाश्चेति कृते द्वन्द्वस्योभयपदप्राधान्येऽपि कतर-दशना इत्यत्र "द्वन्द्वे वा" (१.४.११) इति न विकल्पः, सर्वादेरित्यानन्तर्यषष्ठीविज्ञानात्, यद्वा सर्वादेरित्यावृत्त्या पञ्चमी व्याख्येया, "पञ्चम्या निर्दिष्टे परस्य" (७.४.१०४) इति न्यायाच्च स्यादेर्व्यवहितत्वान्न भवति। **वस्त्रान्तर-वसनान्तरा** इति-वस्त्रमन्तरं येषां ते वस्त्रान्तराः, सर्वादित्वादन्तरशब्दस्य पूर्वनिपाते प्राप्ते राजदन्तादित्वाद् वस्त्रस्य पूर्वं निपातः, एवं वसनान्तराः, ततो वस्त्रान्तराश्च वसनान्तराश्चेति कृते समानार्थत्वादेकशेषः प्राप्नोति, नैवम्-अत्र वसनशब्दो गृहपर्याय इति न समानार्थत्वम् ; यद्वा एकोऽन्तरशब्दो व्यावधानार्थो, अन्यस्तु विशेषार्थो। ननु चान्तरशब्दो बहुव्रीहौ वर्तते, न द्वन्द्वे इति कथमदः प्रत्युदाहरणम्? न-तदवयवको बहुव्रीहिर्द्वन्द्व इति सोऽपि द्वन्द्व इति प्रत्युदाहियते ।।११।।

न सर्वादिः ।१।४।१२।।

***बृ०न्यास*—न सर्वे**त्यादि। सर्वसर्वादिकार्यविधिवैयर्थ्यप्रसङ्गात् सर्वत्र सर्वादेः सर्वादित्वनिषेधायोगादनन्तरं द्वन्द्व इत्यनुवर्तनीयमित्याह-**द्वन्द्व** इत्यादि। निषेधविषयमर्थात् सर्वादिरिति प्रकरणाच्च प्राप्तमाह-**सर्वमि**त्यादि। **पूर्वापराय पूर्वापराद्** इति-पूर्वं च अपरं चेति समाहारद्वन्द्वात् सर्वादित्वनिषेधाद् ङयादेः स्मायादि न भवति। **कतरकतमानामि**ति-आमः साम् न भवति। **दक्षिणोत्तर-पूर्वाणामि**ति-दक्षिणा चोत्तरा च पूर्वा चेति द्वन्द्वः। ननु सर्वस्य सर्वादिकार्यस्य निषेधात् कथमत्र "सर्वादयोऽस्यादौ" (३.२.६१) इति पुंवद्भावः? उच्यते-'सर्वादयः०' इत्यत्र बहुवचनस्य व्याप्त्यर्थत्वाद् भूतपूर्वस्यापि सर्वादेर्ग्रहणात् पुंवद्भावो भवतीति बहुवचनलभ्यमेवार्थं दर्शयन्नाह-**अत्रे**त्यादि। अथ कतरे च कतमे चेति द्वन्द्वे सर्वादिकार्यस्य निषेधादज्ञाताद्यर्थेऽपि अक्प्रत्ययाप्रसङ्गे कप्रत्यये सति स्वार्थिकत्वेन प्रकृत्यर्थाविशिष्टत्वात् **कतर-कतमका** इति (इत्यत्र) "द्वन्द्वे वा" (१.४.११) इति जस इः कस्मान्न भवति? अत आह-**अत्र सर्वादित्वनिषेधादि**त्यादि डतर-डतमग्रहणं हि तत्रेतरस्वार्थिकप्रत्ययाग्रहणार्थमुक्तमित्यर्थः ।।१२।।

***ल.न्यास*—न सर्वादिरि**ति। **सर्वादिकार्यमि**ति-सर्वादिकार्यं कर्मतामापेदानं न प्राप्नोतीत्यर्थः, प्राप्तावपि परस्मैपदमते। **कतर-कतमकाः** स्वार्थिकप्रत्ययान्ताग्रहणं डतर-डतमग्रहणेन ज्ञापितम्, तौ च प्रकृतेरन्ते समागच्छतस्ततोऽन्योऽपि स्वार्थिकः प्रत्ययो योऽन्ते समभ्येति तदन्तस्यैवाग्रहणम्, तेन अक्प्रत्यये सति एतत्प्रकरणविहितं कार्यं भवत्येव, ततः 'सर्वके' इति सिद्धम् ।।१२।।

तृतीयान्तात् पूर्वा-ऽवरं योगे ।१।४।१३।।

***बृ०न्यास*—तृतीये**त्यादि। योग एकार्थीभावो व्यपेक्षा चोभयं गृह्यते, अन्तग्रहणं समासभेदप्रतिपत्त्यर्थम्, अनेकविभक्तिश्चात्र समासः, तत्रैकार्थीभावे तृतीयाया अन्तो विनाशो लुबित्यर्थः, स च समासे भवति, तत्र जहत्स्वार्थायामजहत्स्वार्थायां वा वृत्तौ उपसर्जनपदानि प्रधानार्थानि पदानि व्यर्थानि द्व्यर्थानि वा सन्त्येकार्थानि भवन्ति, तृतीयान्तात् परं पूर्वावरं योगे सति सर्वादि न भवतीत्यत्र पक्षे परदिग्योगलक्षणा पञ्चमीति; यदा तु व्यपेक्षार्थो योगशब्दस्तदा तृतीयाऽन्ते यस्येति उद्भूतावयवत्वाद् बहुव्रीहेस्तृतीयायाः समुदायेऽन्तर्भावात् कार्ये व्यापारात् "गम्ययपः कर्मा-ऽऽधारे" (२.२.७४) इति कर्मणि पञ्चमीविधानादर्थद्वारेण तृतीयान्तं पदमाश्रित्य विशेषण-विशेष्यभावे सति लौकिके प्रयोगार्हे वाक्ये पूर्वावरं वर्तमानं सर्वादि न भवतीत्युभयमुदाहरति-**मासेन पूर्वाय, मासपूर्वाये**त्यादि।

अथवा बहुव्रीहिरेव-तृतीयाया अन्तो विनाशो यत्र, तृतीया अन्ते यस्येति वा, पूर्ववत् पञ्चम्यामर्थद्वयलाभः। यदि वा "प्रत्ययः प्रकृत्यादेः" (७.४.११५) इत्यन्तत्वे लब्धेऽन्तग्रहणं द्वन्द्वार्थम्-तृतीया च अन्तश्च तृतीयान्तं तदाश्रित्य योगे सतीत्येवमपि पूर्वोक्तपक्षद्वयपरिग्रहः सिद्ध्यतीति। "प्रत्ययः प्रकृत्यादेः" (७.४.११५) इत्यन्तलाभात् तदभावे वाक्यमेवैकं गृहीतं स्यान्न तु समासः, 'तृतीयासमासे' इत्यपि कृते समास एकः संगृहीतो भवति, न वाक्यम्। ननु लाघवार्थं 'तृतीयासमासे' इत्येवोच्यताम्, न चैवं सति तृतीयासमासेऽन्यस्यापि सर्वादेः सर्वादिकार्यप्रतिषेधप्रसङ्ग इति वाच्यम्, "ऊनार्थपूर्वाद्यैः" (३.१.६७) इति साक्षात् प्रतिपादितस्य प्रतिपदोक्तस्य सर्वादिषु पूर्वावरशब्दसम्बन्धिन एव तृतीयासमासस्य ग्रहणादिति, अथैवं सति वाक्यस्य परिग्रहाभाव इति चेत्? नैकस्तृतीयासमासः प्राथमकल्पिको यस्मिन्नैकपद्यमेकविभक्तित्वं चोच्यत इति, अन्यस्तु तृतीयासमासार्थानि पदानि तृतीयासमास इति तादर्थ्यात् कटार्थवीरणवत् ताच्छब्द्यं लभते, तस्य ग्रहणे वाक्यस्यापि ग्रहणं भवतीति, सत्यम्-भवेदेवं केवलमलौकिकमप्रयोगसमवायिवाक्यं संगृहीतं स्यात्, तस्यैव तदर्थत्वात् लौकिकस्य तु विपर्ययात्, मुख्यार्थसम्भवे गौणपरिग्रहाभावात् वाक्यस्यापरिग्रह इति। **ग्रामात् पूर्वस्मै** इति-अत्र तृतीयाया अभावान्न भवति प्रतिषेधः। तृतीयान्तमाश्रित्येति किम्? **पूर्वस्मै, मासेने**त्यत्र न भवति, अस्ति ह्यत्र योगमात्रम्, न तृतीयान्तमाश्रित्य, तथाहि-अत्रायमर्थः-दीयतां कम्बलः पूर्वस्मै, मासेन गतश्चैत्रः, नन्वत्र योगग्रहणेनैव व्यावर्तितमिदम्, नैवम्-तृतीयान्तमाश्रित्येति लभ्यत्वाद् विशिष्टयोगस्य ।।१३।।

***ल.न्यास*—तृतीयान्तादि**त्यादि। "अश्ववडव०" (३.१.१३१) इति पूर्वशब्दस्यावरेण स्वेन समाहृतिर्भणिष्यत इति सूत्रत्वात् समाहारः, कर्मधारयो वा पूर्वावयवयोगादिति। **योगे सम्बन्धे** इति-योग एकार्थीभावो व्यपेक्षा चोभयं गृह्यते। **मासपूर्वायेति**-"ऊनार्थ०" (३.१.६७) इति समासः, लुप्ताया अपि तृतीयायाः "स्थानीवा०" (७.४.१०९) इति स्थानित्वेन तृतीयान्तत्वम्, "लुप्यय्वृक्लेनत्" (७.४.११२) इति परिभाषया पूर्वस्य यत् कार्यं लुपि निमित्तभूतायां तदेव निषिध्यते, अतः "स्थानीवावर्णविधौ" (७.४.१०९) इति स्थानित्वं ततस्तृतीयान्तत्वं सिद्धम्। ननु यास्यति चैत्रो मासेनेत्यत्र योगग्रहणं विनाऽपि "समर्थः पदविधिः" (७.४.१२२) इति न्यायेन भविष्यति निषेधः, किं योगग्रहणेन? उच्यते-योगग्रहणादन्यदपि सिद्धम्-अपरैः सामान्येन तृतीयान्तेन योगे प्रतिषेधः कृतः, न तृतीयान्तात्, तेषां मते पूर्वाय मासेनेत्यपि भवति, तन्मतसङ्ग्रहार्थं तु पूर्वदिग्योगेऽपि पञ्चमी व्याख्येया ।।१३।।

तीयं ङित्कार्ये वा ।१।४।१४।।

***बृ०न्यास*—तीयमि**त्यादि। **तीयमि**ति-अविनाभावात् प्रत्ययेन प्रकृतेराक्षेपात्, *तात्स्थ्यात् तत्समुदायस्य तस्य च तीयमिति विशेषणाद् विशेषणे च तदन्तविधेरुपस्थानादाह-**तीयप्रत्ययान्तं शब्दरूपमि**ति। **ङित्कार्य** इति-ङित्स्थानिकस्मैभावादौ ङिदाश्रये च डसागमेऽयं विकल्प इति, डसागमोऽपि हि आपो भवन् ङित एव भवति, न तु ङिति परे, तेन सर्वादेरन्त्यात् स्वरात् पूर्वोऽग् न भवति। नह्यग् ङित्कार्यम्, तत्रागभावे कप्रत्यये स्वार्थिकप्रत्ययान्ताग्रहणात् स्मायादीनामभावः। **अर्थवत** इति-'पटुजातीयाय' इत्यादौ जातीयस्य 'ईय' इत्यस्य चार्थवत्त्वाज्जातीय इत्येतदेकदेशस्य 'मुखतीय' इत्यत्र चावयवसम्बध्यमानस्य तीयस्यानर्थकत्वाद् ग्रहणाभावः। लाक्षणिकत्वाद् वा, तथाहि-जातीयसमुदायेन तीयो लक्ष्यते मुखतीयसमुदायेन चेति लाक्षणिकत्वमित्यर्थः। पटुशब्दात् "प्रकारे जातीयर्" (७.२.७५) इति जातीयर् ।।१४।।

***ल.न्यास*—तीयं ङि**दित्यादि। **द्वितीयिकायै** इति-"स्व-ज्ञा-ऽज-भस्त्रा०" (२.४.१०८) इति आप इः, यत्र तु इत्वं न दृश्यते तत्र "ङ्यादीदूतः के" (२.४.१०४) इति ह्रस्वत्वम् ।।१४।।

---

* **ला.सू. सम्पादितपुस्तके 'तात्स्थ्यात् तया तत्समुदायस्य, तस्य च तीयमिति विशेषणाद्,' इति पाठ उपलभ्यते, परन्त्वानन्दबोधिनीवृत्त्यनुसारेण मुद्रित उपरितनपाठः समीचीन आभाति।**

अवर्णस्याऽऽमः साम् ।१।४।१५।।

***बृ०न्यास*—अवर्णे**त्यादि। आमः सन्ति बहवः, तथाहि-"आपो ङितां०" (१.४.१७) इति यामेकदेशः, "परस्परान्योऽन्येतरेतरस्य०" (३.२.१) इति स्यादिस्थानकः, "धातोरनेकस्वराद्०" (३.४.४६) इति च, "स्त्रियां ङितां०" (१.४.२८) इति च दामेकदेशः, तत्र यामेकदेशस्यामोऽनर्थकत्वादग्रहणम्, परस्पराद्यामः सामादेशे तत्रैव सामेवोच्येत, नह्यामादेशं कृत्वा साम्वचने किञ्चित् प्रयोजनमस्ति, प्रक्रियागौरवं च परिहृतं भवति, अन्यस्तु धातोर्विधीयमानः सर्वादेर्न सम्भवत्येव, "कर्तुः क्विप्०" (३.४.२५) इति क्विप्प्रत्ययान्ततायां सम्भवेऽपि स्यादेरित्यधिकारादपास्यते, दामेकदेशस्तु अवर्णान्तस्य सर्वादेर्न सम्भवत्येव इति पारिशेष्यात् षष्ठीबहुवचनस्यैव ग्रहणमित्याह—**षष्ठीबहुवचनस्याम** इति **सर्वेषाम्, विश्वेषाम्,** इति-सर्व-विश्वशब्दाभ्यामनेन सामादेशे "एद् बहुस्भोसि" (१.४.४) इत्येत्वे "नाम्यन्तस्था०" (२.३.१५) इति सस्य षत्वम्। अथात्रावर्णसन्निपातेन जातः सामादेशः कथं तद्विघातहेतोरेत्वस्य निमित्तं स्यादित्याह-**सन्निपाते**त्यादि। सर्वविश्वशब्दाभ्याम् "आत्" (२.४.१८) इत्यापि अनेनाऽऽमः सामादेशे **सर्वासाम्, विश्वासाम्,** इति। द्विशब्दात् "द्वि त्रिभ्यामयट्" (७.१.१५२) इत्ययटि सर्वादित्वाभावादामः सामभावे "ह्रस्वापश्च" (१.४.३२) इति नामादेशे **द्वयानाम्,** एवम्-तत एव "अवयवात् तयट्" (७.१.१५१) इति तयटि, आमि, सर्वादित्वाभावान्नामादेशे **द्वितयानाम्। कथमि**त्याशङ्कते-यद्ययडादिप्रत्ययान्तस्य सर्वादित्वं नास्ति तत् कथं 'द्वयेषाम्' इत्यत्र तत् कार्यमित्याशङ्काऽऽर्थः। परिहरति-अपपाठ एष इति ।।१५।।

***ल.न्यास*—अवर्णस्ये**त्यादि। परस्पराद्यामः सामादेशे तत्रैव सामादेश एवोच्येत, नह्यामादेशं कृत्वा साम्वचने किञ्चित् प्रयोजनमस्ति, प्रक्रियागौरवं च परिहृतं भवति, परोक्षादेशस्तु आम् धातोर्विधीयमानः सर्वादेर्न संभवति, "कर्तुः क्विप्०" (३.४.२५) इति क्विप्प्रत्ययान्ततायां संभवेऽपि स्यादेरित्यधिकारान्निरस्यत इत्याह—**षष्ठीति।**

"संमूर्च्छदुच्छृङ्खलशङ्खनिस्वनः स्वनः प्रयाते पटहस्य शार्ङ्गिणि। सत्त्वानि निन्ये नितरां महान्त्यपि व्यथां द्वयेषामपि मेदिनीभृताम्"।।

(**शिशुपालवधे,** स० १२. श्लो० १३) **माघोक्तम्** ।।१५।।

नवभ्यः पूर्वेभ्य इ स्मात् स्मिन् वा ।१।४।१६।।

***बृ०न्यास*—नवभ्य** इत्यादि। **'नवभ्यः पूर्वेभ्यः'** इति बहुवचनात् पूर्वादयो विज्ञायन्त इत्याह-**पूर्वादिभ्य** इति-पूर्वशब्दमादिं कृत्वा नवग्रहणादन्तरशब्दपर्यन्तेभ्य इत्यर्थः। पूर्वादयश्च 'इ स्मात् स्मिन्' इति कार्यानुवादाद् ग्रहणस्यैव च (गणस्यैव च) प्रस्तुतत्वाद् गणसंनिविष्टा एव गृह्यन्ते, न संज्ञोपसर्जनीभूता इत्याह-**यथास्थानमि**त्यादि। पूर्वशब्दाद् जस्-ङसि-ङीनाम् इ-स्मात्-स्मिनो विभाषया भवन्तीति **पूर्वे, पूर्वाः** इत्युदाहृतम्, एवमन्यत्रापि। त्यदशब्दाद् जस्-ङसि-ङिषु अत्वादौ कृते 'नवभ्यः' इति वचनाद् विकल्पाभावे नित्यमिकारादिषु कृतेषु **त्ये, त्यस्मात्, त्यस्मिन्** इति। यदि पूर्वेभ्य इति नोच्येत तदा पूर्वादय एव नवेति न स्यादिति सर्वादावपि विकल्पः स्यात् ।।१६।।

आपो ङितां यै-यास्-यास्-याम् ।१।४।१७।।

***बृ०न्यास*--आपो ङितामि**त्यादि। पूर्वसूत्रेषु सर्वादेरव्यभिचारेऽप्युत्तरसूत्रे सर्वादिग्रहणादिह सामान्यमवगम्यत इत्याह-**आबन्तसम्बन्धिनामि**ति। यैप्रभृत्यादेशानां चतुष्ट्वात् ङिच्छब्दपरिगृहीतानां चतुर्थी-पञ्चमी-षष्ठी-सप्तम्येकवचनानामादेशिनामपि

तावत्सङ्ख्यत्वात् यथासङ्ख्येन प्रवृत्तिरित्याह-**ङितां ङे-ङसि-ङस्-ङीनां स्थाने यथासंख्यमि**ति। खट्वाशब्दाद् ङे-ङसि-ङस्-ङीनां स्थानेऽनेन यायाद्यादेशेषु **खट्वायै, खट्वायाः, खट्वायाः, खट्वायाम्** इति, एवम्-बहवो राजानो यस्यामित्यादिविग्रहे "ताभ्यां वाऽऽप्ङित्" (२.४.१५) इति ङिदापि "ङित्यन्त्यस्वरादेः" (२.१.११४) इत्यन्त्यस्वरादिलोपे पूर्ववद् ङितां यायाद्यादेशे **बहुराजायै** इत्यादि। करीषस्येव गन्धो यस्य स करीषगन्धः, तस्यापत्यं वृद्धं स्त्रीति "अत इञ्" (६.१.३१) इतीञि तस्य "अनार्ष०" (२.४.७८) इत्यादिना ष्यादेशे "आत्" (२.४.१८) इत्यापि पूर्ववद् यैप्रभृत्यादेशे **कारीषगन्ध्यायै** इत्यादि। "कील बन्धे" अतः "ऋ-कृ-मृ-वृ-तनि०" (उणा० ४७५) इत्यालप्रत्यये कीलालम्, तत्पूर्वात् पिबतेर्विचि चतुर्थ्येकवचने पकारकारणाद् यायादेशाभावे "लुगातोऽनापः" (२.१.१०१) इत्याकारलोपे **कीलालपे**। बहवः खट्वा यस्येति विगृह्य "गोश्चान्ते०" (२.४.९६) इति ह्रस्वत्वे तस्य स्थानिवद्भावेऽपि चतुर्थ्येकवचनस्य तत्सम्बन्धित्वाभावाद् यायादेशाभावे **बहुखट्वायै**ति। ईषदपरिसमाप्ता खट्वेत्यर्थे "नाम्नः प्राग् बहुर्वा" (७.३.१२) इति प्राग् बहौ ङेस्तत्सम्बन्धित्वाद् यायादेशे **बहुखट्वायै विष्टराय** विपूर्वात् स्तृणातेरचि गुणे "वेः स्त्रः" (२.३.२३) इति षत्वे "तवर्गस्य०" (१.३.६०) इति टत्वे विष्टरः, ततश्चतुर्थ्येकवचनम् ।।१७।।

***ल.न्यास*–आपो ङितामि**त्यादि। **आबन्ते**ति–पूर्वसूत्रेषु सर्वादेरव्यभिचारेऽपि उत्तरसूत्रे सर्वादिग्रहणाद् इह सामान्यमवगम्यते। **कारीषगन्ध्यायै** इति-ननु अणि अणन्तत्वात् "अणञेये०" (२.४.२०) इति, इञि तु "नुर्जातेः" (२.४.७२) इति ङीः प्राप्नोति, नैवम्-अत्र ष्यादेशः समजनि, "अणञेयेकण्०" (२.४.२०) इति सूत्रे तु स्वरूपस्याणो ग्रहणं न ष्यादेशरूपस्य, एतत् व्याख्यानतो लभ्यते, इञस्तु इकारान्तस्य ङीरुक्तः।।१७।।

सर्वादेर्डस्पूर्वाः ।१।४।१८।।

***बृ०न्यास*–सर्वादेरि**त्यादि। **(डस्पूर्वा** इति-) डस्पूर्वो येभ्यस्ते डस्पूर्वा भवन्तीति, डकारो डित्कार्यार्थः। सर्वशब्दादापि ङे-ङसि-ङस् ङीनां स्थाने पूर्वेण यैप्रभृत्यादेशेऽनेन डस्पूर्वत्वेऽन्त्यस्वरादिलोपे च **सर्वस्यै, सर्वस्याः, सर्वस्याः, सर्वस्याम्,** एवम्-**परमसर्वस्यै** इत्यादि। इदम्शब्दाञ्चतुर्थ्येकवचनादौ "आ द्वेरः" (२.१.४१) इत्यत्वे "लुगस्यादेत्यपदे" (२.१.११२) इत्यकारलोपे "आत्" (२.४.१८) इत्यापि "आपो ङितां०" (१.४.१७) इति यायाद्यादेशे "अनक्" (२.१.३६) इत्यदादेशेऽनेन डस्पूर्वत्वे "ङित्यन्त्यस्वरादेः" (२.१.११४) इत्यकारलोपे **अस्यै, अस्याः, अस्याः, अस्याम्** इति। अथात्र यायाद्यादेशे कृते सर्वादित्वेन तत्पृष्ठभावित्वात् ङसि कृते व्यञ्जनादित्वाभावात् कथमदादेश इत्याह-**परत्वादि**त्यादि। **तीयस्ये**ति-"तीयं ङित्कार्ये वा" (१.४.१४) इत्यनेनेति शेषः। **प्रियसर्वायै** इत्यादि-प्रियाः सर्वा यस्याः, सर्वा अतिक्रान्ता, दक्षिणस्याश्चेत्यादि विगृह्य "सर्वादयोऽस्यादौ" (३.२.६१) इति यथासम्भवं पूर्वस्य पुंवद्भावे चतुर्थ्येकवचनादेः पूर्वेणैव यैप्रभृत्यादेशः, एतेषु क्वचिदन्यपदार्थप्रधानत्वात्, क्वचित् पूर्वपदार्थप्रधानत्वादुपसर्जनत्वेन सर्वादेस्तत्सम्बन्धित्वाभावाद् यैप्रभृतीनां तत्पूर्वो डस् न भवतीत्याह-**एष्वि**त्यादि। **यद्येवमि**ति-यद्युपसर्जनत्वेन सर्वादेस्तत्सम्बन्धित्वाभावस्तदा **'दक्षिणपूर्वस्यै'** इत्यादावप्यन्यपदार्थप्रधानत्वेन सर्वादिसम्बन्धित्वाभावात् कथं डसादेश इति प्रश्नार्थः। समाधत्ते-**दक्षिणा चासावि**त्यादि। पुनः पृच्छति-**अथे**त्यादि-'त्वकं पिताऽस्य, अहकं पिताऽस्य, द्वकौ पुत्रावस्य, ककेे सब्रह्मचारिणोऽस्य' इत्यादि विगृह्य त्यदादेर्बहुव्रीहावुपसर्जनत्वेनाप्रधानत्वात् कथं "त्यादिसर्वादेः" (७.३.२९) इत्यक् समाधत्ते-**अन्तरङ्गत्वादि**ति-अयमर्थः-अन्तरङ्गत्वात् सर्वाद्यभिधाननिमित्तेनाका तावद् भाव्यम्, पश्चात् पदान्तरसन्निधाने वर्ति(पदार्थविशेषणान्य) पदार्थविवक्षायां बहुव्रीहिणेत्यनुपसर्जनत्वात् प्राप्नोत्यगित्यदोषः। **अन्ये त्वि**ति-ते हि "न बहुव्रीहौ" इति सूत्रमारभ्य तद्वैयर्थ्यप्रसङ्गाद् बहुव्रीहिविषयभूते वाक्येऽपि सर्वादिकार्यस्याकः प्रतिषेधमिच्छन्तः कप्रत्ययमेवेच्छन्ति, तन्मते-**त्वत्कपितृकः, मत्कपितृकः,** इति स्यात् ।।१८।।

ल.न्यास–**सर्वादेर्डस्** इत्यादि। **'अस्यै'** इति इदम् शब्दस्य "आ द्वेरः" (२.१.४१) इत्यत्वे "लुगस्या०" (२.१.११२) इत्यकारलोपे "आत्" (२.४.१८) इत्यापि "आपो ङिताम्०" (१.४.१७) इति यायाद्यादेशे "अनक्" (२.१.३१) इत्यदादेशे अनेन डस्पूर्वत्वे "ङित्यन्त्य०" (२.१.११४) इत्यकारलोपे। अथात्र यायाद्यादेशे कृते सर्वादित्वेन तत्पृष्ठभावित्वात् डसि कृते व्यञ्जनादित्वाभावात् कथमदादेश इत्याह-**परत्वादिति। प्रियसर्वायै** इति-सर्वशब्दस्य प्राग्निपाते प्राप्ते "प्रियः" (३.१.११४) इत्यनेन प्रियस्य प्राग् निपातः। **अथ बहुव्रीह्यादेरिति**-परेण बहुव्रीह्यादेरिति प्रागभिदधे तदेव अनूदितम्, अत आदेः फलं न निरीक्ष्यम्, त्वकं पिताऽस्य, अहकं पिताऽस्य, द्वकौ पुत्रावस्य, ककेे सब्रह्मचारिणोऽस्येति। **अन्ये त्विति**-***उत्पलादयः*** ।।१८।।

टौस्येत् ।१।४।१९।।

बृ०न्यास--**टौसित्यादि**। **(टौसि)** टाश्च ओश्च तस्मिन्निति समाहारनिर्देशः, समाहारे च कार्यायोगात् समाहारद्वारेण समाहारिणो निमित्तत्वेन नामविशेषणस्य आप इत्यनुवर्तमानस्य आदेशिनो विशेष्यत्वेन च लक्ष्येते इत्याह-**आबन्तसम्बन्धिनोरित्यादि**-"षष्ठ्या अन्त्यस्य" (७.४.१०६) इति च न्यायादाबन्तसमुदायान्तस्यैव भवतीत्युक्त**मेकारोऽन्तादेश** इति। **खट्वया** अत्र दीर्घापवाद एत्वम्, **खट्वयोरित्यत्र** चौत्वापवादः, ततोऽयादेशः। बहवो राजानो यस्यामिति विगृह्य पूर्ववद् ङिदापि, तस्य टौसोरेत्वेऽयादेशे च **बहुराजया, बहुराजयोः** इति। कारीषगन्ध्याशब्दात् टौसोः पूर्ववदेत्वादौ **कारीषगन्ध्यया, कारीषगन्ध्ययोः**। कीलालपाशब्दाद् विजन्तात् टायाम् "लुगातोऽनापः" (२.१.१०७) इत्याकारलोपे **कीलालपा ब्राह्मणेन, एदि**ति तकारोऽसन्देहार्थः, अन्यथाऽन्तरेण तकारमेरित्युच्यमाने किमिकार आदेशो भवत्याहोस्विद् इकारस्य टौसोः परयोः पूर्वे आदेशा इति सन्देहः स्यात् ।।१९।।

ल.न्यास–**टौस्येत्यादि**। **एदि**ति तकारोऽसन्देहार्थोऽन्यथाऽन्तरेण तकारमेरित्युच्यमाने किमेकार आदेशो भवत्याहोस्वित् इकारस्य टौसोः परयोः पूर्वे आदेशा इति सन्देहः स्यात् ।।१९।।

औता ।१।४।२०।।

बृ०न्यास–**औतेति**-सूत्रे विशेषस्यानिर्देशात् सामान्येन प्रथमा-द्वितीयाद्विवचनौकारयोर्ग्रहणमित्याह-**प्रथमा-द्वितीया-द्विवचनौकारेणेति**। आबन्तस्येत्येकाऽपीयं षष्ठी द्विधाऽर्थवशाद् भिद्यते-सम्बन्धितया स्थानितया, इत्युक्तम्–**आबन्तस्य सम्बन्धिना औता सहाबन्तस्यैव स्थान** इति। नन्वेकेनैव सम्बन्धेन चरितार्थत्वात् स्थानसम्बन्धा न घटते, न-एकारस्यादेशत्वात् तस्य च स्थानमन्तरेणासम्भवात् प्रत्यासत्तेस्तस्यैव स्थानित्वं परिकल्पत इत्यदोषः, एवं पूर्वसूत्रेऽपि द्रष्टव्यमिति। **माले तिष्ठतः, माले पश्य** इति–तिष्ठतः, पश्येत्यनुप्रयोगौ प्रथमा द्वितीयाद्विवचनयोः क्रमेणाभिव्यक्त्यर्थौ ।।२०।।

ल.न्यास–**औतेति**-आबन्तस्येत्येकाऽपि षष्ठी द्विधाऽर्थवशाद् भिद्यते-सम्बन्धितया स्थानितया चेत्याह-**आबन्तस्य सम्बन्धिना औता सह आबन्तस्यैव स्थाने** इति। **बहुखट्वौ** ※ एकदेश० ※ इति, "स्थानीवा०" (७.४.१०९) इति वा आबन्तत्वम् ।।२०।।

इदुतोऽस्त्रेरीदूत् ।१।४।२१।।

बृ०न्यास–**इदुत** इत्यादि। **इदुत** इति समाहारद्वन्द्वात् षष्ठी। **स्त्रिशब्दवर्जितस्येति**-स्त्रिशब्दस्यावयवो यद्यसाविकारो न भवति ततस्तस्य भवतीत्यर्थः। **(सख्यौ, पत्यौ** इति-) अत्र सखि-पतिशब्दाभ्यां सप्तम्येकवचनस्य "केवलसखि-पतेरौः" (१.४.२६) इत्यौकारे सप्तम्येकवचनस्य इकारात् पर औकारोऽस्तीति कथं तेन सह ईकारादेशो न भवतीत्याह-**अत्र त्वित्यादि**-अयमर्थः-

यद्यौकारे कृतेऽपि सखि-पतिशब्दाभ्यामेनेन ईकारः स्यात् तदा प्रक्रियालाघवार्थं तत्रैव ईकारं विदध्यात्, अविहितश्चेति। स्त्रियमतिक्रान्तौ "गोश्चान्ते०" (२.४.९६) इति ह्रस्वे स्त्रिवर्जनादीकाराभावे इयादेशे **चातिस्त्रियौ। कथमि**ति-'अतिशस्त्री पुरुषौ' इत्यत्र शस्त्रीशब्द-स्यार्थवत्वात् तदेकदेशस्य स्त्रिशब्दस्यानर्थकत्वात् प्रतिषेधाभाव इत्यर्थः। नन्वस्त्रेरिति प्रतिषेधोऽनर्थकः परत्वादतिस्त्रियावित्यत्रेयादेशेनैव भाव्यमत आह-**इदमेव चे**त्यादि। **तेने**ति "जस्येदोत्" (१.४.२२) "ङित्यदिति" (१.४.२३) "टः पुंसि ना" (१.४.२४) "ङिर्ङौ" (१.४.२५) इत्यादीन्येव भवन्ति, न तु इयादेशः ।।२१।।

***ल.न्यास*-इदुत** इत्यादि। स्त्रिवर्जनात् तत्सम्बन्धीति न सम्बध्यते। "षष्ठ्यान्त्यस्य" (७.४.१०६) इति *निर्दिश्यमान०* इति वा इदुतौ स्थानिनौ। **विधाने**ति-अन्यथा ईकारमेव विदध्यात्। **सहस्त्रयः** "सहात् तुल्ययोगे" (७.३.१७८) कच्निषेधः ।।२१।।

जस्येदोत् ।१।४।२२।।

***बृ०न्यास*-जस्ये**त्यादि। इदुत इत्यनुवर्तत इत्याह-**इदन्तस्योदन्तस्ये**ति। यथासंख्यमभिसम्बन्धाद् "आसन्नः" (७.४.१२०) इति वा इकारस्यैकारः, उकारस्यौकारः। "इवर्णादे०" (१.२.२१) इत्यस्यापवादेन तयोः कृतयोरय्-अवादेशौ भवतः ।।२२।।

ङित्यदिति ।१।४।२३।।

***बृ०न्यास*-ङित्यदी**ति-न दित् अदित् तस्मिन्नदिति। **'मुनये, साधवे'** इत्यादि पुल्लिङ्गोदाहरणम्। **'बुद्धये, धेनवे'** इत्यादि स्त्रीलिङ्गोदाहरणम्। नपुंसके त्वसम्भवित्वान्न दर्शितम्, तत्र हि "अनाम्स्वरे नोऽन्तः" (१.४.६४) इत्यस्ति बाधक इति। **'बुद्धयै, धेन्वै'** इत्यत्रादितीति प्रतिषेधाद् दै-दासादिषु एदोतौ न भवतः। नन्विकारोकारमात्रापेक्षत्वादन्तरङ्गत्वात् पूर्वमेव एदोतौ स्याताम्, आदेशस्य *स्त्रीविशेषेकारोकारापेक्षत्वाद् बहिरङ्गत्वात् कृतयोरप्येदोतोरिकारोकाराभावाद् वर्णविधित्वाच्च स्थानित्वाभावाद् दै-दासाद्यादेशाभावात् प्रतिषेधाभावः, न च तदन्तादेशविधानाद् अवर्णविधित्वात् स्थानित्वम्, अप्रधानेऽपि वर्णविधिप्रतिषेधात्, एवं तर्हि अनवकाशत्वात् पूर्वं दैप्रभृत्यादेशाः प्रवर्तन्ते पश्चाददितीति प्रतिषेधः, तथापि इदुत्सन्निपातेन जायमानत्वाद् दै-दासाद्यादेशेनैव एदोद्बाधो भविष्यतीत्यदितीति प्रतिषेधो व्यर्थः, यद्येवं यत्वमपि न प्राप्नोति तस्माददितीति प्रतिषेधो वर्णविधावियं परिभाषा नोपतिष्ठत इति ज्ञापनार्थः। शुचि-पटुशब्दाभ्याम् "इतोऽक्त्यर्थात्" (२.४.३२) 'स्वरादुतो०' (२.४.३५) इति च ङीप्रत्यये स्याद्यधिकाराद् ङित्वेऽप्येदोदभावे च **शुची पट्वी** ।।२३।।

***ल.न्यास*-ङित्यदिति। धेनवे** धीयते पयोऽस्या इति बाहुलकाद् अपादाने "धेः शित्" (उणा० ७८७) इति नुः, कर्मणि तु क्यः स्यात्। नपुंसकत्वे त्वसंभवित्वान्न दर्शितम्, तत्र हि "अनाम्स्वरे०" (१.४.६४) इति नान्तेन भाव्यम्। **बुद्धयै** इत्यादि-नन्विकारोकारमात्रा-पेक्षत्वेनान्तरङ्गत्वात् पूर्वमेव एदोतौ स्याताम्, न दायाद्यादेशाः, तेषां स्त्रीत्वविशिष्टेकारोकारापेक्षत्वेन बहिरङ्गत्वात्, कृतयोरप्येदोतोरिकारोकाराभावाद् वर्णविधित्वाच्च स्थानित्वाभावाद् दै-दासाद्यादेशाभावात् प्रतिषेधो न युक्तः, न च तदन्तादादेशविधानाद् अवर्णविधित्वात् स्थानित्वम्, अप्रधानेऽपि वर्णविधिप्रतिषेधात्, एवं तर्हि अनवकाशत्वात् पूर्वं दैप्रभृतय आदेशाः प्रवर्तन्ते पश्चाददितीति प्रतिषेधः, तथापि इदुत्संनिपातेन जायमानत्वाद् दै-दासाद्यादेशेनैव एदोद्बाधो भविष्यतीत्यदितीति प्रतिषेधो व्यर्थः, यद्येवं यत्वमपि न प्राप्नोति, तस्माददितीति प्रतिषेधो वर्णविधावयं न्यायो नोपतिष्ठत इति ज्ञापनार्थः, तेन दै-दासादिषु कृतेषु एदोतौ न भवतः, यत्वं तु भवति ।।२३।।

*** ला.सू. सम्पादितपुस्तके 'पुं-स्त्रीविशेष...' इति पाठो वर्तते।**

टः पुंसि ना ।१।४।२४।।

बृ०न्यास—**टः पुंसी**त्यादि। अत्र **ट** इति तृतीयैकवचनस्य स्थानित्वेनोपादानादिदुत इति षष्ठ्यन्तमपि अर्थवशात् पञ्चम्य-न्तमित्याह—**इदुदन्तादि**ति। **अमुने**ति-अदसष्टायाम् "आ द्वेरः" (२.१.४१) इत्यत्वेऽकारस्य लुकि "मोऽवर्णस्य" (२.१.४५) इति मत्वे "मादुवर्णोऽनु" (२.१.४७) इति उत्वे चानेन नाऽऽदेशः। अथात्रात्वादौ कृते उत्वविधेरन्विति वचनात् पूर्वमिनादेशेन भाव्यमित्यत आह-**अत्रे**त्यादि। **बुद्ध्या, धेन्वा,** इति-पुंसीति वचनादत्र न भवति। **कथमि**ति-अदस्शब्दात् तृतीयैकवचनेऽत्वादौ पुंसीति वचनान्नपुंसके नादेशाभावे कथममुना इति रूपमित्यर्थः। समाधत्ते-**अनामि**त्यादि ।।२४।।

ङिर्ङौ ।१।४।२५।।

बृ०न्यास—**ङिर्ङौ**विति। अथ कस्माद् **ङि**रित्ययमभेदनिर्देशो यावता स्थानिन एकवर्णत्वादन्त्याभावात् स्थानषष्ठ्या भेद-निर्देशेऽपि न किञ्चिद् विनङ्क्ष्यति, नैवम्-भेदनिर्देशे हि ङेरिति रूपस्य साम्याच्चतुर्थ्येकवचनस्यापि प्रतिपत्तिः स्यादित्याह-**अभेदनिर्देश** इत्यादि। डकारस्याप्रयोगिणः प्रयोजनमाह—**डकार** इत्यादि। **बुद्ध्याम्, धेन्वाम्,** इति-यद्यत्रादितीति नानुवर्तेत तदा दामादेशस्य स्थानित्वे तदव्यतिरेकात् तत्रापि स्यादित्यर्थः, यद्वाऽभेदनिर्देशस्याविकृतार्थत्वाद् विकृतस्य ङेर्न भवति ।।२५।।

ल.न्यास—**ङिर्ङौ**विति। **बुद्ध्या**मिति-ननु दाम्करणसामर्थ्यादेव ङौर्न स्यात्, किं व्यावृत्तावदितीति दर्शनेन? न-"ङित्यदिति" (१.४.२३) इत्येत्वनिषेधकत्वेन तस्य चरितार्थत्वाद् ङौः स्यादिति व्यावृत्तिः सफला, यथा "इश्च स्था-दः" (४.३.४१) इत्यत्र सिच्लोपविधायकत्वेन ह्रस्वकरणस्य चरितार्थत्वे गुणबाधकं कित्करणम्, किञ्च, यथासंख्यार्थं "स्त्रिया ङिताम्०" (१.४.२८) इत्यत्र दाम्ग्रहणं कार्यम्, अन्यथा इदं सूत्रमन्यथा उत्तरं चान्यथा कार्यं स्यात्, तथा च गरीयसी रचना स्यादिति ।।२५।।

केवलसखि-पतेरौः ।१।४।२६।।

बृ०न्यास—**केवले**त्यादि-अत्र समाहारद्वन्द्वाद् ङसिः। इदुत इत्यनुवृत्तावपि अनयोरुकारान्तत्वायोगाद् इदेव विशेषणमित्याह **-इदन्ताभ्यामि**ति। **सख्यौ, पत्यौ,** इति-पूर्वस्य डौभावस्यापवादोऽनेन ङेरौकारः। ननु पतिशब्दात् केवलादपि ङेर्ङौरपि भवति, प्रयुज्यते च-"क्लीबे च पतिते पतौ" () इति, तत् कथमेतदित्याह-**पतौ** इति। **कश्चि**दित्येकवचननिर्देशोऽवज्ञार्थ इति। नन्वनयोरिकारान्तत्वेन व्यभिचाराभावादिदुदन्ताभ्यामिति विशेषणमनर्थकम्, यत्रापि क्यन्नादौ दीर्घोऽस्ति तत्रापि स्वरूपान्यथात्वान्न भविष्यति, नैवम्-तत्रैकदेशविकृतस्य तद्वद्भावात् स्यादित्याह-**इत** इत्यादि। **प्रियसखौ** इत्यादि-एतेष्वनयोः केवलग्रहणादन्यसहितयोरनेनौकाराभावात् पूर्वेणैव डौभावे "डित्यन्त्यस्वरादेः" (२.१.११४) इत्यन्त्यस्वरादिलोपः। **अन्ये त्वि**ति-आचार्य***पाणिनि***प्रभृतयः, ते हि धिसंज्ञाप्रस्तावे "पतिः समास एव" (पा० १.४.८) इति नियम्य बहुप्रत्ययपूर्वस्य पतिशब्दस्य समासाभावे धिसंज्ञाया अभावात् ततो विधीयमानो 'ङौ' इत्यादेशो न भवतीति 'बहुपत्यौ' इत्येव स्यादित्याह- **तन्मत** इति ।।२६।।

ल.न्यास—**केवले**त्यादि। **कश्चि**दिति-***दुर्गासिंहश्रुतपाला***दिः। **सख्यि** इति-अत्र "स्यानीवावर्णविधौ" (७.४.१०९) इति न्यायात् क्विपः स्थानित्वे सति "व्योः प्वय्०" (४.४.१२१) इति यलोपः कस्मान्न भवति? ※ असिद्धं बहिरङ्गम्० ※ इति न्यायात् अन्तरङ्गे क्विबाश्रिते कार्ये यत्वमसिद्धं द्रष्टव्यम्। **अन्ये त्वि**ति-***शाकटायना***दयः ।।२६।।

न ना ङिदेत् ।१।४।२७।।

***बृ०न्यास*—न ने**त्यादि। प्रतिषेधस्य प्राप्तिपूर्वकत्वात् सर्वत्र प्रतिषेधे तद्विधानवैयर्थ्यप्रसङ्गाद्, अन्यस्य निष्प्रमाणकत्वाद्, अनन्तरोक्तस्य केवलसखि-पतेरित्यस्यैव ग्रहणमित्याह–**केवलसखि पतेरि**ति। सखि-पतिशब्दाभ्यां टायां ङिति चानेन नादेशस्य ङिदेकारस्य च प्रतिषेधे यत्वादौ **सख्या, (पत्या)** इत्यादि भवति। **आगतं स्वं चे**ति पञ्चमी-षष्ठ्येकवचनयो रूपस्य समानत्वात् तद्व्यक्त्यर्थमनुप्रयोगः। ङिदित्येतो विशेषणाभावात् सर्वप्रत्ययेऽप्येकारस्य प्रतिषेधः स्याद् विशेषाभावादित्याह–**ङिदितीति**। मतान्तरमुपन्यस्यति—**बहुप्रत्ययपूर्वे**त्यादि ।।२७।।

***ल.न्यास*–न ना ङीत्या**दे। सखि-पतेर्ना-ङिदेता सह न यथासंख्यं "खि-ति-खी-ती०" (१.४.३६) इति सूत्रे खिग्रहणात् "सख्युरितो०" (१.४.८३) इति निर्देशाद् वा। **सख्यावि**ति-अत्रादेशे कृते "ङित्यादिति" (१.४.२३) इति प्राप्नोति, न तु पूर्वम्, यतस्तद्बाधकं "ङिङौ" (१.४.२५) ततोऽपि "केवलसखि०" (१.४.२६) इति औत्वम्, ततः ≍तदादेश≍ इति न्यायात् स्यादित्वे सति एत्वं प्राप्तं निषिद्धम्।।२७।।

स्त्रिया ङितां वा दै-दास्-दास्-दाम् ।१।४।२८।।

बृ०न्यास*—स्त्रिया** इत्यादि। **स्त्रिया** इति विशेषणस्य विशेष्यसापेक्षत्वात् सखि-पति(शब्दा)भ्यां परेषां ङितां "खि-ति-खी-तीय उर्" (१.४.३६) इत्येवमादिभिर्विशेषविधिभिराघ्रातत्वात् दित्करणस्य तु प्रयोजनवत्त्वात् सामान्यमिदुदन्तमधिकृतं निमित्तं गम्यत इत्याह–**इदुदन्ताच्छब्दादि**ति। इह षष्ठीमन्तरेण तत्सम्बन्धिविज्ञानाभावात् सामान्यमवगम्यत इत्युक्तम्–**तत्सम्बन्धिनामन्यसम्बन्धिनां चे**ति। दकारस्याप्रयोगिणः प्रयोजनमाह–**दकार** इत्यादि। (**मुष्ट्यै** इत्यादि–) "मुषश् स्तेये" इत्यतः क्तौ "तेर्ग्रहादिभ्यः" (४.४.३३) इति नियमादिडभावे "तवर्गस्य०" (१.३.६०) इति टत्वे मुष्टिः। "इषत् इच्छायाम्" अतः "पृ-का-हृषि-धृषीषि०" (उणा० ७२९) इति किदुप्रत्यये इषुः। "शुच शोके" अतो "नाम्युपान्त्य०" (उणा० ६०९) इति किदिप्रत्यये शुचिः। "पट गतौ" अतो "भृ-मृ-तृ-त्सरि०" (उणा० ७१६) इत्युप्रत्यये पटुः। "अशश् भोजने" अतः "सदि-वृत्यमि०" (उणा० ६८०) इत्यनिप्रत्यये ऽशनिः। "शक्लृट् शक्तौ" अतः "कृपि-शकिभ्यामटिः" (उणा० ६३०) इत्यटि प्रत्यये ततः शकटिमतिक्रान्ताऽतिक्रान्तो वेति विग्रहेऽतिशकटिः। **एष्वि**ति-अयमर्थः–इदुदन्तानां समासावयवानां पत्यादिशब्दानां दै-दासादिकार्यनिमित्तानां स्त्रीत्वमस्तीति स्त्रीदुदन्तादादेशा इति। केचित् तु पूर्वं पश्चादपि स्त्रीवचन एवेच्छन्तीत्याह–**अन्ये त्वि**त्यादि–अत्र तु 'अन्ये' इति (बहु)वचनाच्छास्त्रकर्तुरपि सम्मतम्, कथं तत् सिध्यतीति चेत्? उच्यते–वक्ष्यमाणसूत्रात् स्त्रीति विच्छेदात्, ततोऽयमर्थः–इदुदन्तात् स्त्रियां वर्तमानादादेशा भवन्ति, स्त्री चेदभिधेया भवति। 'स्त्रियाः' इत्यर्थान्तरसंक्रान्तेः पूर्वं स्त्रात्वम्, 'स्त्री चेद्' अनेन संक्रान्तेः पश्चादिति। अन्ये त्वस्त्रीवचन एवेच्छन्ति, तन्मतस्य च ***भाष्यकृदादिविरुद्धतयाऽपास्यत्वादेकवचनेन निर्दिशति–**अन्यस्त्वि**ति ।।२८।।

ल.न्यास*–स्त्रिया ङितामि**त्यादि। "पत्युर्नः" (२.४.४८) इति निर्देशात् सखि-पती नानुवर्तेते, **स्त्रिया** इति विशेषणस्य विशेष्यसापेक्षत्वात् सखि-पतिभ्यां परेषां ङितां "खितिखीतीय उर्" (१.४.३६) इत्येवमादिभिर्विशेषविधिभिराघ्रातत्वाद् दित्करणस्य तु प्रयोजनवत्त्वात् सामान्यमिदुदन्तमधिकृतं गम्यत इत्याह–**इदुदन्ताच्छब्दा**दिति। 'कन्यापत्यै' इत्यादौ नपुंसके तु परत्वान्नागमे कन्यापतिनः कुलस्य "वाऽन्यतः०" (१.४.६२) इति कन्यापत्याः, कन्यापतेर्वा। **अन्ये त्वि**ति–**चन्द्रेन्दुगोमि**प्रभृतयः। **अन्यस्त्वि**ति-क्षीरस्वामी***। **मुनय** इति-अत्र पुंस्त्रीत्वेऽपि पुंस्त्वमेव विवक्षितम् ।।२८।।

स्त्रीदूतः ।१।४।२९।।

***बृ०न्यास*—स्त्रीदूत** इति-ईङ्च ऊङ्च ईदूत्, स्त्रियामीदूत् स्त्रीदूत्, ततो ङसिः, यद्येवं कृत्स्त्रियां धातुस्त्रियां च न सिद्ध्यति-तन्त्र्यै, लक्ष्म्यै, श्रियै, भ्रुवै, नहि तयोरीकारोकारौ स्त्रियां विहितौ यथा ङ्यूङौ, तथाहि–"तन्त्रिण् कुटुम्बधारणे" अतः "तॄ-स्तॄ-तन्द्रि

-तन्त्र्यविभ्य ईः" (उणा० ७११) इति ईप्रत्यये तन्त्रीः, "लक्षीण् दर्शना-ऽङ्कयोः" इत्यस्माद् "लक्षेर्मोऽन्तश्च" (उणा० ७१५) इती-प्रत्यये मागमे च लक्ष्मीः, तथा "श्रिग् सेवायाम्" अतः "दिद्युद्दृङ्गम०" (५.२.८३) इति निपातनात् क्विपि दीर्घत्वे श्रीः, "भ्रमूच् अनवस्थाने" अतो "भ्रमि-गमि-तनिभ्यो डित्" (उणा० ८४३) इति डित्यूकारे भ्रूः; अथैतत्पक्षोक्तदोषपरिजिहीर्षया स्त्रियावीदूतौ यस्य तत् स्त्रीदूदिति बहुव्रीहिः, अत्रापि स एव दोषः, समुदायस्यैव स्त्र्यर्थत्वान्नावयवस्येति, उच्यते-उभयथाऽप्यदोषः, तत्र पूर्वस्मिन् पक्षे ईकारान्तादूकारान्तात् स्त्रियां वर्तमानादित्युच्यमाने तन्त्र्यादिशब्देभ्योऽपि कृद्धात्वीकारान्तोकारान्तेभ्यः स्त्रियां वर्तमानत्वात् प्राप्नोतीति, द्वितीयेऽपि पक्षे समुदायधर्मस्यावयवेऽप्यारोपात् कृत्स्त्रिया अपि सिद्ध्यतीत्युदाहरति–**लक्ष्म्यै** इत्यादि। **एवमि**ति–"बृहु शब्दे च" अतः "बृंहेर्नोऽङ्च" (उणा० ९१३) इति मनि नकारस्याकारे च ब्रह्मन्, बध्नातेः "भृ-मृ-तॄ-त्सरि०" (उणा० ७१६) इत्युकारे बन्धुः, ब्रह्मा बन्धुरस्याः "उतोऽप्राणिन०" (२.४.७३) इत्यूङि ब्रह्मबन्धूः, वर्षन्ति मेघा आस्विति भिदादित्वादङि आपि च वर्षाः, तासु भवतीति भवतेः क्विपि वर्षाभूः। **स्त्रिया इत्यनुवर्तमान** इति-स्त्रिया इति वर्तते स्त्रीविषयार्थम्, पुनः स्त्रीग्रहणाच्च स्त्रीविषयावेव यौ स्त्रीदूतौ ततः कार्यम्, तेन **'ग्रामण्ये सेनान्ये स्त्रियै'** इत्यत्र न भवति, ग्रामण्यादिशब्दो हि क्रियाशब्दत्वात् त्रिलिङ्गत्वान्नित्यस्त्री-विषयो न भवतीति स्त्रियामपि वर्तमानादादेशाभावः। पूर्वसूत्रे इष्वशनिप्रभृतीनामनेकलिङ्गानां पट्वादीनां गुणवचनत्वात् सर्वलिङ्गानां स्त्रीविषयत्वाभावात् स्त्रिया वृत्तौ कार्यं प्रवर्तत इति, नहि तत्र द्वितीयं स्त्रीग्रहणमस्ति। ननु आधी-प्रधीशब्दौ क्रियाशब्दत्वात् सर्व-लिङ्गत्वाद् ग्रामण्यादिशब्दवन्न नित्यस्त्रीविषयाविति चिन्त्यमेतदिति*, प्रथमग्रहणं च कर्तव्यम्, तथाहि–यः शब्दः प्रथमं स्त्रीत्वविशिष्ट-मर्थमाह पश्चात् प्रकारान्तरेणार्थान्तरं लिङ्गान्तरयुक्तं तस्य तदानीमस्त्र्यर्थत्वात् ततो न प्राप्नोतीतीदं वचनं विधेयम्, प्रयोजनं च क्विप्लुगभेदोपचार-समासाः, क्विप्लुक् यथा–कुमार्यै ब्राह्मणाय, अभेदोपचारो यथा–खरकुट्यै ब्राह्मणाय, यद्यप्यत्र स्वाभाविकं स्त्री-त्वमस्ति तथापि स्वाश्रयस्य स्त्रीत्वस्य निवर्तनान्नायं स्त्रियामेव वर्तते किन्तु पुंस्यपीति, समासो यथा–अतितन्र्यै ब्राह्मणायेत्यादि; न विधेयम्-अवयवस्त्रीविषयत्वेन सिद्धत्वात्, तत्र ह्यन्तरङ्गत्वात् पूर्वमेव प्रवृत्तं स्त्रीत्वमवयवस्य पश्चादुपजायमानेन लिङ्गान्तरसम्बन्धेन न निवर्त्यते; यद्येवम् 'आमलकाय, अतिकुरवे, अतिकुमारये' अत्रापि प्राप्नोति, अवयवस्य पूर्वं स्त्रीवृत्तित्वात्, तथाहि–आमलकीशब्दात् षष्ठ्यन्तात् आमलक्याः फलं विकारोऽवयवो वेति "दोरप्राणिनः" (६.२.४९) इति मयट्, तस्य "फले०" (६.२.५८) इति लुप्, ततो "ङ्यादेर्गौण" (२.४.९५) .इत्यादिना ङीलुक्, ततश्चतुर्थी, आमलक्याः फलायेति तु प्रक्रिया दर्शितेति, अत्रामलकीलक्षणस्त्र्यर्थोऽ-स्ति; तथा कुरूमतिक्रान्ताय, कुमारीमतिक्रान्ताय, इति प्रादिसमासे "गोश्चान्ते०" (२.४.९६) इति ह्रस्वत्वं ततश्चतुर्थी, अत्रापि पूर्वस्त्र्यर्थोऽस्ति, अथोच्यते-सत्यपि स्त्र्यर्थत्वे ईकारोकारान्तत्वाभावान्न भवतीति। तत्र लुक्-ह्रस्व-स्थानिवद्भाव-ईदूदन्तता भविष्यत्यत आह–**अत्रे**त्यादि ।।२९।।

***ल.न्यास*–स्त्रीदूत** इति। **(ग्रामण्ये) स्त्रियै** इति-ग्रामण्यादिशब्दो हि क्रियाशब्दत्वात् त्रिलिङ्गत्वात् नित्यस्त्रीविषयो न भवतीति स्त्रियामपि वर्तमानादादेशाभावः। **आमलक्या** इति–आमलकाद् उणादिप्रत्ययान्तात् ङ्याम् आमलकी वृक्षवाची ध्वनिः, यद्वा आमलकस्य फलस्य विकारो वृक्षः, दुसंज्ञकस्य मयटो यदा बाहुलकाल्लुप् गौरादित्वाद् ङीः, तदापि आमलकीशब्दस्तरुवाची। **वर्णविधित्वेने**ति-ईकारोकारौ वर्णौ तदाश्रिता दायादयः ।।२९।।

वेयुवोऽस्त्रियाः ।१।४।३०।।

***बृ०न्यास*–वेयुव** इत्यादि। **इयुवः** इय् च उव् च इयुव्, ततो ङस्, तत्र स्त्रीदूत इति प्रकृतस्य इयुव्रूपतानुपपत्तेरियुव इति षष्ठी स्त्रीदूत इति पञ्चम्या भेदेनाभिसम्बध्यत इत्याह–**इयुवोः सम्बन्धिनौ यौ स्त्रीदूतौ तदन्तादिति**। पूर्वेण नित्यं दैप्रभृत्यादेशः

---

* **चिन्ताबीजं तु आध्यायतीति विग्रहे क्विपि सति ग्रामण्यादिशब्दवन्नित्यस्त्रीविषयाभावः; परन्तु आ-इषत् प्रकृष्टा वा धीर्यस्या इति विग्रहे सुतरां तयोर्नित्यस्त्रीवीषयत्वमिति विषमो दृष्टान्तोपन्यासः।**

प्राप्तोऽनेन विकल्प्यत इति प्राप्तविकल्पोऽवगन्तव्य इति। अस्त्रिया इत्यत्र स्त्रीतिशब्दप्रधानो निर्देश इत्याह-**अस्त्रिया** इत्यादि। **धियै** इति-"ध्यै चिन्तायाम्" अतः "दिद्युदद्दृज्झगज्झुहू०" (५.२.८३) इति निपातनात् क्विपि धी, ततो ङितामनेन पक्षे दायाद्यादेशे "धातोरिवर्णोवर्णस्य०" (२.१.५०) इति इयादेशः। तत्र (**भुवै** इति-) भवतेः क्विपि भू, शेषं पूर्ववत्। (**पृथुश्रियै** इति-) "प्रथिष् प्रख्याने" अतः "राम-प्रथिभ्यामृच्च रस्य" (उणा० ७३०) इति किदुप्रत्यये रेफस्य ऋत्वे पृथु। **आध्यै, प्रध्यै** इत्यादि-एतेषु "धातोरिर्वणोवर्णस्य०" (२.१.५०) इति इयुवपवादौ "क्विब्वृत्ते०" (२.१.५८) इति "दृन्पुनर्वषाकारै०" (२.१.५९) इति च यकार-वकारौ भवत इति नेयुव्-सम्बन्धिनावीदूताविति पूर्वेण नित्यमेव कार्यमिति। ननु चाध्यै प्रध्यै इति यद्यपि यकारेण इयादेशो बाध्यते तथापि 'धियौ, धियः' इत्यादावियुभावादियुसम्बन्धी ईकार इति शक्यं व्यपदेष्टुम् उच्यते-भेदाश्रयणाददोषः, यदाऽस्य स्थाने इयादिर्भवति तदासावियादेरीदादिः, न चान्यस्मिन् भवत्यसावियादेरीदादिस्तयोरभेदप्रसङ्गादिति विकल्पो न भवति। यवान् क्रीणाति क्विपि, कटेन प्रवत इति "दिद्युदद्दृ०" (५.२.८३) इति क्विपि निपातनाच्च यवक्री, कटप्रू, ततश्चतुर्थ्येकवचने इयादेशे स्त्रीदूत इति वचनाद् दै-दासाद्यभावे **यवक्रिये, कटप्रुवे**। ननु 'स्त्रियै' इत्यादौ असत्यप्यनेन विकल्पे कथं पूर्वेण नित्यमादेशः? यतः परत्वादियुवादिभावादीदन्तत्वाभावादप्रवृत्तिरेवेत्याह —**अस्त्रिया** इत्यादि ।।३०।।

ल.न्यास—**वेयुव** इत्यादि। **नित्यमपी**ति-कोऽर्थः-तन्मते "स्त्रीदूतः" इत्यत्रापि समासार्थस्य स्त्रीत्व एव भवति। **आध्यै (प्रध्यै)** आध्यायति प्रध्यायति आदधाति प्रदधाति इत्येवंशीलाया बुद्धेर्वाचकौ वर्षाभूवद् नित्यस्त्रीलिङ्गौ आधी-प्रधीशब्दौ, क्रियाशब्दत्वेन सर्वलिङ्गत्वाद् ग्रामण्यादिशब्दवन्नित्यस्त्रीविषयौ नेति चिन्त्यमेतदित्येके ।।३०।।

आमो नाम् वा ।१।४।३१।।

बृ०न्यास—**आम** इत्यादि। अत्र ङिस्थानस्य सानुबन्धत्वादपरस्य चासम्भवात् स्याद्यधिकाराच्च षष्ठीबहुवचनस्यैवामो ग्रहणमित्याह-**आमः षष्ठीबहुवचनस्ये**ति। श्रीशब्दान्नाम् (प्रत्यन्तरे श्रीशब्दान्नाम) छन्दस्येवेति वृद्ध्या येच्चन्द्रः (?) (***वृद्धाः***, ***यच्चन्द्रः***-) श्रियाम्, श्रीणाम् इति तु व्यवस्थितविभाषया छन्दस्येव। अथ किमर्थमिदं यावतोत्तरसूत्रेणैवामो नाम् सिद्ध एवेत्याह-**उत्तरेणे**त्यादि ।।३१।।

ल.न्यास—**आमो नाम् वे**ति। **षष्ठीबहुवचन**स्येति-अत्र ङिस्थानिकस्य सानुबन्धत्वादपरस्य चासम्भवात् स्याद्यधिकाराच्च षष्ठीबहुवचनस्यैवामो ग्रहणम् ।।३१।।

ह्रस्वाऽऽपश्च ।१।४।३२।।

बृ०न्यास—**ह्रस्वे**त्यादि। अथ 'श्रीणाम्, श्रियाम्' इत्यत्राप्यनेन परत्वान्नित्यं नामादेशः कुतो न भवति? सत्यमित्यत आह -**स्त्रीशब्दवर्जितयोरि**त्यादि-विशेषविहितत्वेनापवादत्वादिति शेषः। सोमं पिबतीति विचि सेनां नयतीति क्विपि ततः षष्ठ्यामामि "ह्रस्वापश्च" (१.४.३२) इति वचनान्नामादेशाभावे "लुगातोऽनापः" (२.१.११७) इति "क्विब्वृत्तेरसुधियस्तौ" (२.३.५८) इति च कृते **सोमपाम्, सेनान्याम्,** इति ।।३२।।

ल.न्यास—**ह्रस्वे**त्यादि। **पूर्वेण विकल्प एवे**ति इयुवस्थानित्वेन विशेषविहितत्वादिति शेषः ।।३२।।

संख्यानां र्ण्णाम् ।१।४।३३।।

बृ०न्यास—**संख्यानामि**त्यादि। रश्च षश्च नश्च र्ण्णस्तेषां **र्ण्णामि**ति शब्दनिर्देशः, **संख्यानामि**ति त्वर्थनिर्देशः, सङ्ख्या ह्येकत्वादिरर्थः, तत्र शब्दार्थयोः सामानाधिकरण्याभावादुपचारात् सङ्ख्यार्थाः शब्दाः सङ्ख्यापदेनाऽऽश्रीयन्ते; अथवा संख्यायते

आभिरिति "उपसर्गादातः" (५.३.११०) इति करणे "करणा-ऽऽधारे" (५.३.१२९) इति परमप्यनटं बाधित्वा बहु(ल)वचनादङि आपि च सङ्ख्या, (इति संख्याशब्देन) एकादयः शब्दा एवोच्यन्त इत्याह–**सङ्ख्यावाचिनां शब्दानामिति**। चतुर्शब्दादनेनामो नामादेशे "रषृवर्णा०" (२.३.६३) इति यथासम्भवं णत्वे "र्हादर्हस्वरस्य०" (१.३.३१) इति च द्विर्भावे **चतुर्ण्णाम्,** एवम्-पञ्चन्-सप्तन्शब्दाभ्यामामो नामादेशे "दीर्घो नाम्यतिसृ०" (१.४.४७) इति दीर्घत्वे नलोपे **पञ्चानाम्, सप्तानामिति**। **प्रियचतुराम्** इत्यादि-प्रियाश्चत्वारो येषामित्यादि विगृह्य ष्र्णामिति षष्ठ्यास्तत्सम्बन्धिविज्ञानादन्यपदार्थसम्बन्धित्वादामो नामादेशाभावः। **प्रियपञ्चाम्** इत्यत्र तु आमि "अनोऽस्य" (२.१.१०८) इत्यकारलोपे "तवर्ग०" (१.३.६०) इति नकारस्य ञकारः। ननु त्रिंशदादयः शब्दाः सङ्ख्येयेष्वपि वर्तमाना आरोपितसङ्ख्याभावेष्वेव वर्तन्त इति तत्राप्येकवचनान्ता एव भवितुमर्हन्ति, कथं बहुवचनान्ताः? एकशेषात्, तथाहि-त्रिशब्दाद् दशदर्थे वर्तमानात् "विंशत्यादयः" (६.४.१७३) इति निपातनात् शत्प्रत्यये त्रिशब्दस्य त्रिम्भावे च त्रिंशत्, ततः त्रिंशच्च त्रिंशच्च त्रिंशच्च त्रिंशतस्तासां **त्रिंशताम्,** एवम्–**चत्वारिंशताम्** इति। अथाष्टन्-शब्दादामि परत्वात् "वाऽष्टन आः स्यादौ" (१.४.५२) इत्याकारे नान्तत्वाभावात् कथं नाम्भावोऽत आह–**बहुवचनमिति** ।।३३।।

***ल.न्यास*–संख्यानामित्यादि**। र् च ष् च न् च तेषां **ष्र्णाम्,** "तवर्गस्य०" (१.३.६०) इति णत्वम्, "रषृवर्ण०" (२.३.६३) इति तु न एकपदत्वाभावात्, "वोत्तरपदान्त०" (२.३.७५) इत्यपि न, यतः षकारो न पूर्वपदस्थः किन्तु मध्यमपदस्थः, तर्हि रेफः पूर्वपदस्थोऽस्ति तदपेक्षया णत्वं भवतु, न-"पदेऽन्तरे०" (२.३.९३) इति निषेधात्। ननु ष्र्णामिति शब्दनिर्देशः, संख्या चैकत्वादिरर्थः, ततः शब्दा-ऽर्थयोः सामानाधिकरण्यं न संगच्छते, सत्यम्-उपचारात् सङ्ख्यार्थाः शब्दाः संख्याशब्देनाभिधीयन्ते; यद्वा संख्यायते आभिरिति "उपसर्गादातः" (५.३.११०) इति "करणा-ऽऽधारे" (५.३.१२९) इति परमप्यनटं बाधित्वा बहुलवचनादङि आपि च संख्याशब्देनैकादयः शब्दा एवोच्यन्ते इति। **त्रिंशतामिति**-ननु च त्रिंशदादयः शब्दाः संख्येयेष्वपि वर्तमानाः "विंशत्याद्याशतादु द्वन्द्वे" (लिङ्गानुशासन०-२.६) इति वचनात् एकत्वे एव वर्तन्त इत्यत्रैकवचनान्ता एव भवितुमर्हन्ति, कथं बहुवचनम्? सत्यम्-एकशेषात्-त्रिंशच्च त्रिंशच्च त्रिंशच्च त्रिंशतः। **अष्टानामिति**-अथाऽष्टन्शब्दादामि परत्वाद् "वाऽऽष्टन०" (१.४.५२) इत्याकारे नान्तत्वाभावात् कथं नाम्भावोऽत आह–**भूतपूर्वेति** ।।३३।।

त्रेस्त्रयः ।१।४।३४।।

***बृ०न्यास*–त्रेरित्यादि**। आम इति वर्तते, तदत्र त्रेरित्यस्य स्थानिनो विशेषणमित्याह–**आमः सम्बन्धिन** इत्यादि-आमः सम्बन्धित्वं च त्रेरर्थद्वारकम्, यस्मादामः सम्बन्धी त्रेरर्थस्ततः स आम इत्युच्यते। त्रिशब्दस्यामि अनेन त्रयादेशे "ह्रस्वापश्च" (१.४.३२) इति नामि णत्वे च **त्रयाणाम्।** विशेषणसमासे **परमत्रयाणाम्,** आमः सम्बन्धीति। **अतित्रीणाम्** इति प्रादिसमासः। **प्रियत्रीणाम्** इति बहुव्रीहिः। अथ तिसृणामिति स्त्रीलिङ्गेऽपि त्रयादेशसामग्र्या विद्यमानत्वात् त्रयादेशः कस्मात्र भवतीत्याह–**स्त्रियामित्यादि** ।।३४।।

***ल.न्यास*–त्रेस्त्रय इति**। **आमः सम्बन्धिन इति**–सम्बन्धस्योभयनिष्ठत्वात् आमः सम्बन्धिन इत्यपि युक्तम्, आमः सम्बन्धित्वं च त्रेरर्थद्वारकम्, यस्मादामः सम्बन्धी त्रेरर्थस्ततः स आम इत्युच्यते; आमः सम्बन्धीति कार्यकारणभावे षष्ठी, त्रिशब्दः कारणम्, आम् च कार्यम्, यतस्त्रिशब्दबहुत्वे आम् ।।३४।।

एदोद्भ्यां ङसि-ङसो रः ।१।४।३५।।

***बृ०न्यास*–एदोद्भ्यामित्यादि**। ※ व्याख्यानात् ※ "ङसेश्चाद्" (२.१.१९) इत्यादिज्ञापकाद्वा चतुर्थ्या वाक्यार्थस्याघटनात् तृतीयाद्यभावनिश्चये पञ्चम्येवेयमित्याह–**एदोद्भ्यां परयोरिति**। ननु वचनाभेदार्थमुभयत्र समाहारेतरेतरयोगौ कस्मात्र कृतौ? **नह्यसति** प्रयोजने वचनभेदो युक्त इत्याह–**वचनभेद** इत्यादि-अन्यथा निमित्त-निमित्तिनोः समानत्वादेकाराद् ङसेरोकाराच्च ङसो रेफ इति यथासंख्यं स्यादित्यर्थः ।।३५।।

ल.न्यास–**एदोद्भ्यामि**त्यादि। **एदोद्भ्यामि**ति-अत्र तकारः स्वरूपग्रहणार्थः, तेन लाक्षणिकयोरप्येदोतोः परिग्रहः–**परमेरि**ति–"आतो नेन्द्रवरुणस्य" (७.४.२९) इति ज्ञापकात् पूर्वं पूर्वोत्तरपदयोः कार्यम्, ततः सन्धिकार्यम्, अतः परमैरिति प्राप्नोति, नैवम्–*ज्ञापकज्ञापिता विधयो ह्यनित्याः* इति ।।३५।।

खि-ति-खी-तीय उर् ।१।४।३६।।

बृ०न्यास–**खि-ती**त्यादि। खि-ति-खी-त्यां यो यकार इति द्वन्द्वगर्भतत्पुरुषात् पञ्चम्या रूपम्–**खि-ति-खी-तीय** इति। एतेभ्यः परस्य यकारस्य ङसि-ङसोः परतोऽसम्भवाद् "इवर्णादे०" (१.२.२१) इति विहितस्यैव यकारस्य ग्रहणमित्याह–**खि-ति-खी-तीसम्बन्धिन इवर्णस्थानादि**ति। न च सखायं यातीत्यप्रयोगिणि (विच्प्रभृतौ) प्रत्यये कृते "लुगातोऽनापः" (२.१.१०७) इत्याकारलोपे सम्भवतीति वाच्यम्, प्रयुक्तानामन्वाख्यानात् तेषां च प्रयोगासम्भवात् तदभावः, खी-तीभ्यां तु कल्पनानिर्मितस्यासम्भव एव। यद्येवं लाघवार्थं 'ख्य-त्य उर्' इत्येवं किं न कृतम्? एवं च सति खिशब्द-खीशब्दयोस्तिशब्द-तीशब्दयोः लघुस्पष्टप्रतिपत्तिर्भवति, नैवम्–एवं सति सुतरां सन्देहः स्यात्, तथाहि-मुख्य-सख्य-गार्हपत्य-पौरोहित्य-सत्या-ऽपत्यादीनां यौ ख्य-त्यशब्दौ तयोर्ग्रहणं कस्मान्न विज्ञायते? "सख्युरितोऽशावैत्" (१.४.८३) "पत्युर्नः" (२.४.४८) इति ज्ञापकान्न भविष्यतीति चेत्? सौत्रावेतौ निर्देशाविति मन्द-धीर्मन्यते, गरीयांसश्च ज्ञापकोपन्यासः। खीशब्दस्तीशब्दश्च द्विविधः–कौचित् खितिशब्दयोरीकारे कृते, कौचित् ख-तशब्दयोः, तत्र पूर्वयोः *एकदेशविकृतमनन्यवद्* इति खि-तिग्रहणेनैव ग्रहणात्, तत्र खी-ती-ग्रहणं नार्थवत्, किं तर्हि उत्तरयोरत आह–**सह खेन वर्तत** इत्यादि। खनेः "क्वचित्" (५.१.१७१) इति डे खम्, सह खेन वर्तते "सहस्य सोऽन्यार्थे" (३.२.१४३) इति सभावे तमिच्छति "अमाव्ययात् क्यन् च" (३.४.२३) इति क्यनि "क्यनि" (४.३.११२) इति ईत्वे, अन्यत्र "दीर्घश्चियङ्०" (४.३.१०८) इति दीर्घत्वे क्विपि "अतः" (४.३.८२) इत्याकारलोपे "व्योः प्वय्व्यञ्जने लुक्" (४.४.१२१) इति यलोपे सखी, एवम्–पती, "योऽनेकस्वरस्य" (२.१.५६) इति यत्वेऽनेन उर्त्वे **सख्युः, पत्युः**, षष्ठ्यां पञ्चम्यां च साधारणं रूपम्। **तथे**त्यादि-सखि-पतिशब्दयोरेव केचिदिच्छन्ति, यद् ***रत्नमतिः***-'सख्युः, पत्युः' इत्येतावन्मात्रमेवास्य सूत्रस्य लक्ष्यम्, न ***चूर्णिकारो***पवर्णितमपि लुन्युरित्यादि लक्ष्यान्तरम् ; तथाऽन्येनाप्युक्तम्–क्रीत प्रीत-श्रीत-पूतादीनां क्यनादिषु तीशब्दः श्रूयमाण एव सम्भवति, तस्मात् तु कृतयादेशाद् उर्त्वं *कस्मादुदाहृतम्? क्रीत्युरागच्छति, क्रीत्युः स्वमिति, केचिदाहुः–तत्र नेष्यते त्यादुत्तरस्योर्त्वम्, क्रीत्य आगच्छति, क्रीत्यः स्वमिति हि तत्र भवितव्यम्; अन्ये त्वाहुः–पूर्वागमेषु तीशब्दस्य लूनीशब्दावयवस्य कृतयत्वादेशस्योदाहरणं दर्शितम्, न च सामान्येन सूत्रनिर्देशे विशेषाभ्युपगमो युक्त इति सर्वमुदाहरणम्, एतद् वैमत्यं चेतसि परिभाव्य 'तथा' इत्यनेनाभ्युपगमं दर्शयति; "सुख दुःखण् तत्क्रियायाम्" णिच्यणि(चि) च सुखम्, सनोतेः क्ते "आः खनि-सनि-जनः" (४.२.६०) इत्यात्वे सातम्, लुनातेः पुनातेश्च क्ते "ऋल्वादेः०" (४.२.६८) इति "पूदिव्यज्जे०" (४.२.७२) इति च क्तस्य नत्वे लूनः, पूनः, शेषं क्यन्नादि पूर्ववत्। पूजितः सखा अधिकः पतिः "पूजा-स्वतेः प्राक् टाद्" (७.३.७२) इति समासान्ताभावे ङसि-ङसोः "ङित्यदिति" (१.४.२३) इत्येत्वे "एदोद्भ्यां ङसि-ङसो रः" (१.४.३५) इति रत्वे विसृष्टे **(अतिसखेः, अधिपतेः)** 'उर्त्वं कस्मान्न भवन्त्यन्त तत्र भवो दिगादिदेहांशाद्य इति येऽवर्णेवर्णस्येत्यन्त्यलोपेव भवति (?)' **(मुख्यः, अपत्यः आगतः स्वं वे**ति–) "मह पूजायाम्" अतः "महेरुच्चास्य वा" (उणा० ८९) इति खप्रत्ययेऽन्तलोपेऽस्योत्वे मुखम्, तत्र भवः "दिगादि-देहांशाद् यः" (६.३.१२४) इति ये "अवर्णेवर्णस्य०" (१.२.६) इत्यन्तलोपे मुख्यः, न पतन्तीति "नञो हलि-पतेः" (उणा० ३५८) इति येऽपत्यम्, ततो णिचि विचि ङसौ च **मुख्यः, अपत्यः**, अस्ति ह्यत्र यकारः, खि-ति-खी-तीसम्बन्धी तु न भवति, तदभावादुर्त्वाभावः। **आगत**मिति पञ्चम्यभिव्यक्त्यर्थम्, **स्व**मिति षष्ठ्यभिव्यक्त्यर्थम्, एवमन्यत्रापि। **(सख्याः, पत्याः)** "नारी सखी पड्गू श्वश्रू" (२.४.७६) इति ङ्यन्तात् सखीशब्दात् पतिशब्दाच्च "स्त्रीदूतः" (१.४.२९) इति "स्त्रिया ङितां वा०"

* ला.सू. सम्पादितपुस्तके 'कस्मान्नोदाहृतम्?' इति पाठोऽस्ति।

(१.४.२८) इति दासादेशे यद्यपि खी-तिसम्बन्धी यशब्दोऽस्ति तथाप्यदितीत्यनुवृत्तेरुर्त्वाभावः, ङसीति (ङसि-ङस् इति) रूपाभावाद् वेति ।।३६।।

***ल.न्यास*–खि-तीत्यादि**। "षणूयी दाने" सनोति दत्ते परस्परं भोजनादिकमिति सखा, "सनेः डखिः" (उणा० ६२५) पाति अपायादिति "पातेर्वा" (उणा० ६५९) इति डतिः। **सात्युरिति**-सायते स्म दीयते स्म पुण्यैरिति सातम्, "सातिः सौत्रः सुखे" सातति वा। **मुख्य** इति-अत्र विचि कृते "व्योः प्वय्०" (४.४.१२१) इति यस्य लुग् न, यतः "स्वरस्य परे०" (७.४.११०) इति णिलोपः स्थानी, न च "न सन्धिः०" (१.३.५२) इत्यस्यावकाशः, ⁂नत्रा निर्दिष्टस्यानित्यत्वात्⁂, भवतु वाऽवकाशस्तदेदमुत्तरम्-"व्योः प्वय्०" (४.४.१२१) इति सूत्रे लुक् इति संज्ञा, ⁂संज्ञापूर्वको विधिरनित्यः⁂ यद्वा "क्वौ" (४.४.११९) इति सूत्रकरणात्-क्विप्-विचोर्व्यञ्जनकार्यमनित्यम्, न च वाच्यं कथं विच्यपि व्यञ्जनकार्यानित्यता, यतोऽप्रयोगिनामुपलक्षणः क्विप् ।।३६।।

ऋतो डुर् ।१।४।३७।।

बृ०न्यास*—ऋतो डुरिति**। **डुरिति** डकारो "डित्यन्त्यस्वरादेः" (२.१.११४) इति विशेषणार्थः। ऋकारलृकारयोरेकत्व-प्रतिज्ञानाद् लृकारादपि डुरादेशो भवति, तस्य च ऋफिडादिपाठात् लत्वम्, तेन कुल् लृकारः, यदाह ***तत्त्वदीपिकायामुपाध्यायः-'आप्लृ' इत्येतस्मात् षष्ठ्यामापुल् इत्येव भवति। **ग्र** इति-गृणातेरनुकरणात् पञ्चम्यां रेफे ग्र इति रूपम् ।।३७।।

***ल.न्यास*–ऋतो डुरिति**। ⁂ऋकारोपदिष्टं लृकारस्यापि⁂ तेन "ऋफिडा०" (४.४.११९) इति लत्वम्, कुल् लृकारः, यदाह **उपाध्यायः**-'आप्लृ' इत्येतस्मात् षष्ठ्यामापुल् इत्येव भवति ।।३७।।

तृ-स्वसृ-नप्तृ-नेष्टृ-त्वष्टृ-क्षत्तृ-होतृ-पोतृ-प्रशास्त्रो घुट्यार् ।१।४।३८।।

***बृ०न्यास*—तृ-स्वस्रित्यादि**। त्रादीनां समाहारद्वन्द्वात् षष्ठ्यां सौत्रो निर्देशः, अथवा सूत्रे साक्षादृकारो निर्दिश्यते, ततश्च तृ-स्वसृ-नप्तृ-नेष्टृ त्वष्टृ-क्षत्तृ-होतृ-पोतृ-प्रशास्तॄणां य ऋकारस्तस्य समानदीर्घत्वे षष्ठ्यां रत्वे रूपम्। ऋकारोपादानस्य चेदं फलम्-तृ इति प्रत्ययस्य ग्रहणम्, अन्यथा यतेः ऋप्रत्यये तॄरूपस्य सम्भवात् तस्यापि ग्रहणप्रसङ्गः, अत आह–**तॄन्-तृच्प्रत्ययान्तस्ये**ति-अत एव 'तॄन्-तृच्' इत्यनुबन्धनिर्देशः प्रत्ययाप्रत्ययसमुदायव्युदासार्थः, न तु तॄन्-तृचोर्ग्रहणार्थः, तृ इति प्रत्ययमात्रस्यात्र ग्रहणादिति, अत एव वक्ष्यति–**तृशब्दस्यार्थवत** इत्यादि। "डुकृंग् करणे" करोतीति "णकतृचौ" (५.१.४८) इति तृचि गुणे अमौजस्सु अनेना-रादेशे **कर्तार**मित्यादि-ओकारप्रत्यासत्त्यासत्त्यर्थं (औकारप्रत्यासत्त्यर्थं) च प्रथमं द्वितीयोदाहरणे ततः प्रथमोदाहरणे। तृच्-प्रत्ययाभि-व्यक्त्यर्थं **कटस्ये**ति, "कर्मणि कृतः" (२.२.८३) इति षष्ठी। "वद व्यक्तायां वाचि" वदतीत्येवंशीलः "तॄन् शील-धर्म-साधुषु" (५.२.२७) इति तॄनि "स्ताद्यशितो०" (४.४.३२) इतीटि पूर्ववद् **वदितार**मित्यादि। **जनापवादानि**ति तॄन्नभिव्यक्त्यर्थम्, "तॄन्नु-दन्ताव्यय०" (२.२.९०) इति षष्ठीप्रतिषेधात् द्वितीया। "असूच् क्षेपणे" सुपूर्वात् (अतः) "सोरसेः" (उणा० ८५३) इति **ऋ**प्रत्यये **स्वसृ**, अतोऽमौजस्सु अनेनारादेशे **स्वसारम्, स्वसारौ, स्वसार** इति, एवमुत्तरत्रापि। "णमं प्रह्वत्वे" अतः "नमेः प् च" (उणा० ८६२) इति तृप्रत्यये पादेशे **नप्तारम्**। "णींग् प्रापणे" अतः "नियः षादिः" (उणा० ८६४) इति षकारादितृप्रत्यये **नेष्टारम्**। "त्विषीं दीप्तौ" अतः "क्षद खदने" इति सौत्राच्च "त्वष्टृ-क्षत्तृ-दुहित्रादयः" (उणा० ८६५) इति तृप्रत्यये इकारस्याकारे एकत्र दकारस्य "अघोषे प्रथमोऽशिटः" (१.३.५०) इति प्रथमत्वे **त्वष्टारम्, क्षत्तारम्**। जुहोतेः "हु-पूद्गोत्री०" (उणा० ८६३) **इति** तृप्रत्यये **होतारम्**। पवतेः पुनातेर्वा पूर्वेण तृप्रत्यये गुणे च **पोतारम्**। प्रपूर्वात् "शासूक् अनुशिष्टौ" अतः "शासि-शंसी०" (उणा० ८५७) इति तृप्रत्यये **प्रशास्तारम्**। अन्ये तु त्वष्टृ-क्षत्तृ-होतृ-पोतॄन् ताच्छील्यादिषु निपातयन्ति, अत्र इडभावस्त्वस्मादेव निपातनात्।

अतत्सम्बन्धिन्युदाहरति-कर्तारमतिक्रान्तः "प्रात्यवपरि०" (३.१.४७) इत्यादिना तत्पुरुषेऽतिकर्तारम्, इत्यादि, अतिक्रान्तः कर्ता येनेति बहुव्रीहिर्न विधेयः, "ऋन्नित्यदितः" (७.३.१७१) इति कच्प्रसङ्गात्, तेन च व्यवधानात् प्राप्त्यभावात्। **(कर्ता)** कर्तृशब्दात् सावुभयं प्राप्नोति-अनेनारादेशः, "ऋदुशन०" (१.४.४) इति डादेशश्च, सावकाशं च तदुभयम्-कर्तारौ, पिता इति, अत्रोभयप्राप्तौ परत्वाद् डादेशो भवति, नाऽऽर्, बाधितत्वादिति। अथ नप्त्रादयः किं पृथगुपादीयन्ते? तत्र तृ इत्येव सिद्धमित्यत आह-**तृशब्दस्ये**-त्यादि-अयमर्थः-तृशब्दस्य ऋकारान्तत्वाव्यभिचारात् पुनर्ऋकार इति यद् विशेषणं तदृकारान्त एव य इति स्वरूपप्रतिपत्त्यर्थम्, यस्त्वधिकारापन्नः स स्थानिप्रत्यासत्त्यर्थोऽन्यथाऽनैकवर्णत्वात् सर्वस्य स्यात्, व्याकरणे च शब्दरूपवदर्थोऽप्याश्रीयते, अन्यथा च नप्त्रादिग्रहणमनर्थकं स्यात्, तेन ※ अर्थवतो ग्रहणे सम्भवति अनर्थकस्य ग्रहणं न भवति ※ स चार्थवान् प्रत्यय एवेति, यत्र त्वर्थो न सम्भवति तत्र वचनप्रामाण्यादनर्थकस्यापि ग्रहणं भवति, अत एव नप्त्रादीनामव्युत्पन्नानां प्रत्यस्तमितावयवार्थानां संज्ञाशब्दानां सम्बन्धिनस्तृशब्दस्य तृग्रहणेनानर्थकत्वाद् ग्रहणं न भवतीति तेषां पृथगुपादानं क्रियते। ननु नप्त्रादयोऽपि व्युत्पाद्यन्ते तत् कथमुच्यते-ऽव्युत्पन्नानामिति? अत्रोच्यते-उणादिषु दर्शनद्वयं केचिन्मन्यन्ते-"उणादयोऽव्युत्पन्नानि नामानि" इति, अपरे-"व्युत्पन्नानि" इति, लक्ष्यसिद्ध्यर्थं चेह क्वचित् किञ्चिद् दर्शनमाश्रीयते, तत्र यदा व्युत्पत्तिपक्ष आश्रीयते तदा नियमार्थं नप्त्रादिग्रहणमौणादिकानां संज्ञा-शब्दानां नप्त्रादीनामेव न पित्रादीनामित्याह-**व्युत्पत्तिपक्षे त्वि**त्यादि। **केचित् त्वि**ति-प्रपूर्वात् स्तौतेरुत्पूर्वान्नयतेर्गायतेश्च प्रतिपूर्वाद् हरतेस्तिष्ठतेश्च "हु-पूद्गोन्नीप्रस्तुप्रतिह-प्रति(प्र)स्थाभ्य ऋत्विजि" (उणा० ८६३) इति तृप्रत्यये घुट्यारादेशं मन्यन्ते। ताच्छीलिकतृ-न्नन्तत्वादेषामारादेशसिद्धिः ।।३८।।

***ल.न्यास*-तृ-स्वस्रि**त्यादि-सूत्रत्वाद् "अनाम्स्वरे०" (१.४.६४) इति न, सूत्रे ऋकारोपादानाद् वा, कथमिति चेत्? प्रशास्तॄणाम् ऋः प्रशास्तॄः तस्य। **अतिकर्तारमि**ति-अत्र तत्पुरुषो न बहुव्रीहिः कच्प्रसङ्गात्, तेन च व्यवधानेन प्राप्त्यभावात्। नन्वत्र सूत्रे शौ निमित्ते किं न दर्शितम्? "स्वराच्छौ" (१.४.६५) इति नागमेन व्यवधानान्न प्राप्नोतीति चेत्, न-नागमः प्रकृतेरेवांश इति, सत्यम्-अवयवेनावयवस्य ऋलक्षणस्य व्यवधानं भवतीति न दर्शितम्। सुष्ठु अस्यति-क्षिपति भ्रातुरमङ्गल्यमिति-**स्वसा** "सोरसेः" (उणा० ८५३), नमति पूर्वजेभ्य इति **नप्ता** "नमेः प् च" (उणा० ८६२), नयति प्राप्नोति वेदशाखाम् इति-**नेष्टा** 'नियः षादिः" (ऊणा० ८६४) तृप्रत्ययः, "त्विषी दीप्तौ" त्वेषते दीप्तो भवति स्वर्गनिर्माणनैपुणेनेति-**त्वष्टा,** "क्षद खदने" इति सौत्रः, **क्षत्ता** "त्वष्टृ-क्षत्तृ-दुहित्रादयः" (उणा० ८६५) इत्यनेन निपातः। जुहोति व्रीह्यादिकान्, पुनाति आत्मानं वेदपाठेन "हु-पूद्गोन्नी-प्रस्तु०" (उणा० ८६३) इत्यादिना-**होता, पोता,** प्रशास्ति दिशति शास्त्राणि इति-**प्रशास्ता** "शासिशंसि-नी०" (उणा० ८५७) इत्यादिना तृप्रत्ययः। जायत इति जा पुत्री "क्वचित्" (५.१.१७१) इति ङः प्रत्ययः, जां मिनोति जाया मिगस्तृप्रत्ययः "मिग्मीगः०" (४.२.८) इत्याकारः, **केचित् त्वि**ति-**भोज**प्रभृतयः ।।३८।।

अङौ च ।१।४।३९।।

***बृ०न्यास*-अङौ चे**ति-अत्र निमित्तात् परः श्रूयमाणश्चकारो निमित्तान्तरसव्यपेक्षः प्रत्यासत्तेरनन्तरसूत्रोपात्तमेव निमित्त-मुपस्थापयतीत्याह-**ङौ घुटि चे**ति। नपुंसके ऋकारान्तस्य ङौ नित्यत्वात् श्यादेशे च पितरि वारिणेत्यादावुभयोः सावकाशत्वेन परत्वान्नागमे ऋकारान्तत्वाभावान्न भवतीत्याह-**कर्तृणी**त्यादि ।।३९।।

***ल.न्यास*-अङौ चे**ति। **ङौ घुटि चे**ति-अत्र निमित्तात् परः श्रूयमाणश्चकारो निमित्तान्तरसव्यपेक्षः प्रत्यासत्तेरनन्तरसूत्रोपात्तमेव निमित्तमुपस्थापयति। **कर्तृणि कुले** इति-पितरि, वारिणीत्यादावुभयोः सावकाशत्वेन परत्वान्नागमे ऋकारान्तत्वाभावान्न भवतीति ।।३९।।

मातुर्मातः पुत्रेऽर्हे सिनाऽऽमन्त्र्ये ।१।४।४०।।

बृ०न्यास—**मातुरि**त्यादि। आमन्त्र्य इत्यनेन पुत्र इति विशिष्यते तेन च मातुरितीत्याह-**मातृशब्दस्ये**त्यादि। ननु कथं मातृशब्दस्य पुत्रार्थे वृत्तिः? नह्यसौ तत्र वर्तमानः क्वचिद् दृष्टः, सत्यम्-केवलो न वर्तते, बहुव्रीहौ तु तात्पर्यात् वर्तत इत्याह-**सामर्थ्यादि**त्यादि। अयमर्थः-नह्यन्यत्र वर्तमानः शब्दः साक्षादन्यमर्थं प्रतिपादयति, समासे तु स्वपदार्थोपसर्जनतयाऽर्थान्तरं प्रतिपादयत्येव। **अर्ह** इति-प्रशंसायामित्यर्थः, प्रशंसा च प्रधानत्वात् पुत्रस्यैव, न मातुः, अर्हसम्भवेऽपि तदर्थत्वादित्याह—**मातृद्वारेणे**त्यादि। बहुव्रीहौ हि मातृशब्दस्य ऋकारान्तत्वाद्दलक्षणः कच् प्राप्तः, विशेषविहितत्वात् तदपवादोऽयमित्याह—**कचोऽपवाद इति**। गर्गस्यापत्यं वृद्धं स्त्री "गर्गादेर्यञ्" (६.१.४२) इति यञि "वृद्धिः स्वरेष्वा०" (७.४.१) इति वृद्धौ "अवर्णेवर्णस्य" (७.४.६८) इत्यकारलोपे "यञो डायन् च वा" (२.४.६७) इति ङ्याम् "अस्य ङ्यां लुक्" (२.४.८६) इत्यलोपे "व्यञ्जनात् तद्धितस्य" (२.४.८८) इति यलोपे च गार्गी, एवम्-वात्सी, गार्गी माता यस्येति प्राप्तस्य पुंवद्भावस्य "स्वाङ्गान्ङीर्जातिश्च०" (३.२.५६) इति प्रतिषेधादनेन सिना सह मातादेशे गार्गीमातः?, अत्र यो गार्ग्या मात्रा व्यपदेशेन प्रशंसामर्हति (अत्र श्लाघ्यया गार्ग्या मात्रा तत्पुत्र इति व्यपदेशेन प्रशंसामर्हति पुत्रः)। गार्ग्यः पिता यस्येति ऋलक्षणे कचि गार्ग्यपितृकः। **अरे गार्गीमातृके**ति-अत्र निन्द्यया मात्रा तद्व्यपदेशयोग्यतया विगुणः पुत्रो निन्द्यत इत्यर्ह इति वचनान्न भवतीति ।।४०।।

ल.न्यास—**मातुर्मात** इत्यादि। ननु कथं मातृशब्दस्य पुत्रार्थे वृत्तिः? नह्यसौ पुत्रार्थे वर्तमानः क्वचिद् दृष्ट इत्याह—**सामर्थ्या**दिति-अयमर्थः-केवलो न वर्तते, बहुव्रीहौ तु स्वार्थोपसर्जनतयाऽर्थान्तरं प्रतिपादयत्येव। **कचोऽपवाद** इति-अनन्तरानन्तरिभावे षष्ठी व्याख्येया, तेन कचा व्यवधाने न स्यात्। संभावित उत्कर्षो यस्याः सकाशात् (तया, **तत्पुत्रव्यपदेशयोग्यतया**) तत्पुत्र इति व्यपदेशः कथनं तस्य योगः (योग्यतया)। **अरे गार्गीमातृके**ति-अज्ञातपितृकत्वेनानेकपितृकत्वेन च निन्द्यया मात्रा विगुणः पुत्रो निन्द्यत इति ।।४०।।

ह्रस्वस्य गुणः ।१।४।४१।।

बृ०न्यास—**ह्रस्वस्ये**त्यादि। ह्रस्वस्य अधिकृतस्य नाम्नो विशेषणत्वाद् विशेषणे च तदन्तविधिसम्भवान्नाम्नः स्थानित्वप्रसक्तौ सत्यामाह—**श्रुतत्वादि**त्यादि। "आसन्नः" (७.४.१२०) इति ज्ञापकाद्दकारस्य तत्प्रत्यासन्नोऽर्, इकारस्य एकारः, उकारस्य ओकारः, अकारस्य "अदेतः स्यमोर्लुक्" (१.४.४४) इति वचनात् सेरभावाद् गुणो न भवति। अथ प्रमाणासत्त्या इकारोकारयोरपि अरादेशः कस्मान्न भवति? मातृकस्य हि द्विमात्रादध्यर्द्धमात्रिक आसन्नो भवति, न चैवं सति गुणग्रहणमनर्थकं स्थानासत्त्या सोऽपि स्यात्, उच्यते-यथादर्शनं व्यवस्थाऽऽश्रीयते, तत्र "गुणोरेदोत्" (३.३.२) इति गुणसंज्ञायां "नामिनो गुणोऽक्ङिति" (४.३.१) इत्यादिभिः ऋवर्णस्यैवारादेशो दृष्टो नेवर्णोवर्णयोः, दृष्टकल्पनां च विहाय को नामादृष्टं कल्पयति?, न चैवं किञ्चिद् बाध्यत इत्युदाहरति—**हे पितरि**त्यादि। अथ **हे कर्तृ कुले**त्यादौ ह्रस्वत्वादामन्त्र्यसिना सह गुणः कस्मान्न भवतीत्याह-**अत्र परत्वादि**त्यादि-"अनतो लुप्" (१.४.५९) इति सेर्लुपि "लुप्यय्वृल्रेनत्" (७.४.११२) इति ⁂ प्रत्ययलोपे प्रत्ययलक्षणस्य ⁂ प्रतिषेधादित्यर्थः। लुक्पक्षे तु लुकः स्थानिवद्भावाद् भवत्येवेत्याह—**नामिन** इत्यादि। **हे नदि!** इत्यादि-अन्यथा "ह्रस्वस्य गुणः" (१.४.४१) इत्यत्रैव 'नित्यदिद्' इति ग्रहणं कुर्याद् ह्रस्वविधानेऽपि गुणस्य भावादिति ।।४१।।

ल.न्यास—**ह्रस्वस्ये**त्यादि। **ह्रस्व**स्येति अधिकृतस्य नाम्नो विशेषणाद् विशेषणे च तदन्तविधिसंभवादाह-**ह्रस्वान्तस्ये**ति। **श्रुतत्वादि**ति-श्रुतो ह्रस्वो ह्रस्वान्तत्वं त्वनुमितम्, ⁂श्रुतानुमितयोश्च श्रौतो विधिर्बलीयान्⁂ इति न्यायः। **ह्रस्वविधा**नेति-⁂उभयोः स्थाने यः⁂ इति न्यायेन यदा सिव्यपदेशस्तदा सिर्ह्रस्वश्चापि, अतो विधानसामर्थ्याद्, यदा तु ह्रस्वव्यपदेशस्तदा सेरभावान्न भवति ।।४१।।

एदापः ।१।४।४२।।

***बृ०न्यास*—एदाप** इति। बहवो राजानो यस्यां "ताभ्यां वाऽऽप् डित्" (२.४.१५) इति डित्यापि अनेनैकारे **बहुराजे!**। एवमीषदूना खट्वा "नाम्नः प्राग् बहुर्वा" (७.३.१२) इति बहौ अनेन एत्वे **बहुखट्वे!**। अथ प्रिया खट्वा यस्येति "गोश्चान्ते ह्रस्वो०" (२.४.४६) इति ह्रस्वत्वे ※एकदेशविकृतस्यानन्यत्वाद्※ आपः सद्भावात् आमन्त्र्यसिना एत्वं कस्मान्न भवति? उच्यते --सूत्रे आ आप इत्याकारप्रश्लेषादत्राकाराभावादेत्वाभावः, अत आह–**आप इतीति** ।।४२।।

***ल.न्यास*–एदाप** इति। आश्चासावाप् चेति आकारप्रश्लेषाद् **हे प्रियखट्व!** इत्यत्र "गोश्चान्ते०" (२.४.४६) इति ह्रस्वत्वे ※एकदेशविकृत०※ इति न्यायात् प्राप्तोऽपि एकारादेशो न भवति ।।४२।।

नित्यदिद्-द्विस्वराऽम्बार्थस्य ह्रस्वः ।१।४।४३।।

***बृ०न्यास*—नित्येत्यादि**। शृणातेः "शिग्रु-मेरु-नमेर्वादयः" (उणा० ८११) इति निपातनाद्रौ अन्तस्य चाऽङ्गादेशे शङ्गरुः, अत एव निपातनात् शृङ्गरुरित्यपि, तस्यापत्यमणि ङ्यां शाङ्गरवी, शाङ्गरवी, शेषास्तु व्युत्पादिता व्युत्पादयिष्यन्ते च, नञ्पूर्वाल्लम्बतेः "नञोलम्बेर्नलुक् च" (उणा० ८३८) इति णिति ऊप्रत्यये नलोपे उपान्त्यवृद्धौ च **अलाबू**, ततः सिना सह ह्रस्वत्वम्। "अम गतौ" अतः "शम्यमेर्णिद् वा" (उणा० ३१८) इति बप्रत्यये आपि **अम्बा**, "अक कुटिलायां गतौ" इत्यस्य "निष्क-तुरुष्क०" (उणा० २६) इत्यादिनिपातनात् कप्रत्यये **अक्का**, अततेः "पुत-पित्त-निमित्त०" (उणा० २०४) इति निपातनात् ते **अत्ता**, "अली भूषणादौ" अस्य "भिल्लाऽच्छ-मल्ल०" (उणा० ४६४) इत्यादिनिपातनाल्ले **अल्ला**, ततोऽनेन सिना सह ह्रस्वत्वम्। वातप्रपूर्वान्मातेः "वातात् प्रमः कित्" (उणा० ७१३) इति ईप्रत्यये किति "इडेत्पुसि चाऽऽतो लुक्" (४.३.४४) इत्याकारलोपे **वातप्रमीः**, नित्यदित्त्वाभावाद्ध्रस्वत्वाभावः। जहातेः पृषोदरादित्वाद् अप्रत्यये द्विर्वचनादौ **हूहूः। नित्यग्रहणादिति**-हे श्रीरित्यादौ "वेयुवोऽस्त्रियाः" (१.४.३०) इति दितां विकल्पितत्वादित्यर्थः। **कथमिति**-भ्रमेः "शिग्रु-मेरु-नमेर्वादयः" (उणा० ८११) इति निपातनाद् डिति उप्रत्यये भ्रु, शोभनं भ्रु भ्रमणं यस्याः "उतोऽप्राणिनश्च०" (२.४.७३) इत्यूङ्प्रत्यये समानदीर्घत्वेऽनेन ह्रस्वत्वे च सुभ्रु!। बिभेतेः "भियो रु-रुक-लुकम्" (५.२.७६) इति रुप्रत्यये च पूर्ववद् **भीरु। अम्बार्थानामिति**-अम्बापूर्वादडतेर्लातेश्च लिहाद्यचि "आतो डोऽह्वा-वा-मः" (५.१.७६) इति डे च आपि च अम्बाडा, अम्बाला, अम्बेः "णक-तृचौ" (५.१.४८) इति णकप्रत्यये "आत्" (२.४.१८) इत्यापि "अस्याऽयत्-तत्-क्षिपकादीनाम्" (२.४.१११) इतीकारे अम्बिका ।।४३।।

***ल.न्यास*–नित्यदिदित्यादि**। शृं गृणाति शृङ्गरुऋषिस्तस्यापत्यं शाङ्गरवी, यद्वा शृणोतीति "शिग्रु-मेरु-नमेर्वादयः" (उणा० ८११) इति निपातनाद्रौ अन्तस्य चाऽङ्गादेशे शङ्गरुः, यदा तु अनेनैव शृङ्गरुरिति निपात्यते तदाऽणि ङ्यां च शाङ्गरवी, अथवा शाङ्गवत् रवो यस्या गौरा-दित्वाद् ङ्यां शाङ्गरवी। **हे अम्बेति**–अबुङ् अम्बतेऽच् अम्बा। **हे अक्केति**–"अक कुटिलायां गतौ" इत्यस्य "निष्क-तुरुष्क०" (उणा० २६) इत्यादि-निपातनात् कप्रत्यये। अततेः "पुत-पित्त०" (उणा०२०४) इति निपातनात् ते **अत्ता**। "अली भूषणादौ" अस्य "भिल्लाऽच्छ भल्ल०" (उणा० ४६४) इति निपातनाल्ले **अल्ला**। **हे हूहूः** जहातेः पृषोदरादित्वाद् ऊप्रत्यये द्विर्वचनादौ। **हे वातप्रमीः?** वातं प्रमिमीते "वातात् प्रमः कित्" (उणा० ७१३) इति ईप्रत्ययः। **हे ग्रामणीः?** नायमीकारान्तो नित्यदित् किन्तु पुल्लिङ्गोऽपि। **हे सुभ्रु!** इति-"केवयुभुरण्टव०" (उणा० ७४६) इति निपातनात् भ्राम्यतेर्भ्रु, शोभनं भ्रु भ्रमणं यस्याः सुभ्रुशब्दात् भीरुध्वनेश्च जातित्वादूङ्, परस्य विकल्पेन दित्त्वात् हे सुभ्रूः!, हे भीरो!, प्राप्तमित्यभिप्रायः। अम्बामडतीति लिहादित्वादच्। अम्बां लातीति "आतो डोऽह्वा-वा-मः" (५.१.७६) इति डप्रत्ययः। अम्बतेः "णक-तृचौ" (५.१.४८) णक आप्, "अस्याऽयत्त०" (२.४.१११) इति इकारः ।।४३।।

अदेतः स्यमोर्लुक् ।१।४।४४।।

***बृ०न्यास*—अदेत** इत्यादि। आमन्त्र्य इति वर्तते, तत्र च स्यादेश एव सम्भवति, अन्यस्यासम्भवादित्याह-**तदादेशस्यामश्चे**ति। **हे परमे!** इति-अत्र 'परम-इ' इति स्थितेऽन्तरङ्गत्वाद् विभक्त्युत्पत्तेः पूर्वमेव "अवर्णस्येवर्णा०" (१.२.६) इत्यादिनैकारः, एवम्-से!, परमश्चासाविश्चेति "सन्महत्-परमो०" (३.१.१०७) इति विशेषणसमासः, सह इना वर्तत इति "सहस्तेन" (३.१.२४) इति बहुव्रीहौ "सहस्य०" (३.२.१४३) इति सभावः। अथ किमर्थममो लुग्वचनम्? स्यादेशत्वात् तद्ग्रहणेनैव ग्रहणाल्लुग् भवतीत्याह-**स्यादेशत्वेने**त्यादि ।।४४।।

***ल.न्यास*—अदेत** इत्यादि। आमन्त्र्य इति वर्तते, तत्र च स्यादेश एवाम् संभवतीत्याह-**स्यादेशे**ति। **हे कतरद्** इति। ननु अम्ग्रहणस्य अन्यदपि फलं कस्मात्र भवति? यथा-कुम्भस्य समीपानि उपकुम्भमित्यत्र लुगर्थम्, नैवम्-सिसाहचर्यादेकवचनस्यामोग्रहणं न बहुवचनस्थानस्य।।४४।।

दीर्घड्याब्-व्यञ्जनात् सेः ।१।४।४५।।

***बृ०न्यास*—दीर्घे**त्यादि। प्रियशब्दस्य "गुणाङ्गाद्वेष्ठेयसू" (७.३.९) इतीयसि "प्रिय-स्थिर०" (७.४.३८) इति प्रादेशे "अधातूदितः" (२.४.२) इति ङ्यां च प्रेयसी। अथ "पदस्य" (२.१.८९) इति संयोगान्तलोपेन सेर्लोपस्य सिद्धत्वाद् व्यञ्जनग्रहणमतिरिच्यते, न च 'राजा, तक्षा' इत्यत्र नकारस्य लोपे (कर्तव्ये संयोगान्तलोपस्यासिद्धत्वेन नान्तत्वाभावाद् "नाम्नो नो०" (२.१.९१) इति नलोपाभाव इति वाच्यम्, "नामन्र्ये" (२.१.९२) इति प्रतिषेधात् संयोगान्तलोपस्य) सिद्धत्वाद्, इहापि तर्हि नलोपप्रसङ्गः-'पचन्, यजन्' इति, उच्यते-तुल्यजातीयस्य नियमः, कश्च तुल्यजातीयः?, यः सावनन्तरः, 'पचन्' इत्यत्र तु नकारस्तकारेण व्यवहित इति, न चात्र तकारलोप एव न, प्राक् सलोपस्तस्यासिद्धत्वात् तलोपाभावः, पूर्वस्य परेऽसत्त्वमुच्यते, ततश्च संयोगान्तलोपे संयोगान्तलोपस्य सिद्धत्वाद् भवत्येव तलोपस्तस्यासिद्धत्वान्नलोपाभावः। ननु तथापि "नाम सिदय्व्यञ्जने" (१.१.२१) इति सावपि पदत्वाद् राजेति नलोपः सिद्ध्यति, कृते तु नलोपे संयोगान्तत्वाभावात् "पदस्य" (२.१.८९) इति सेर्लोपो न सिद्ध्यति, तथा 'उखास्रत्, पर्णध्वद्' इत्यादौ दत्वं वक्तव्यम्, तथाहि-'उखास्रस्+स्' इति स्थिते संयोगान्तलोपमपवादत्वाद् बाधित्वा संयोगादिलोपः प्राप्नोति, पूर्वो हि अपवादो वचनप्रामाण्यादुत्सर्गे कर्तव्ये नासिद्धो भवति, 'काष्ठतड्' इतिवत्, कृते च संयोगादिलोपे संयोगाभावात् संयोगान्तलोपाभावः, ततो विभक्तिसकारः संस्रतेरवयवो न भवतीति दत्वासिद्धिरित्याह-**पदस्ये**त्यादि ।।४५।।

***ल.न्यास*—दीर्घड्याबिति। 'कुमारी ब्राह्मणः'** इत्यत्र नैषां क्विबादीनां ङी-स्योर्व्यवधायकत्वे स्थानित्वम्, यतः स्थान्याश्रये वृद्ध्यादिके कार्ये कर्तव्ये स्थानित्वम्, न तु व्यवधायकत्वे, नहि व्यवधायकत्वं कार्यं नाम, अपि तु वृद्ध्यादीनि कार्याणीति। एवम्-'अच्योढ्वम्' इत्यादिषु सिचो लोपस्य ढत्वे कर्तव्ये न स्थानित्वम्। **दत्वं चे**ति-सौ परे लुकः पूर्वं दत्वं प्राप्नोतीति न वाच्यम्, परे लुकि "स्रंस्-ध्वंस्०" (२.१.६८) इति सूत्रस्यासिद्धत्वात् ।।४५।।

समानादमोऽतः ।१।४।४६।।

***बृ०न्यास*—समानादि**त्यादि। **अम** इति षष्ठी, **अत** इत्यस्य अम इति षष्ठ्यन्तं विशेषणमित्याह-**समानात् परस्यामोऽकारस्ये**ति। अथ ऋकारस्य समानत्वादमोऽकारलोपः कस्मात्र भवतीत्याह-**पितरमि**त्यादि। चिनोतेर्ह्यस्तन्या अम्वि **"स्वादेः श्नुः"** (३.४.७५) इति श्नुप्रत्यये "उ-श्नोः" (४.३.२) इति गुणेऽवादेशेऽडागमे स्याद्यधिकारादमोऽकारलोपाभावे **अचिनवम्** ।।४६।।

ल.न्यास–**समानादि**त्यादि। **अचिनवमि**ति-न च वाच्यं परत्वान्नित्यत्वाच्च गुणेन भाव्यमिति, प्राप्तौ सत्यां हि परत्वं नित्यत्वं च चिन्त्यत इति ।।४६।।

दीर्घो नाम्यतिसृ-चतसृ-षृः ।१।४।४७।।

बृ०न्यास–**दीर्घो नामी**त्यादि। अत्र स्याद्यधिकारादामादेश एव नाम् गृह्यत इत्याह–**आमादेशे नामी**ति। **तिसृणाम्, चतसृणाम्** इति। त्रि-चतुरोरामि परत्वात् "त्रि-चतुर०" (२.१.१) इति तिसृ-चतस्रादेशे "ह्रस्वापश्च" (१.४.३२) इति नामादेशः। **षण्णाम्, चतुर्ण्णाम्** इति–"संख्यानां र्ण्णाम्" (१.४.३३) इति नामादेशः; ननु नात्र समानस्य नाम्युच्यमानो दीर्घः प्राप्नोति, षकार-रेफाभ्यां तस्य व्यवधानात्, तयोश्चासमानत्वात्, सप्तम्या निर्दिष्टे चोपश्लिष्टस्यैव कार्यभावात्, सत्यम्-अयमेव प्रतिषेधो ज्ञापयति-यदुत, वर्णान्तरव्यवहितेऽपि नामि पूर्वसमानस्य दीर्घो भवतीत्याह–**अषृ** इत्यादि। **दधिनामे**त्यादौ स्याद्यधिकाराद् 'नामन्' इत्याद्येक-देशस्यानर्थकत्वाद् वा दीर्घो न भवतीत्याह–**स्यादावि**ति। यद्येवमिह तर्हि प्राप्नोति–दण्डस्य नामो दण्डनाम इति, अत्र हि नामिति धातुर्घञि प्राप्ताकारोऽर्थवान् इति, उच्यते-तत्रापि समुदाय एवार्थवान्, अवयवानां तु काल्पनिकमर्थवत्त्वमन्वय-व्यतिरेकाभ्यां कल्पि-तत्वात्, अयं तु नाम इति आमादेश एव प्रतिपदोक्त इति न भवति ।।४७।।

ल.न्यास–**दीर्घो नाम्ये**त्यादि। **आमादेश** इति स्याद्यधिकारदामादेश एव गृह्यतेऽत इदमुक्तम्। **अषृ** इति-ननु षकार-रेफाभ्यां व्यव-धानादेव न भविष्यति दीर्घः, किं षृवर्जनेन? इत्याह–**नकारेणे**ति–अन्यव्यञ्जनेन तु असम्भव इति ।।४७।।

नुर्वा ।१।४।४८।।

बृ०न्यास–**नुर्वे**ति। अथेह वाग्रहणमन्तरेणापि नित्यं दीर्घविधेः पूर्वेणैव सिद्धत्वात् पृथग्वचनाद् विकल्पोऽवसीयते, अतिसृ-चतसृ-षृ इत्यत्राकरणात् प्रतिषेधाशङ्काऽपि न विधेया, तिसृ-चतसृप्रतिषेधादकारान्तस्य नृशब्दस्यैवेति नियमोऽपि नाशङ्कनीयः, उच्यते-पृथग्वचनस्यानर्थक्यपरिहाराय विकल्पयितव्ये पूर्वो विधिर्नित्योऽयं विकल्पित इति किं न स्यात्? युक्तं चैवम्-अयं विधिर्नित्य इति द्विर्वचनात् ⁂द्विर्बद्धं सुबद्धं भवति⁂ अतो वाग्रहणादयं विधिर्विकल्पितः, पूर्वो नित्य इति विज्ञायते।।४८।।

शसोऽता सश्च नः पुंसि ।१।४।४९।।

बृ०न्यास–**शसोऽते**त्यादि। अत्र यद्यपि समानस्य शसोऽकारस्य च स्थानित्वम्, तथापि ⁂प्रधानानुयायिनो व्यवहारा भवन्ति⁂ इति प्रधानस्थान्यासन्न एव दीर्घो भवति, प्रधानत्वं च षष्ठीनिर्दिष्टस्य समानस्यैवेत्याह–**समानस्ये**त्यादि। चकाराद् भिन्नार्थं वाक्यद्वयमित्याह–**तत्सन्नियोगे चे**त्यादि। पुंस्त्वं त्वत्र वैयाकरणप्रसिद्धं लिङ्गम्, यत्रायमिति प्रत्ययोऽनुवर्तते, नेदमियमिति वा, न तु लौकिकं प्रजननयोन्यभिव्यक्तं प्राणिधर्मः, तत्र हि भ्रकुंसान् पश्य, स्त्रियोऽपि हि यदा पुरुषवेषधारिण्यो भ्रकुंसा उच्यन्ते तदा स्त्रीवृत्ति-रयं न पुंवृत्तिः, तथा 'षण्ढान् पश्य, पण्डकान् पश्य' इति नपुंसकेऽपि न सिद्ध्यति, तथा 'वृक्षान् पश्य' इत्यप्राणिष्वपि, तथा 'चञ्चा इव चञ्चाः पुरुषान् पश्य' इत्यत्रापि पुरुषवृत्तित्वात् प्राप्नोति। नन्वस्तु वैयाकरणप्रसिद्धस्य पुंस्त्वस्य ग्रहणम्, तथापि 'चञ्चाः, खरकुटीः यष्टीः पुरुषान् पश्य' इत्यादौ प्राप्नोति, अत्र हि चञ्चादयः शब्दाः सादृश्यात् पुरुषेषु वर्तमानास्तत्पुंस्त्वमुपाददते, तेन पुल्लिङ्गविषये शसित्याह–**अत्रे**त्यादि। अयमर्थः–अभेदोपचारेण हि शब्दोऽर्थान्तरे वर्तमानः शब्दशक्तिस्वाभाव्यात् स्वलिङ्गमपरित्यजन्नेव वर्तत इति। **यदा त्वि**ति–लौकिकस्य पुंस्त्वस्याग्रहणादयमिति प्रत्ययस्य तत्रानुवृत्तेरिति शेषः। **एतान् गाः पश्य** इति-दीर्घसन्नियोगेन नकारस्य विधीयमानत्वात् ⁂सन्नियोगशिष्टानामेकापायेऽन्यतरस्याप्यपायः⁂ इति न्यायाद् दीर्घत्वाभावे नकारस्याप्यभाव इत्यर्थः।

'शालाः पश्य, यकृन्ति' इत्यादौ उभयोर्दीर्घत्व-श्यादेशयोः सावकाशत्वाद् 'वनानि' इत्यादौ उभयप्राप्तौ परत्वाच्छिरेवेत्याह-**वनानी**त्यादि।।४९।।

***ल.न्यास*–शसोऽते**त्यादि। **समानस्ये**ति-अत्र यद्यपि समानस्य शसोऽकारस्य च स्थानित्वम्, तथापि ❊प्रधानानुयायिनो व्यवहारा भवन्ति❊ इति प्रधानस्थान्यासन्न एव दीर्घो भवति, प्रधानत्वं च षष्ठीनिर्दिष्टस्य समानस्यैवेति, प्रधानस्थान्यासन्न इति वचनाद् 'मुनीन्' इत्यादौ शसोऽकारस्य "अवर्ण-हविसर्ग०" इति आसन्नत्वेऽप्याकारो न भवति। **वातप्रमीनि**ति-वातं प्रमिमते "वातात् प्रमः कित्" (उणा० ७१३) ईप्रत्ययः, **देवनन्दिना** मृगेऽपि स्त्रीलिङ्ग उक्तः ।।४९।।

संख्या-साय-वेरह्नस्याहन् ङौ वा ।१।४।५०।।

***बृ०न्यास*–संख्ये**त्यादि। **(संख्या-साय-वेरि**ति) समाहारद्वन्द्वात् पञ्चमी, (**अह्नस्ये**ति) 'द्व्यह्न' इत्यादाववस्थितस्य 'अह्न' इत्येकदेशस्यानुकरणात् षष्ठी। द्वयोरह्नोर्भव इति समासप्रत्ययविधौ तदन्तविधेरनिष्टत्वात् "वर्षाकालेभ्यः" (६.३.८०) इतीकणोऽसम्भवात् भाविन्यणि "संख्या समाहारे च०" (३.१.९९) इति द्विगुसमासेऽटि अह्नादेशे "भवे" (६.३.१३) इत्यणि "द्विगोरनपत्ये" (६.१.२४) इति तल्लुपि च ङावनेन 'अहन्' इत्यादेशे "ईङौ वा" (२.१.१०९) इति विकल्पेनाकारलोपे **द्व्यह्नि, द्व्यहनि, द्व्यह्ने,** एवम्-त्रिषु यावत्सु तावत्सु वा भव इति, शेषं पूर्ववत्। संख्यापूर्वस्य तद्धित एवोदाहरणम्, समाहारेऽह्नादेशस्य उत्तरपदे ङिप्रत्ययस्य चाभावादिति। सायमह्नः "सायाह्नादयः" (३.१.५३) इति समासे "सर्वांश-संख्या-ऽव्ययात्" (७.३.११८) इत्यह्नादेशे चात एव निर्देशान्मकारलोपे पूर्ववदहनादेशादौ **सायाह्नि** इत्यादि। **व्यह्नि** इति-प्रादिसमासः। द्व्यहे इति-"द्विगोरत्रह्नो०" (७.३.९९) इत्यटि "नोऽपदस्य तद्धिते" (७.४.६१) इत्यन्त्यस्वरादिलोपः ।।५०।।

ल.न्यास*–संख्या-साये**त्यादि। **अण्विषये** इति-द्वयोरह्नोर्भवः "संख्या समाहारे च०" (३.१.९९) इति तद्धितविषये द्विगुसमासेऽण्विषयेऽटि अह्नादेशः, ***शाकटायनस्तु "वर्षाकालेभ्यः" (६.३.८०) इति इकण्प्रत्ययविषयेऽट्प्रत्ययमिच्छति, स्वमते तु न 'द्व्यह्न' इत्यस्याकालवाचित्वात्। **यावदह्नि** इत्यादिषु दुसंज्ञकेषु "दोरीयः" (६.३.३२) विषयेऽटि तत ईयः; तस्य च "द्विगोरनपत्ये०" (६.१.२४) इति लुक्। **द्व्यहे** इति-"द्विगोरनह्न०" (७.३.३९) इत्यत्र अहन्ग्रहणात् ज्ञापकात् "सर्वांश०" (७.३.११८) इति परमप्यटं बाधित्वा "द्विगोरहन्नह्नोऽट्" (७.३.९९) इत्यट् ततोऽह्नाभावः ।।५०।।

निय आम् ।१।४।५१।।

***बृ०न्यास*–निय** इत्यादि। प्रयुक्तानामन्वाख्यानाद् 'आम्' इति प्रयोगादर्शनाद् 'नियः' इति पञ्चमीनिर्देशात्, ङावित्यस्य षष्ठ्या विपरिणामे स्थानित्वमित्याह-**नियः परस्य ङेः स्थाने** इति। नयतेः किपि ङौ आमादेशे "धातोरिवर्णोवर्णस्य०" (२.१.५०) इतीयादेशे **नियाम्,** ग्रामपूर्वात् तु "किब्वृत्तेरसुधियस्तौ" (२.१.५८) इति यत्वे **ग्रामण्याम्।** अस्य तु "आमो नाम् वा" (१.४.३१) इति "ह्रस्वापश्च" (१.४.३२) इति च नामादेशो न भवति, तत्र नित्यस्त्रीदूतोऽधिकृतत्वात् ।।५१।।

ल.न्यास*–निय** इत्यादि। ननु **ग्रामण्यामित्यत्र** नी साक्षान्नास्ति किन्तु णी इत्यामो न प्राप्तिः, सत्यम्-स्यादिविधौ णत्वमसिद्धम्। अस्यामः "आमो नाम् वा" (१.४.३१) इति नामादेशो न भवति, तत्र नित्यस्त्रीदूतोरधिकृतत्वात्। ननु ❊एकदेशविकृत०❊ इति क्लीबेऽपि प्राप्तिरस्ति, न-निय ई नी इतीकारप्रश्लेषात् 'निनि, ग्रामणिनि कुले' इत्येव भवति, ***भोजेन तु भूतपूर्वन्यायेन नपुंसकेऽपि नियामित्युक्तम्।।५१।।

वाऽष्टन आः स्यादौ ।१।४।५२।।

बृ०न्यास*—वाष्टन** इत्यादि। **स्यादाविति** परत्वमात्रेण कार्यस्य विशेषणमित्याह-**तत्सम्बन्धिनी**त्यादि। "अशौटि व्याप्तौ" अतः "षप्यशौभ्यां तन्" (उणा० ९०३) इति तनि "यज-सृज-मृज०" (२.१.८७) इत्यादिना शस्य षत्वे "तवर्गस्य श्चवर्ग०" (१.३.६०) इति टत्वे भिस्प्रत्ययेऽनेनाऽऽत्वे च **अष्टाभिः**। अष्टौ मानमस्य "संख्यायाः संघ-सूत्र-पाठे" (६.४.१७१) इति के "नाम्नो नोऽनहः" (२.१.९१) इति नलोपे **अष्टकः**, अत्र ❊अन्तरङ्गानपि विधीन् बाधित्वा लुप् प्रवर्तते❊ इति स्यादेरभावादात्वं न भवति। **अन्यसम्बन्धिनोरित्येके**-विश्रान्तविद्याधर*** इति। **केचित् त्वि**ति-स इव ।।५२।।

***ल.न्यास*—वाष्टन** इत्यादि। पूर्वसूत्राद् ङेरनुवृत्तिर्मा भूदिति स्यादिग्रहणम्। अथ "अष्ट और्जस्-शसोः" (१.४.५३) इत्यत्र 'अष्टः' इति ज्ञापकाद् ङेरनुवृत्तिर्न भविष्यति, सत्यम्-तद्धि मतान्तरसंग्रहार्थम् ।।५२।।

अष्ट और्जस्-शसोः ।१।४।५३।।

बृ०न्यास*—अष्ट** इत्यादि। अष्टास्वित्याद्येकदेशस्याष्टन्शब्दस्य षष्ठ्यन्तमनुकरणमित्याह-**अष्ट** इत्यादि। तच्च **'जस्-शसोः'** इत्यस्य विशेषणम्, तेन तत्सम्बन्धिनोरित्याह-**अष्टाशब्दसम्बन्धिनोरि**त्यादि। अष्टन्शब्दाज्जसि शसि च "वाष्टन आः स्यादौ" (१.४.५२) इत्याकारेऽनेन जस्-शसोरौकारे एकत्र "ऐदौत् सन्ध्यक्षरैः" (१.२.१२) इति, अन्यत्र च "लुगातोऽनापः" (२.१.१०७) इति **अष्टौ**। अष्ट इत्यधिकृतनाम्नो विशेषणाद् विशेषणे च तदन्तविधेर्भावात् तदन्तमुदाहरति-"सन्महत्-परमो०" (३.१.१०७) इति "नञ्" (३.१.५१) इति च विशेषण-तत्पुरुषसमासौ-**परमाष्टौ, अनष्टौ** इति। ***अष्टेति-अष्टन् जस्-शसोरात्वाभावादौत्वाभावे "डतिष्णः संख्याया लुप्" (१.४.५४) इति लुप्। प्रिया अष्टौ येषामिति बहुव्रीहौ नाष्टन्शब्दसम्बन्धिनौ जस्-शसावित्यात्वे सत्यपि औत्वाभावात् **प्रियाष्टास्तिष्ठन्ति, प्रियाष्टः पश्य** इति। **केचित् त्वि**ति-तदप्यष्ट इति निर्देशस्य तुल्यत्वात्।।५३।।

डति-ष्णः संख्याया लुप् ।१।४।५४।।

***बृ०न्यास*—डति-ष्ण** इत्यादि। **डति-ष्ण** इति संख्यायाः प्रकरणात् षष्ठ्यन्ताया विशेषणम्, तत्र च तदन्तविधिरित्याह-**डति-षकार-नकारान्ताया** इत्यादि। **कती**त्यादि-'किम् यद् तद्' इत्येतेभ्यः "यत्तत्किमः" (७.१.१५०) इति डतिप्रत्यये जस्-शसोरनेन लुपि **कति, यति, तति तिष्ठन्ति। पश्ये**त्यनुप्रयोगो जस्-शसोरभिव्यक्त्यर्थः। षष् इति षन्ता, पञ्चन् इति नान्ता संख्या, ततो जस्-शसोर्लुपि "धुटस्तृतीयः" (२.१.७६) इति यथासम्भवं तृतीयत्वे प्रथमत्वे च "नाम्नो नोऽनहः" (२.१.९१) इति नलोपे च **षट्, पञ्च**; एवम्-**(परमषट्)** परमाश्च ते षट् चेति "सन्महत्-परम०" (३.१.१०७) इति संख्याप्रधानत्वात् समासस्य तत्सम्बन्धिनावेव जस्-शसाविति लुप्। **त्रय** इत्यादि-डतिष्ण इति वचनादिह न भवति। तन्मानमेषामिति "यत्-तदेतदो डावादिः" (७.१.१४९) इत्यतौ **तावन्तः**। अथ शतादिभ्यः शौ नागमे नान्तत्वेऽपि संख्याया लुप् कस्मान्न भवतीत्याह-**शतानी**त्यादि। **तत्सम्बन्धिविज्ञानादि**ति-प्रियाः कति येषां समासस्यान्यपदार्थप्रधानत्वाद् जस्-शसोर्डत्याद्यन्तसंख्यासम्बन्धाभावाल्लुप् न भवति ।।५४।।

***ल.न्यास*—डतिष्ण** इत्यादि। **सन्निपातलक्षणत्वा**देति-संनिपतति कार्यमस्मिन् संनिपातो निमित्तं शिलक्षणम्, स लक्षणं चिह्नं यस्य तस्य। **केचित् त्वि**ति-**वामनादयः** तन्मते इदं न सिद्ध्यति—

यति ते नाग! शीर्षाणि, तति ते नाग! वेदनाः। न सन्ति नाग! शीर्षाणि, न सन्ति नाग ! वेदनाः ।।५४।।

नपुंसकस्य शिः ।१।४।५५।।

बृ०न्यास—**नपुंसकस्ये**त्यादि-स्त्री च पुमाँश्च स्त्रीपुंसौ "स्त्रियाः पुंसो०" (७.३.९६) इति समासान्ते सति न स्त्रीपुंसौ नपुंसकम्, नखादित्वान्नञोऽदादेशाभावः, स्त्रीपुंशब्दस्य पृषोदरादित्वात् पुंसकादेशः। **शिरि**ति कार्यपदम्, तच्च कार्यिसापेक्षम्, तत्रान्यस्यासम्भवादधिकृतयोः जस्-शसोरेव कार्यित्वमित्याह-**जस्-शसोरि**त्यादि। कुण्डशब्दात् शसोऽनेन शावादेशे "स्वराच्छौ" (१.४.६५) इति नागमे "नि दीर्घः" (१.४.८५) इति दीर्घत्वे च **कुण्डानि,** एवमन्यत्रापि। अथेह कस्मान्न भवति?-कुण्डं कुण्डं ददाति **कुण्डश** इति, "संख्यैकार्थाद् वीप्सायाम्" (७.२.१५१) इति शस् अत्राप्यस्तीत्यत आह-**स्याद्यधिकारादि**त्यादि-अयं परिहारः-यदार्थप्रकरणादिवशाद् वृत्तौ कुण्डादिशब्द एकार्थाभिधायी भवति तदा शस उत्पत्तिरविरुद्धा, न त्वन्यदा, प्रस्थादयस्तु शब्दा वृत्तावेकसंख्यार्थाभिधायका एव, शस्विधौ हि वृत्तिस्था एकार्थताऽऽश्रीयते, न तु वाक्यस्य, अर्थ-प्रकरणादिरहितश्च कुण्डादिशब्दो वृत्तावेकार्थो न भवतीति शसा न भवितव्यमेव, कस्मात् पुनः कुण्डादिशब्दो वृत्तावेकार्थो न भवति? उच्यते-जातिशब्दात्, जातिशब्दा हि नैकस्यामेव जात्याधारभूतायां व्यक्तौ वर्तन्ते, किन्त्वनेकस्यामपि, एवं च यत् तत्र शस्विधौ ***जयादित्य***प्रभृतिभिः प्रत्युदाहरणमुपन्यस्तम्-संख्यैकवचनादिति किम्? घटं घटं ददातीति तदप्युपपद्यते। यद्यर्थप्रकरणादिरहितो जातिशब्दो वृत्तावेकार्थो न भवतीति। शकारस्याप्रयोगिणः प्रयोजनमाह-**शकार** इत्यादि। इह नपुंसकशब्देन नपुंसकाभिधायकस्य शब्दस्य वा ग्रहणं स्यादर्थस्य वेति द्वौ पक्षौ, तत्राद्ये पक्षे नपुंसकाभिधायकेन स्याद्याक्षिप्तं नाम विशिष्यते-नपुंसकाभिधायकशब्दान्तान्नाम्न इति, नाम्ना वा नपुंसकाभिधायकं नाम-यन्नपुंसकाभिधायकमिति, तत्र पूर्वस्मिन् पक्षे बहूनि त्रपूणि येषां ब्राह्मणानां तान् बहुत्रपून्, तथाऽतिक्रान्तं त्रपु यैस्तान् अतित्रपून् इत्यत्रापि प्रसङ्गः, द्वितीयपक्षे तु नास्त्यतिप्रसङ्गः, अर्थग्रहणेऽपि न दोषः, अर्थेन हि नामैव विशेषयितव्यम्, अन्यस्याप्रस्तुतत्वाद् असंशब्दितत्वाच्च; एवं त्रिषु पक्षेषु सम्भवत्सु तदन्तपक्षनिराकरणेन द्वावितरौ पक्षावाश्रित्योक्तम्-**नपुंसकस्य सम्बन्धिनोरि**त्यादि ।।५५।।

ल.न्यास—**नपुंसकस्ये**त्यादि-स्त्री च पुमाँश्च स्त्रीपुंसौ "स्त्रियाः पुंसो०" (७.३.९६) इति समासान्तः, न स्त्रीपुंसौ नखादित्वाद् नञोऽदभावः, पृषोदरादित्वात् स्त्रीपुंसशब्दस्य पुंसक आदेशः ।।५५।।

औरीः ।१।४।५६।।

बृ०न्यास—**औरीरि**ति-कार्य-कार्यिणोरभेदनिर्देशः सर्वादेशार्थः, अन्यथा विश्लिष्टावर्णत्वादौकारपरभागस्योवर्णस्य स्यात्, **नपुंसकस्ये**त्यत्रापि पूर्ववद् व्याख्येयम्। **परमकुण्डे** इति-परमे च ते कुण्डे चेति "सन्महत्-परमो०" (३.१.१०७) इति विशेषणसमासस्योत्तरपदार्थप्रधानत्वात् तत्सम्बन्धित्वाद् भवत्येव ।।५६।।

ल.न्यास—**औरीरि**ति-कार्य-कार्यिणोरभेदनिर्देशः सर्वादेशार्थः, अन्यथा "षष्ठ्यान्त्यस्य" (७.४.१०६) इति न्यायाद् विश्लिष्टावर्णस्यौकारस्य स्यात्, यतः अओ इति प्रकृतौ "ऐदौत् सन्ध्यक्षरैः" (१.२.१२) इत्यनेन औकारो निष्पादितः ।।५६।।

अतः स्यमोऽम् ।१।४।५७।।

बृ०न्यास—**अत** इत्यादि। **अत** इति नपुंसकस्य विशेषणमतस्तदन्तप्रतिपत्तिर्भवतीत्याह-**अकारान्तस्ये**ति। तकारः श्रुतिसुखार्थः। अथाकारकरणं किमर्थम्? न चाऽमः सर्वादेशार्थमिति वाच्यम्, "प्रत्ययस्य" (७.४.१०८) इति सर्वादेशस्य सिद्धत्वात्; किञ्च, अन्तादेशेऽपि "समानादमोऽतः" (१.४.४६) इत्यकारलोपे विशेषाभावादित्याह-**अम** इत्यादि। जरामतिक्रान्तमिति **समासे** ह्रस्वे च सति ततः सेरमादेशे**ऽतिजरसं कुलं तिष्ठती**ति प्रथमयोदाहृतम्, द्वितीया तु नोदाहृता, तत्र परत्वान्नित्यत्वाच्च **पूर्वं जरसा**देशेन भाव्यम्। मकारविधानेऽपि दोषाभावः, *समानन्यायेन* तु लाघवार्थममोऽप्यम्करणम्। ननु च *सन्निपातलक्षणो विधिरनिमित्तम्*

इति न्यायादकाराश्रितत्वादमादेशस्य कथं तद्विघातकृज्जरसादेशः? उच्यते-अत एवाम्सम्प्रदायादनित्योऽयमिति विज्ञायते, अन्यथा मकारेणैव कृतत्वादम्सम्प्रदायोऽनर्थक इति। अपरे तु जरसादेशं न मन्यन्ते ।।५७।।

***ल.न्यास*-अतः स्ये**त्यादि। नन्वत्राद्ग्रहणं किमर्थम्? न च वाच्यम्-अद्ग्रहणाभावे दधीत्यत्राप्यमादेशः स्यात्, यतः "अनतो लुप्" (१.४.५९) इति सूत्रं बाधकं विद्यत इति। ननु अनत इत्यत्र पर्युदासः प्रसज्यो वा नञ् गृह्यत इति संदेहः, न च वाच्यम्-पर्युदासे हि "नामिनो लुप्" (१.४.६१) इति सूत्रं कुर्यात्, तस्मात् प्रसज्य एवेति, कुतः? काष्ठा परं प्रकर्षमध्यापक इत्यत्र क्रियाविशेषणत्वेन आकारादप्यमो लुग् दृश्यते, अतोऽनत इति कर्तव्यमेव, अतः संदेहस्तदवस्थ एव, अतोऽद्ग्रहणेन ज्ञाप्यते-प्रसज्य एव गृह्यते, तथा च पय इत्यादौ लुप् सिद्धा, न त्वमादेशः। **अत** इति नपुंसकस्य विशेषणम्, अतस्तदन्तप्रतिपत्तिर्भवतीत्याह-**अकारान्तस्ये**ति। अम्ग्रहणमुत्तरार्थम्, तेनान्यत् पश्येति सिद्धम् ।।५७।।

पञ्चतोऽन्यादेरनेकतरस्य दः ।१।४।५८।।

***बृ०न्यास*-पञ्चत** इत्यादि-पञ्च परिमाणमस्येति "पञ्चद् दशद् वर्गे वा" (६.४.१७५) इत्यदन्तात् षष्ठी, पञ्चत इत्यन्यादेर्विशेषणं तथा नपुंसकस्येति, तच्चाधिकृतयोः स्यमोरित्याह-**नपुंसकानामि**त्यादि। अन्यादिः पृथग्गणपठितो नास्त्यतस्तत्र कश्चिन्मुह्येदित्युक्तम्-**सर्वाद्यन्तर्वर्तिनामि**ति-सर्वादावयं पठ्यते-'अन्य, अन्यतर, इतर, डतर, डतम' इति, तत्रान्यादयस्तिस्रः प्रकृतयः, डतर-डतमौ प्रत्ययौ। प्रत्ययग्रहणे तु "प्रत्ययः प्रकृत्यादेः" (७.४.११५) इति यस्मात् तौ विहितौ तदादेस्तदन्तस्य कतर-कतमादेर्ग्रहणमित्युदाहरति-**अन्यत् तिष्ठती**त्यादि। **अनेकतरस्ये**ति समानाधिकरणविशेषणा**दन्यादेरि**ति षष्ठी, तया च सम्बन्धिविज्ञानम्, अतोऽन्यादिसम्बन्धिनोः स्यमोर्दो भवतीत्याह-**अन्यादी**त्यादि ।।५८।।

***ल.न्यास*-पञ्चत** इत्यादि-पञ्च संख्या परिमाणमस्य "पञ्चद् दशद् वर्गे वा" (६.४.१७५) इति डत् प्रत्ययः ।।५८।।

अनतो लुप् ।१।४।५९।।

***बृ०न्यास*-अनत** इत्यादि। अथ हे कर्तृ! इत्यादौ निरवकाशत्वात् प्रथमं सेर्लोपे ⁂प्रत्ययलोपलक्षण०⁂ न्यायेन "ह्रस्वस्य गुणः" (१.४.४१) इति गुणः कस्मान्न भवतीत्याह-**लुकमकृत्वे**त्यादि। अथ यत् कुलं तत् कुलमिति परत्वादत्व-सत्वप्रसङ्गात् तद्व्यावृत्तये "त्यदादिभ्यश्च" इति लुब् वक्तव्या, न च नित्या लुप्, अत्व-सत्वे तु लुपि कृते "लुप्यय्वृक्लेनत्" (७.४.१०२) इति स्थानित्वाभावात् प्रत्ययलक्षणप्रतिषेधाद् विभक्त्यभावान्न प्राप्नुत इत्यनित्ये इति वाच्यम्, पूर्वं *लुप्यसत्यामत्वे सति अपवादत्वाल्लुपं बाधित्वा "अतः स्यमोऽम्" (१.४.५७) इत्यम्सद्भावादनत इत्यनुवादकम्, अनुवादकत्वाभावे तु नित्यत्वावकाश एव नास्ति, 'यस्य तु लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम्' एतत् तु पाक्षिकम्, यदा द्वयोर्लक्षणयोः सम्प्रधारणा क्रियते तदा यल्लक्षणप्रवृत्तावपि यस्य द्वितीयस्य लक्षणस्य प्रवृत्तिविघातो नास्ति तत् प्रति न तस्य दौर्बल्यं लक्षणान्तरेण तत्प्रवृत्तिनिवारणात्, यथा वालि-सुग्रीवयोर्युद्धे रामेण वालिनो वधेऽपि न सुग्रीवापेक्षं दौर्बल्यमभिदधति शूरमानिनः, एतद्दर्शनसंश्रयेणोच्यते-यस्य लक्षणान्तरेणेति, यदा त्वेष न्याय आश्रीयते-♦लक्षणान्तरप्रवृत्तिनिमित्तमुपसंहरल्लक्षणं बलवद् भवति, इतरत् तु तदुपसंहृतनिमित्तलक्षणान्तरोपपादित-प्रवृत्तिविघातं दुर्बलमेव, तथा च वासुदेवसहायत्वात् पाण्डवा बलिनो दुर्बलान् धार्तराष्ट्रान् विजिग्यिरे तदा नास्त्येव-यस्य लक्षणान्तरेणेति, उच्यते -⁂अन्तरङ्गानपि विधीन् बहिरङ्गो लुब् बाधते⁂ इत्यत्रापिग्रहणान्नित्यानां च परेषां च लुपा बाधनमिति त्यदाद्यत्वं लुपा बाध्यत इत्याह-**अत्रे**त्यादि-तथा चोच्यते-⁂सर्वविधिभ्यो लोपविधिर्बलवान्⁂ इति ।।५९।।

⁂ **ला.सू. सम्पादितपुस्तके 'लुप्यसत्यां मत्वे' इति पाठो दृश्यते।**

♦ **ला.सू. सम्पादितपुस्तके 'लक्षणान्तरस्य प्रवृत्तिनिमित्त....' इति पाठ उपलभ्यते।**

***ल.न्यास*–अनत** इत्यादि। ननु अनत इति किमर्थम्? न च वाच्यम्-कुण्डमित्यत्रापि स्यात्, "अतः स्यमोऽम्" (१.४.५७) इति बाधकात्, अत्रोच्यते-अनत इत्यस्याभावे "पञ्चतोऽन्यादे०" (१.४.५४) इत्यतोऽन्यादेरित्यागच्छेत्, न च वाच्यम्-अन्याद्यभीष्टौ हि एकमेव योगं कुर्यात्, पूर्वमेकतरवर्जितस्यान्यादेर्ग्रहणम्, इह तु एकतरस्यापीति पृथग्योगस्य साफल्यात्। हे कर्तृ! इत्यादौ परत्वात् प्रथमं सेर्लोपे ⁂प्रत्ययलोपलक्षण⁂ न्यायेन "ह्रस्वस्य गुणः" (१.४.४१) इति गुणः कस्मान्न भवतीत्याह–**लुकमकृत्वे**ति ।।५९।।

जरसो वा ।१।४।६०।।

***बृ०न्यास*–जरसो वे**ति-(एतदुपरिन्यासो न दृश्यते) ।।६०।।

ल.न्यास*–जरस** इत्यादि। **अन्ये** त्विति-उत्पलादयः*** ।।६०।।

नामिनो लुग् वा ।१।४।६१।।

***बृ०न्यास*–नामिन** इत्यादि। नामिन इत्यधिकृतस्य नपुंसकस्य विशेषणम्, तत्र च तदन्तविधिरित्याह-**नाम्यन्तस्ये**त्यादि। अथानुवर्तमानयैव लुपा सिद्धं किं लुग्ग्रहणमित्याह-**लुपैवे**त्यादि-तेन लुक्पक्षे "लुप्यव्ह्लेनत्" (७.४.११२) इति स्थानिवद्भाव-प्रतिषेधाभावे स्थानिवद्भावात् "ह्रस्वस्य गुणः" (१.४.४१) इत्यादिर्भवतीति तथैवोदाहृतम् ।।६१।।

ल.न्यास*–नामिन** इत्यादि। **प्रियतिसृ कुलमि**ति–"ऋदुशनस्-पुरु०" (१.४.८४) इत्यत्र घुटः सेर्ग्रहणादत्र क्लीबत्वेन घुट्त्वाभावे सेः स्थानित्वेऽपि न डाः। नेच्छन्त्येके ***देवनन्द्यादयः। ***इच्छन्त्यन्ये उत्पलादयः*** ।।६१।।

वाऽन्यतः पुमांष्टादौ स्वरे ।१।४।६२।।

***बृ०न्यास*–वाऽन्यत** इत्यादि। नामिन इति वर्तते, तद् यथा नपुंसकस्य विशेषणं तथाऽन्यत इत्यपि, तच्च षष्ठ्यन्तमप्यर्थ-वशात् प्रथमान्ततया विपरिणम्यत इत्याह-**यो नाम्यन्त** इत्यादि। अन्यत इति व्याचष्टे-**विशेष्यवशादि**ति। अन्यत इति सामान्या-भिधानेऽपि तदन्यद् विशेष्यमेव विज्ञायते, विशेष्यादन्यतो लिङ्गाभावात्। अयमभिप्रायः-इह द्विधा लिङ्गव्यवस्था, केषाञ्चित् स्वत एव लिङ्गम्, यथा-दधि-मध्वादिजातिशब्दानाम्, केषाञ्चिदन्यतो विशेष्यात्, यथा-गुण-क्रिया-द्रव्य-सम्बन्धनिमित्तानां पट्वादिशब्दानाम्, ते हि विशेष्यलिङ्गमुपाददते, न तेषां स्वतो व्यवस्थितं किञ्चिल्लिङ्गमस्ति, तथाहि-'पटुः पुमान्, पट्वी स्त्री, पटु कुलम्' इति विशेष्यत एव लिङ्गं दृश्यते, न स्वत इति, अतोऽन्यत इति गुण-क्रिया-द्रव्य-सम्बन्धनिमित्तप्रवृत्तिः शब्दोऽभिधीयत इति; अन्यतो नपुंसक इत्युच्यमानेऽपि नपुंसकोपादायिना शब्देन तदैव पुंस्त्वोपादानाभावः। अथ विशेषणस्योपलक्षण एवोपक्षीणत्वात् कार्ये सन्निधानाभावात् स्त्रियामपि पुंभावः स्यादिति चेत्? न-⁂परार्थे प्रयुज्यमानः शब्दो वतिमन्तरेणापि वत्यर्थं गमयत्येव⁂ यथा-अब्रह्मदत्त इति (अब्रह्मदत्ते ब्रह्मदत्त इति) अत्र हि निर्ज्ञाते झटिति ब्रह्मदत्ते पदार्थैकदेशभूता रूढसम्बन्धाः क्रियागुणास्तानुपलभ्य एव ब्रह्मदत्त इत्युच्यते, समुदायपदार्थवादिनो ह्यवयवेऽपि शब्दप्रवृत्तिरेवम्भूतश्च निर्देश इति नोपपद्यते, नहि नपुंसकस्य स्वतो लिङ्गधर्माः केचित् प्रसिद्धाः सन्तीति, अस्ति तु लोके भाविनो धर्मान् भूतवदुपादाय व्यपदेशः, एष ब्रह्मदत्त इति, लभतामयं प्रतिपद्यतामयं ब्रह्मदत्तधर्मानिति भूतवदुपादाय सोऽयमित्यभिसम्बन्धेन तच्छब्दप्रतिलम्भः, एवमिहापि भाविनो नागमाभावादीन् पुलिङ्गाश्रयान् धर्मानुपादाय वतिमन्तरेणापि नपुंसके तच्छब्दप्रवृत्तिरित्याह-**पुंवद् वा भवती**ति। पुंस्त्वातिदेशेन साध्यमर्थं दर्शयति-**यथा पुंसी**त्यादि-"अनाम्स्वरे नोऽन्तः" **(१.४.६४)** इति नागमः, "क्लीबे" (२.४.९७) इत्यादिह्रस्वत्वं च न भवतीत्ययमर्थः पुंवद्भवतीत्यनेन साध्यते। पुमनुवादेन चात्र न किञ्चित् कार्यं शास्त्रे विहितमस्तीति पुंस्यदृष्टस्य नपुंसककार्यस्यैव नागम-ह्रस्वलक्षणस्य पुंभावेनाभावः प्रयोजनत्वेनोच्यते, न च स्त्रियां तत् संभवतीति।

ग्रामण्येत्यादि-ग्रामणीशब्दात् टादौ स्वरे पक्षेऽनेन पुंवद्भावाद्ध्रस्व-नागमाभावे यथासम्भवं "निय आम्" (१.४.५१) इति ङेरामादेशे "क्ङिब्वृत्तेरसुधियस्तौ" (२.१.५८) इति यत्वम्, तद्विमुक्तपक्षे ह्रस्वत्वं नागमश्चेति; एवम्-**कर्तृणे**त्यादि। **अन्यत** इति-त्रपु-जत्वादिशब्दानां जातिशब्दत्वात्र विशेष्यनिबन्धनं नपुंसकत्वमित्यन्यत इति वचनात् पुंवद्भावो न भवति। "पीङः कित्" (उणा० २१) इति लौ पीलुर्वृक्षः, तस्य विकार-फलेऽणो लुप् ।।६२।।

***ल.न्यास*-वाऽन्यत** इत्यादि। **पुंवद् वे**ति*परार्थे प्रयुज्यमानः शब्दो वतिमन्तरेणापि वत्यर्थं गमयति* यथाऽग्निर्माणवक इति, तथा अत्रापि परार्थो नपुंसकस्तत्र हि प्रयुक्तः पुमानिति। **ग्रामणिने**ति-ननु पूर्वं "क्ङिब्वृत्तेरसुधियस्तौ" (२.१.५८) इत्यादिना यत्वं कस्मात्र भवति? सत्यम्-"इदुतोस्त्रेरीदूत्" (१.४.२१) इत्यत्र स्त्रीवर्जनेन *परमपि इयुव्यत्वादि इदुदाश्रितेन बाध्यते'* इति भणनात्, यद्वा *आदेशादागम* इति न्यायाद् यत्वं बाधित्वा नोऽन्तः। **ग्रामण्ये**ति-ग्रामणीशब्दस्यानेन पुंवत्त्वे ह्रस्वनागमाभावः। **कर्तृणामि**ति-द्वयोरपि "ह्रस्वापश्च" (१.४.३२) इति नाम्, न त्वपुंस्त्वपक्षे "अनाम्स्वरे०" (१.४.६४) इत्यनेन नोऽन्तः, तत्रामो वर्जितत्वात्, द्वितीयप्रयोगो रूपनिर्णयार्थो दर्शितः। न तु तस्य किञ्चिदत्रान्यत् फलम्। **चित्रगवे** इति-अत्र चित्रा गावो यस्येति "क्लीबे" (२.४.९७) ह्रस्वत्वम्, तत् पुंस्त्वे सति निवर्तते, ततश्च "गोश्चान्ते ह्रस्वः०" (२.४.९६) ह्रस्वः, ततो "ङित्यदिति" (१.४.२३) इत्योत्वम्। **कुमार्यै** इति-अत्र यद्यपि कुमारीशब्दः पुंवत् तथापि नित्यस्त्रीविषयत्वादीकारस्य "स्त्रीदूतः" (२.४.२९) इति दैः ।।६२।।

दध्यस्थि-सक्थ्यक्ष्णोऽन्तस्यान् ।१।४।६३।।

***बृ०न्यास*-दध्यस्थीत्या**दि। अस्यतेः "वी सञ्यसिभ्यस्थिक्" (उणा० ६६९) इति थिकि अस्थि, "सञ्जं सङ्गे" इत्यस्मात् पूर्वसूत्रेण थिकि सक्थि, दध्यक्षिशब्दौ च साधितौ, 'दध्यस्थि-सक्थ्यक्ष्णः' इत्यन्तस्य कार्यिणो विशेषणमतष्टादौ स्वर इत्यस्य परत्वमात्रं विज्ञायते, न तत्सम्बन्धित्वमेवेत्याह-**तत्सम्बन्धिनी**त्यादि। अत्र नपुंसकार्थविशिष्टैः दध्यादिभिः स्याद्याक्षिप्तं नाम विशेष्यते तेन दध्याद्यन्तस्यापि नाम्नोऽन् भवतीत्युदाहरति -**परमदध्ना** इत्यादि। ननु सत्यपि तदन्तविधौ दध्याद्यन्तस्यानपुंसकस्य ग्रहणं नोपपद्यते, नपुंसकस्येत्यनुवृत्तेः, नैष दोषः-नात्र नपुंसकस्येत्यनेन प्रकृतं नाम विशेष्यतेऽपि तु श्रुतत्वाद् दध्यादय एव, तदन्तानां त्वेषां दध्यादीनां लिङ्गान्तरेऽपि वर्तमानानां नपुंसकत्वमस्त्येव, तेन नपुंसके वर्तन्ते ये दध्यादयस्तदन्तस्य नाम्नोऽनपुंसकेऽपि वर्तमानस्य ग्रहणमुपपन्नं भवतीत्युदाहरति-**प्रियास्था शुने**त्यादि। यदि तर्हि तदन्तस्य ग्रहणं केवलानां न सिद्ध्यति, अयमप्यदोषः-व्यपदेशिवद्भावात् केवलानामपि भविष्यति, *व्यपदेशिवद्भावोऽनाम्ना* इति च न्यायः, प्रत्ययविधिविषय एवेति नोपतिष्ठते। **अतिदध्ना** इति-दध्यतिक्रान्तयेति समासे तृतीयैकवचनेऽनेनानादेशे सन्निपातलक्षणस्यानित्यत्वात् "स्त्रियां नृतो०" (२.४.१) इति ङीप्रत्यये "अनोऽस्य" (२.१.१०८) इत्यकारलोपे "इवर्णादेरस्वे०" (२.१.२१) इत्यनेन यत्वे अतिदध्न्या स्त्रिया। दध्यादीनां स्वभावेनैव नपुंसकत्वाद् व्यभिचाराभावात् तद्विशेषणमनर्थकम्, उच्यते-यदा ते यदृच्छाशब्दाः क्रियाशब्दा वा सन्तो लिङ्गान्तरे वर्तन्ते तदाऽस्ति व्यभिचार इति तद्व्यवच्छेदार्थं तद्विशेषणमित्याह-**नपुंसकस्ये**त्यादि। अतिदध्ना ब्राह्मणेन वारिणेत्यादौ अन्-नागमयोः सावकाशत्वाद् दध्नेत्यादावुभयप्राप्तौ "स्पर्द्धे" (७.४.११९) इति परत्वादनं बाधित्वा नागम एव प्राप्नोति, उच्यते-परशब्दस्येष्टवाचित्वात् स्पर्द्धे यदिष्टं तद् भवतीति व्याख्यानात् पूर्वविप्रतिषेधेन नाऽऽगमं बाधित्वाऽनादेश एव भवति। यदाऽस्य योगस्योत्तरत्रानुवृत्तिः "अनाम्स्वरे नोऽन्तः (१.४.६४) दध्यस्थि-सक्थ्यक्ष्णोऽन्तस्यान् टादौ" इति, तत्र वाक्यभेदेन 'अनाम्स्वरे' इति सामान्येन नोऽन्तो भवति, दध्यादीनां तु टादौ स्वरेऽन् भवतीति *विशेषविधानेनाऽन्तं बाधित्वाऽनेन भवतीत्याह-**विशेषविधानादि**त्यादि। परत्वं तु यथावस्थितसूत्रापेक्षया नागमस्योक्तमिति ।।६३।।

---

* **ला.सू. सम्पादितपुस्तके 'विशेषविधानान्तं बाधित्वा' इति पाठो वर्तते।**

***ल.न्यास*–दध्यस्थी**त्यादि। कच् न **भवती**ति–"दध्युरः-सर्पिः" (७.३.१७२) इत्यनेन प्राप्तः, "अक्ष्णोऽप्राण्यङ्गे" (७.३.८५) इत्यपि अनित्यत्वान्न। **अतिदध्न्या स्त्रिये**ति–यदाऽत्र "इतोऽक्त्यर्थात्" (२.४.३२) इत्यनेन ङीस्तदा तद्व्यवधानादनेनादेशाभावे 'अतिदध्या' इत्येव भवति, यदा तु दध्यतिक्रान्तं ययेति बहुव्रीहिस्तदा "दध्युरः-सर्पिः०" (७.३.१७२) इत्यनेन कचा भाव्यम्, तस्माद् दध्यतिक्रान्तयेति तत्पुरुष एव न्याय्यः। ननु "दध्यस्थि-सक्थ्यक्ष्णोऽन्" इति क्रियताम्, किमन्तग्रहणेन? सत्यम्-अन्तग्रहणाभावे प्रत्ययत्वात् पदान्तत्वे सति 'दध्या' इत्यत्र "धुटस्तृतीयः" (२.१.७२) इति धस्य दत्वं प्राप्नोति, न च वाच्यम्-व्यपदेशः स्थानी भविष्यति, (आदेशः स्थानीव भविष्यतीति) असद्विधित्वाद् नकारान्तं न स्त्रीत्वे वर्तते, किन्तु 'दधि' इति 'अतिदध्या' इत्यत्र ङीप्रत्ययोऽपि न स्याद्, इत्येवमर्थमन्तग्रहणम् ।।६३।।

अनाम्स्वरे नोऽन्तः ।१।४।६४।।

***बृ०न्यास*–अनामि**त्यादि। नपुंसकस्येति स्यादावित्यस्य विशेषणम्, तेन नपुंसकस्य संबन्धिन्येव यथा स्यादित्याह–**नपुंसकस्ये**त्यादि। "वृण्ग् आवरणे" इत्यस्माद् युजादित्वात् णिचि "स्वरेभ्यः" (उणा० ६०६) इति इप्रत्यये वारि, तत औ, अत्रानवकाशत्वाद् "इवर्णादेरस्वे०" (१.२.२१) इति यत्वं परत्वाद् "इदुतोऽस्त्रे०" (१.४.२१) इतीत्वम् "औरीः" (१.४.५६) इति च बाधित्वानेन नागमे "औरीः" (१.४.५६) इति ईत्वे "रषृवर्णान्नोण०" (२.३.६३) इति णत्वे च वारिणी, एवम्-त्रपुणी इत्यादावपि द्रष्टव्यम्। अथ प्रियातिस्रो यस्य कुलस्येति प्रियत्रिशब्दात् षष्ठ्येकवचने नित्यत्वान्नागमे कथं तिस्रादेश इति, नैवम्-स्थानान्तरप्रवृत्त्या न नागमो नित्य इति द्वयोरन्यत्र सावकाशत्वात् परत्वात् पूर्वं तिस्रादेशे कृते पश्चान्नागम इत्याह–**प्रियतिसृण** इत्यादि। अथ किमर्थमाम्वर्जनम्? नामि नागमे च रूपस्य समानत्वात्, नैवम्-नागमे सति दीर्घत्वाभावाद् 'वारीणाम्' इत्यादयो न सिध्येयुरित्याह–**अनामि**त्यादि। अथ किमर्थं स्वरग्रहणम्? न च वाच्यम्-त्रपुभ्यां त्रपुभिरित्यादौ व्यञ्जनेऽपि नोऽन्तः स्यादिति तद्व्यावृत्त्यर्थमिति, कृतेऽपि नागमे "नाम्नो नोऽनहः" (२.१.९१) इति नलोपभावात्, इह तर्हि 'अतिराभ्याम्, अतिराभिः' इति नागमे सति समुदायभक्तत्वादवयवस्य रैशब्दस्य तेन व्यवधानात् स्यादिविधौ च नलोपस्यासिद्धत्वात् 'आ रायो व्यञ्जने' (२.१.५) इत्यात्वं न भवति। अथ स्याद्याक्षिप्तायाः प्रकृते रैशब्देन विशेषणाद् रैशब्दान्तायाः प्रकृतेरात्वं विधीयत इति नास्ति नागमेन प्रकृतेर्व्यवधानम्, तथापि नकारस्यात्वं प्राप्नोति, तस्मिन् पूर्वस्य यत्वे सति 'अतिर्याभ्याम्' इत्यनिष्टं रूपमापद्येत, नैष दोषः-परत्वात् पूर्वमात्वमेव भविष्यति द्वयोरन्यत्र सावकाशत्वादिति। इह तर्हि 'प्रियतिसृभ्याम्, प्रियतिसृभिः' इति नित्यत्वात् पूर्वं नागमे सति तिसृभावो न प्राप्नोति, नैवम्-अत्राप्युभयोरनित्यत्वात् परत्वात् पूर्वं तिसृभावः, तथाहि-शब्दान्तरप्राप्त्या नागमोऽनित्यः, तिसृभावस्तु नागमेन व्यवधानान्न प्राप्नोतीत्यनित्यः, स हि यद्यपि त्रिशब्दान्तनाम्नो विधीयते, तद्भक्तत्वाच्च नागमोऽव्यवधायकस्तथापि ⁂निर्दिश्यमानस्यादेशा भवन्ति⁂ इति त्रेरेव तिसृभावेन भाव्यम्, स च व्यवहित इति तिसृभावस्याप्राप्तिः, तिसृभावे च कृते ⁂पुनः प्रसङ्गविज्ञानादपि⁂ न भवति, ⁂सकृद् गते विप्रतिषेधे यद् बाधितं तद् बाधितमेव⁂ इति न्यायात्। एवं तर्हि नामादेशे कृते नागमो मा भूदित्येवमर्थम्, तेन त्रपूणाम्, जतूनाम्' इति "दीर्घो नाम्य०" (१.४.४७) इति दीर्घः सिध्यति, असति तु स्वरग्रहणे ⁂कृताकृतप्रसङ्गित्वात्⁂ नागमे सति ह्रस्वाभावान्नामादेशाभावे दीर्घो न स्यादिति। अथ तत्र विहितविशेषणात् कृतेऽपि नागमे नाम् भविष्यति, यद्वा 'अनाम्' इत्याम्प्रतिषेधात् पूर्वं नामादेशे तस्य च स्थानिवद्भावान्नागमाभावे न काचित् क्षतिरिति;, एवं तर्हि स्वरादौ यथा स्यादिह मा भूत्-त्रपु, जतु, ⁂प्रत्ययलोपलक्षणेन०⁂ स्यादिसद्भावात्। अथ "लुप्यव्ह्लेनद्" (७.४.११२) इति प्रतिषेधात् स्यादेरभावान्न भविष्यति, सत्यम्-अत एव स्वरग्रहणात् क्वचित् ⁂प्रत्ययलक्षणं⁂ भवतीति विज्ञायते, तेन 'त्रपो!, प्रियतिसृ कुलम्, प्रियचतसृ कुलम्' इति सिद्धम्। अत एव च "नामिनो लुग् वा" (१.४.६१) इति तदनुवादः कृतः, द्विविधं हि विभक्तेरस्तित्वं मुख्यमौपचारिकं च, तत्र मुख्यं श्रूयमाणायाः, इतरत् तु लुप्तायाः, तत्कार्यस्य ह्यस्तित्वाद् विभक्तिरप्युपचारेणास्तीत्युच्यते तद्यथा-अस्त्यतीतं कर्मेति, अत्र हि अतीतेन कर्मणा यदाहितं फलदानसामर्थ्यं तस्यास्तित्वात् कर्माप्यस्तीत्युक्तम्। तत्र स्यमोः "नामिनो लुग् वा" (१.४.६१) इति लुप्तत्वान्मुख्यं तावदस्तित्वं

नास्ति, लुक्पक्षे प्रत्ययलोपलक्षणादुपचरितमस्तीत्याह-**स्वर** इत्यादि। पूर्वसूत्रे च स्वरग्रहणं टादिसम्बद्धमेवेति नेहानुवर्तनीयमिति। कथं "मर्यादाऽभिविधौ च यः" इति समाहारत्वे नपुंसकत्वात् स्वरे नागमो न भवतीति, उच्यते-समाहारोऽत्र समुदायः, सोऽवयवधर्मेणाभिविध्यवयवत्वादभिविधिर्मर्यादावयवत्वान्मर्यादेति व्यपदिश्यते, ततो विशेषणसमासेन सिद्धम्। "तुबु अर्दने" अतः "तुम्बेरुरुः" (उणा० ८१७) इत्युरौ तुम्बुरुणो (वृक्षस्य) विकारोऽवयवश्चूर्णं "प्राण्योषधिवृक्षेभ्यो०" (६.२.३१) इत्यणि "वृद्धिस्वरेष्वा०" (७.४.१) इति वृद्धौ स्याद्यभावान्नागमाभावे "अस्वयम्भुवोऽव्" (७.४.७०) इत्यवादेशे तौम्बुरवम् ।।६४।।

***ल.न्यास*-अनामि**त्यादि-अनाम् चासौ स्वरश्चानाम्-स्वरः। अथाम्वर्जनात् स्वरे लब्धे स्वरग्रहणं टादावित्यधिकारनिवृत्त्यर्थम्। अन्तग्रहणं विना 'प्रियतिसृणि' इत्यादौ नस्य प्रत्ययत्वं स्यात्, तथा च प्रियतिसृणीत्यादौ ⁂निमित्ताभावे०⁂ इति तिस्रादेशो निवर्तेत, तथा ⁂प्रत्ययाप्रत्ययोः०⁂ इति न्यायेनास्य नकारस्य प्रत्ययस्यापि संभवे वनानीत्यादावेव दीर्घः स्यात्, न तु राजानमित्यादौ। **प्रियतिसृण** इति-यदि पूर्वं नागमः स्यात् तदानीं किं विनश्येत्? यतः ⁂स्वाङ्गमव्यवधायकम्⁂ इति कृत्वा कृतेऽपि नागमे तिस्रादेशो भविष्यति, तत् कथं परत्वादित्युक्तम्? अत्रोच्यते-यस्मान्नागमः समानीतस्तस्य यदि किमपि प्राप्नोति तदानीमयं न्याय उपतिष्ठते, अत्र तु 'प्रियत्रिन्' इत्यस्य न किमपि प्राप्नोति, अपि तर्हि अवयवस्य तिस्रादेशः, ततश्चावयवस्यावयवेन व्यवधानम्, न तु अवयवेनावयविनः, यथा-देवदत्तस्य श्मश्रु न दृष्टं हस्तेन व्यवहितत्वात्, नहि कोऽपीत्थं वदति-यदुत, देवदत्तो न दृष्टः, हस्तेन व्यवहितत्वात्। **तौम्बुरवं चूर्णं** तुम्बुरुणः विकारः "प्राण्योषधि०" (६.२.३१) इत्यादिना अण्, तस्य लुप्, तस्य विकारः, विकारे पुनरण्, तुम्बुरुणो वृक्षस्य विकारश्चूर्णम्, एकस्मिन्नणि वा "अस्वयम्भुवोऽव्" (७.४.७०) इति, परत्वाद् भविष्यतीति न वाच्यम्, पुं-स्त्रीलिङ्गयोरेव सावकाशो नपुंसके तु विशेषविधानादिदं प्राप्नोति। **नामिन इत्येवे**ति-क्लीबे नाम्यन्तस्य सत्त्वे स्यादौ विज्ञानात् कुलयोरित्यत्रैत्वे कृते न नागमः, द्वयोरित्यत्रापि ⁂आदेशादागमः⁂ इति न्यायेन नागमः प्राप्नोति, न-परत्वादन्तरङ्गत्वाच्च "आ द्वेरः" (२.१.४१) इत्यत्वम्, पश्चाद् एत्वे कृते ⁂सकृद्०⁂ इति न्यायः ।।६४।।

स्वराच्छौ ।१।४।६५।।

***बृ०न्यास*-स्वरादि**त्यादि। इह स्याद्यधिकारादन्यस्य शेरभावाज्जस्-शसादेश एव शिर्गृह्यत इत्याह-**जस्-शसादेश** इत्यादि। कुण्डशब्दाज्जसः शसो वा "नपुंसकस्य शिः" (१.४.५५) इति श्यादेशेऽनेन नागमे "नि दीर्घः" (१.४.८५) इति दीर्घत्वे कुण्डानि, एवमन्यदपि। चतुर्-अहन्शब्दाभ्यां पूर्ववच्छ्यादेशे स्वरादिति वचनान्नागमाभावे "वाः शेषे" (१.४.८२) इति वादेशे "नि दीर्घः" (१.४.८५) इति दीर्घत्वे **चत्वारि, अहानि,** एवम्-विमला द्यौर्येष्वहस्सु इति बहुव्रीहौ पूर्ववच्छ्यादेशे **विमलदिवि**। नन्विवर्णादेः 'अनाम्स्वरे नोऽन्तः" (१.४.६४) इति शौ नागमः सिद्ध एव, आकारस्य त्वन्त्यस्य नपुंसके ह्रस्वविधानात् स्थितिरेव नास्तीति 'अतः' इत्येव युज्यते, किं स्वरग्रहणेनात आह-**अत एवे**त्यादि। **उत्तरार्थमि**ति-उत्तरसूत्रे स्वरग्रहणं प्रयोजनवदित्यर्थः ।।६५।।

***ल.न्यास*-स्वराच्छावि**ति। **अत इत्येवे**ति-ननु इवर्णादेः "अनाम्स्वरे नोऽन्तः" (१.४.६४) इति शौ नागमः सिद्ध एव, आकारान्तस्य तु अन्त्यस्य नपुंसके ह्रस्वविधानात् स्थितिरेव नास्तीति 'अतः' इत्येव युज्यते, किं स्वरग्रहणेन? अत आह-**उत्तरार्थमि**ति ।।६५।।

धुटां प्राक् ।१।४।६६।।

***बृ०न्यास*-धुटामि**त्यादि। इह धुट इति नपुंसकस्येत्यस्य विशेषणम्, तत्र तदन्तविज्ञानमित्याह-**तदन्तनपुंसकस्ये**ति। प्रागिति दिक्शब्दत्वात् तद्योगे च पञ्चमीविज्ञानादन्यस्यासम्भवाद् धुट एव विज्ञायत इत्याह-**धुड्भ्य एव प्रागि**ति। पयस्शब्दाज्जसः "नपुंसकस्य शिः" (१.४.५५) इति श्यादेशे शकारात् पूर्वमनेन नागमे "न्स्महतोः" (१.४.८६) इति दीर्घत्वे "शिङ्ङेऽनुस्वारः" (१.३.४०) इत्यनुस्वारे **पयांसि,** एवम्-**यशांसि** इत्याद्यपि द्रष्टव्यम्। ननु 'श्रेयांसि, भूयांसि' इति धुड्लक्षणे नागमे कृते

पुनः प्रसङ्गविज्ञानाद् ऋदुदिल्लक्षणः प्राप्नोतीति तस्य प्रतिषेधो वक्तव्यः, न च ऋदुदिल्लक्षणमयं बाधिष्यत इति वाच्यम्, व्यक्तौ पदार्थे *सकृद्गते विप्रतिषेधे यद् बाधितं तद् बाधितमेव* इति न्यायः प्रवर्तते, आकृतौ तु नास्यावतारः 'इत्युत्तरः?' इत्युभयोर्नागमयोः प्रसङ्गे परस्परप्रतिबन्धादप्रतिपत्तौ प्राप्तायां *स्पर्द्धे परमिष्टं भवति* इति वचनेन पूर्वो नागमो विधीयमान उत्तरकालप्राप्तं निमित्तवन्तं परं नागमं न शकाति बाधितुम्, तथा चोच्यते– *पुनः प्रसङ्गविज्ञानात्* सिध्यतीति, अनागमस्य पूर्वो विधीयते सनागमस्य तु पर इति कथमन्यस्योच्यमानमन्यस्य बाधकं स्यात्? स्यादेतदन्यस्याप्युच्यमानं कार्यमन्यस्य बाधकं भवति, उच्यते–असति खल्वपि सम्भवे बाधनं भवति, अस्ति च सम्भवो यदुभयं स्यात्, क्रमेण च नागमयोर्विधानादन्त्यात् स्वरात् परत्वमपि सम्भवति, यथा–'पचति' इति धात्वपेक्षं तिव्-शवोः, भवतु को दोषः?, द्वयोर्नकारयोः श्रवणं प्रसज्येत, नैवम्-व्यञ्जनपरस्यैकस्य वाऽनेकस्य वा श्रवणं प्रति विशेषाभावात्; ननु चैकस्यैको नकारोऽपरस्य द्वावित्येकत्वप्रतिज्ञाभेदः, श्रुत्यभेदे किं प्रतिज्ञाभेदः करिष्यति?, कथं पुनः श्रुतिभेदाभावः? यावताऽनेकव्यञ्जनोच्चारणेनाधिकः कालो व्याप्यते, एकव्यञ्जनोच्चारणेन त्वल्पः काल इति, उच्यते–*स्वरकालव्यतिरेकेण व्यञ्जनानि कालान्तरं नाक्षिपन्ति* इति दर्शनाश्रयेणैतदुच्यते, यत् तु शास्त्रे व्यञ्जनानां कालः परिगण्यते तद् गुरुलाघवनिरूपणया, अनेकोच्चारणे हि प्रयत्नगौरवं भवति, लौकिके तु प्रयोगे गुरुलाघवानादरात् श्रुत्यभेद उच्यते। अन्ये तु व्यञ्जनानां कालभेदमिच्छन्त्येव। ननु श्रुतिकृतोऽपि भेदोऽस्ति, तथाहि–'श्रेयांसि भूयांसि' इति परस्यानुस्वारे कृते पूर्वनकारस्य श्रवणं प्राप्नोति, अयोगवाहानां स्वरत्वाभ्युपगमात् शिट्त्वाभावात्; कुर्वन्तीत्यत्र परस्य तवर्गान्त्ये कृते पूर्वस्य णत्वमिति; (अनुस्वारस्य) स्वरत्वाभ्युपगमः "औदन्ताः०" (१.१.४) इत्यत्र औकारस्यान्ता इति समासपरिग्रहात्, ते चानुस्वार-विसृष्ट-ऱक-)(पा एव। ननु *वर्णग्रहणे जातिग्रहणात्* द्वयोर्नकारयोरेकोऽनुस्वार आदेशो विधास्यते, नैतदस्ति-जातेः कार्यासम्भवात् तदाधाराया व्यक्तेः कार्यसम्भवात् व्यक्तिलक्षणस्थानिभेदादनुस्वारादेशद्वयप्रसङ्गात्। किञ्च, "म्नाम्०" (१.३.३९) इति-बहुवचनस्यान्यार्थत्वाद् गुणत्वादेकत्वसंख्याया विवक्षितत्वादेकस्यैव नकारस्यानुस्वारः स्यात्, न तु द्वयोः। एवं तर्हि व्यक्तिपदार्थाश्रयपूर्वविप्रतिषेधाद् धुडन्तलक्षणो नागम उदिल्लक्षणं बाधते, 'युवाम्' इत्यत्र "अमौ मः" (२.१.१६) इति मादेशः "औरीः" (१.४.५६) इतीत्ववदिति। पुनः प्रसङ्गविज्ञानं च जातिपक्षानभ्युपगमादत्र न भवति। यद्यप्युक्तम्–'असति सम्भवे बाधनम्' इति, तदपि न–सत्यपि सम्भवे बाधनोपपत्तेः, यथा–'दधि ब्राह्मणेभ्यो दीयताम्, तक्रं कौण्डिन्याय' इति, सत्यपि दधिदानस्य सम्भवे तक्रं निवर्तकं भवति, एवमत्रापि। यद्यपि दृष्टान्ते सामान्यविशेषभावो बाधहेतुः, दार्ष्टान्तिके तु स्पर्द्धे परमेवेति नियमस्तथापि विनापि विरोधेन दृष्टं बाधकत्वमित्युपदर्शनाय दृष्टान्तोपन्यासः। यद्यप्युक्तम्–श्रुतिकृतोऽपि भेदोऽस्ति, तत्र पूर्वनकारस्य श्रवणम्, सोऽप्यदोषः–अयोगवाहानामपि विशेषेणोपदेशात् शिट्त्वात् पूर्वस्याप्यनुस्वारो भवति, ततो द्वयोरनुस्वारयोः श्रुतिं प्रति विशेषाभावः। 'कृषन्ति' इत्यत्रापि "म्नाम्०" (१.३.३९) इति बहुवचनस्य व्याप्त्यर्थत्वात्, पूर्वनकारस्य वर्गान्त्ये तु कृतेऽपरस्यापि वर्गान्त्यः। नैव वा उदिल्लक्षणः प्राप्नोति, 'स्वरात् परः' इति 'धुटां प्राग्' इति च तत्रानुवृत्तेः, न च द्वयोर्नकारयोरेकस्वरापेक्षं परत्वं सम्भवति, 'पचति' इत्यत्र तु शिति परतः शवविधानाद् विकरणव्यवधानमाश्रितमेवेति। अथवेष्टसिद्ध्यर्थं हि पूर्वविप्रतिषेधाश्रयणम्, इह च तदाश्रयणादनिष्टापत्तेः परविप्रतिषेधादुदिल्लक्षण एव भवति। **अतिजरांसि** इति-जरामतिक्रान्तानि कुलानीति "क्लीबे" (२.४.४७) इति ह्रस्वत्वे "नपुंसकस्य शिः" (१.४.५५) इति जसः शसो वा श्यादेशे 'जरसा, कुण्डानि' इत्यत्र तयोः सावकाशत्वादत्रोभयप्राप्तौ नागमं बाधित्वा परत्वाज्जरस् भवति, अत्र हि 'अतिजर इ' इति स्थिते यदि पूर्वं नागमः स्यात् स च प्रकृतिभक्त इति प्रकृतिमेव न व्यवदध्याद्, अवयवस्य तु जरशब्दस्य व्यवधायक इति *निर्दिश्यमानस्यादेशा भवन्ति* इति स्याद्याक्षिप्तनामाधिकारे सत्यपि तदन्तग्रहणे जरान्तायाः प्रकृतेर्योऽवयवो जरशब्दस्तस्य विभक्तौ जरसादेशो विधीयमानो न प्राप्नोति; अथापि स्यात् तथापि सकारात् परस्य नकारस्य श्रवणं स्यात्, तस्मात् परत्वात् पूर्वं जरसादेश एव एष्टव्यः, तस्मिन् कृते धुडन्तलक्षणो नागमः। अथेह लुक् कस्मान्न भवति? अतिजरसं पश्येति, 'अतिजर अम्' इति स्थिते *एकदेशे विकृतस्यानन्यत्वात्* जरशब्दस्य जरसि कृते "अनतो लुप्" (१.४.५९) इति लुप् प्राप्नोति, नन्वतिजरशब्दस्यादन्तत्वात् "अतः स्यमोऽम्" (१.४.५७)

इत्यम्भावेन लुब् बाधिता कथं प्राप्नोति? 'अनत इत्यनुवादकम्' इत्युक्तत्वात्, नैतदस्ति-नात्राम्भावः प्रवृत्तः परत्वान्नित्यत्वाच्च जरसादेशेन बाधितत्वात्, जरसादेशे च कृतेऽनकारान्तत्वादम्भावाप्रसङ्गालुप्प्राप्तिश्चोद्यते। ननु किमर्थमम एव लुप् चोद्यते, म्भावे जरस्भावः (?) (नहि सेर्जरस्भावः) प्राप्नोति 'स्वरे' इत्युक्तेरिति, या पूर्वं लुप्प्राप्तिः साऽपवादेन बाध्यते, कृते तु जरस्भावे ⁎सन्निपात०⁎ परिभाषया, तथाहि-स्वरादिसन्निपातेन जरस्भावो निष्पन्नो नोत्सहते स्वराद्यानन्तर्यं विहन्तुम्। यद्येवम्, 'अतिजरसम्, अतिजरसैः' इत्यप्राप्तिः, 'अतिजरम्, अतिजरैः' इति भाव्यम्, तथाहि-(सेर्भिसश्च) अकारान्तसन्निपातेन स्वरादिरादेशोऽकारान्तविघातिनं जरसादेशं प्रत्यनिमित्तं स्यात्, सन्निपातपरिभाषावशात्। अतिजरसं पश्येत्यत्र तु नाऽकारान्तसन्निपातकृतं स्वरादित्वमिति भवत्येव जरसादेशः, स च स्वरादिसन्निपातनिमित्तत्वादमो लुपं प्रत्यनिमित्तमिति लुबभाव उच्यते, युक्तमेवैतत्, यद् ***भाष्यम्***-"इष्टमेवैतद् ***गोनर्दीयस्य***ेति" तदा "जरसो वा" (१.४.६०) इति सूत्रं नारब्धव्यमेवेति, धुड्जातिराश्रीयते न व्यक्तिरिति किं ***सम्प्रदायमात्र***मुत किञ्चिन्निबन्धनमस्तीत्याह-**धुटामि**त्यादि-काष्ठपूर्वात् तक्ष्णोतेः क्विपि जसः शसो वा श्यादेशेऽनेन नागमे "म्रां धुड्वर्ग्यो०" (१.३.३९) इति वर्ग्यान्ते कृते 'काष्ठतङ्क्षि' इत्यादि ।।६६।।

ल.न्यास-**धुटामि**त्यादि-प्रागित्यनेन सह सम्बन्धाभावाद् धुटामित्यत्र "प्रभृत्यन्यार्थ०" (२.२.७५) इति न पञ्चमी। **गोमन्ति** "ऋदुदितः" (१.४.७०) इत्यनेन परत्वान्नागमेऽनेन नोऽन्तो न भवति ।।६६।।

र्लो वा ।१।४।६७।।

बृ०न्यास-**र्लो वे**ति। धुट इति प्रागिति चानुवर्तते, ततश्च र्लं इति सामान्यनिर्देशेऽपि पञ्चम्येव विज्ञायत इत्याह-**रेफलकाराभ्यामि**ति। ऊर्जयतीति भ्राजादित्वात् क्विपि बहव ऊर्जो येष्विति जसः शसो वा "नपुंसकस्य शिः" (१.४.५५) इति श्यादेशेऽनेन रेफान्नागमे "म्रां धुड्वर्ग्यो०" (१.३.३९) इति वर्ग्यान्त्ये **बहूर्ङ्गि, बहूर्जि**। सुष्ठु वल्गन्तीति क्विपि पूर्ववत् **सुवल्ङ्गि**, सुवल्गि। बहूर्जिरेवेच्छन्त्यन्ये ।।६७।।

घुटि ।१।४।६८।।

बृ०न्यास-**घुटी**ति। 'नपुंसकस्य घुटि परतो नोऽन्तो भवति' इति विधिरेव कस्मान्न भवति? उच्यते-नपुंसके शिमन्तरेणान्यस्य घुट्त्वाभावात् तत्र च "स्वराच्छौ" (१.४.६५) इत्यादिभिर्नागमस्य विहितत्वात् पारिशेष्यादधिकारोऽयमित्याह-**अधिकारोऽयमि**त्यादि। **आपादपरिसमाप्तेः** पादपरिसमाप्तिं यावत्। अत्र हेतुः-**निमित्तविशेषोपादानमन्तरेणे**ति। अधिकारग्रहणं कर्तव्यम्, अधिकारशब्दश्च कर्तृसाधनो भावसाधनो वा, विनियोगो हि लोकेऽधिक़ार उच्यते, स एवेह गृह्यते, अधिकारः क्रियते प्रतियोगं तस्यानिर्देशार्थः, योगे योगे तस्य ग्रहणं मा कार्षमित्येतदर्थम्, किमयमर्थोऽधिकारशब्देन परिगृहीतः? परिगृहीत इति ब्रूमः, कुतः? लोकात्, लोके हि 'अधिकृतोऽसौ ग्रामे, अधिकृतोऽसौ नगरे' इत्युच्यते, यो यत्र व्यापारे गच्छति, शब्देन चाप्यधिकृतेन कोऽन्यो व्यापारः शक्योऽवगन्तुमन्यदतो योगे योगे उपस्थानात्, नहि परिस्पन्दरूपः शब्दव्यापारोऽस्ति; न कर्तव्यम्-वचनरहितालोकव्यवहारादेवैतत्साध्यस्यार्थस्य सिद्धत्वात्, लोके हि निर्दिश्यमानमधिकृतं गम्यते, तद्यथा-'देवदत्ताय गौर्दीयताम्, यज्ञदत्ताय, विष्णुमित्राय' इति, गौरिति गम्यते; अत्र हि सम्प्रदानविभक्त्या सन्निहिता गोकर्मिका ददातिक्रियाऽपेक्ष्यते, अश्रुतकल्पनायाः श्रुतापेक्षणस्य लाघवात्, एवमिहापि "अचः" (१.४.६९) 'घुटि' इति। "ऋदुदितः" (१.४.७०) इत्यादावाकाङ्क्षादिवशात् प्रकृतस्यैव सम्बन्धो भविष्यति, नाप्रकृतस्य, उच्यते-अन्यनिर्देशो निवर्तकस्तस्मादधिकारः, लोके ह्यन्यस्य निर्देशो निवर्तको भवति, तद्यथा-'देवदत्ताय गौर्दीयताम्, विष्णुमित्राय कम्बलः' इति कम्बलो गोनिवर्तको भवति, एवमिहापि-"अनडुहः सौ" (१.४.७२) इति घुटो निवर्तकः स्यादित्यधिकारवचनम्। ननु तत्राप्यधिकारपरिमाणं न ज्ञायते-कियन्तमवधिमधिकारोऽनुवर्तत इति, तस्मादनुबन्धोऽपि कश्चिदासञ्जनीयः,

यावतिथोऽनुबन्धस्तावतो योगानिति वक्तव्यम्, यावतिथो वर्णोऽनुबध्यते तावतो योगानधिकारो वर्तते। अथेदानीं यत्राल्पीयांसो वर्णा भूयांसश्च योगास्तत्र किं कर्तव्यम्? भूयसि प्राग्वचनं कर्तव्यम्-'प्रागमुतः' इति; एतदपि न वक्तव्यम्-सन्देहमात्रमेतद् भवति, सर्वसन्देहेषु चेदमुपतिष्ठते- ❊व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्❊ इति प्रागमुत इति व्याख्यास्यामः। यद्येवं नार्थोऽनेन, केनेदानीमधिकारो भविष्यति? लौकिकोऽयमधिकार इति। ननु चोक्तम्-अन्यनिर्देशो निवर्तक इति, सन्देहमात्रमेतद् भवति, संदेहे च व्याख्यास्यामः-दृष्टानुवृत्तिकत्वाद् घुड् अनुवर्तते, न सिरिति। किञ्चाचार्याचाराच्च, शैलीयमाचार्यस्य-'यत्र पृथगधिकारसूत्रं करोति तत्र विशेषेऽधिकारः सम्बध्यते, पादान्तं चानुवर्तते; यथा-अयमेव घुटीत्यधिकार इति; यत्र तूर्ध्वमप्यनुवर्तते तत्रावधिं निर्दिशति-यथा 'प्राग् जितादण्" (६.१.१३) इत्यण्, यस्तु सर्वत्रानुवर्तते तत्र न पृथग् निर्दिशति-"एदोतः पदान्तेऽस्य लुक्" (१.२.२७) इति पदान्ताधिकार इति; तत्र निवृत्तौ यतते-"स्वरेभ्यः" (१.३.३०) इति, अत्र हि बहुवचनस्य व्याप्त्यर्थत्वादुत्तरत्र नानुवृत्तिः, "सौ नवेतौ" (१.२.३८) इति सत्यपि "श-ष से श-ष-सं वा" (१.३.६) इति वाग्रहणम्, "वाद्यात्" (६.१.११) इति सत्यपि "नित्यं ञ्नित्रोऽण्" (७.३.५८) इति नित्यग्रहणम् ।।६८।।

ल.न्यास-घुटीति। **अधिकारोऽयमिति**-'नपुंसकस्य घुटि परतो नोऽन्तो भवति' इति विधिरेव कस्मान्न भवति? उच्यते-नपुंसकस्य शिमन्तरेणान्यस्य घुट्त्वाभावात्, तत्र च "स्वराच्छौ" (१.४.६५) इत्यादिभिर्नागमस्य विहितत्वात् पारिशेष्यादधिकारोऽयमिति।।६८।।

अचः ।१।४।६९।।

बृ०न्यास-**अच** इति। स्वरादिति धुटां प्रागिति चानुवर्तनात् सनकारस्याञ्चतेः प्राप्तेरभावाल्लुप्तनकारस्य निर्देश इत्याह-**अञ्चतेरिति**। अच इति नोऽन्त इत्यस्य विशेषणाद्, घुटः परत्वमात्रमेव विज्ञायत इत्याह-**तत्सम्बन्धिन्यन्यसम्बन्धिनि वेति**। प्राञ्चतीति क्विपि "अञ्चोऽनर्चायाम्" (४.२.४६) इति नलोपे "दीर्घ-ङ्याब्०" (१.४.४५) इति सिलोपेऽनेन नागमे "पदस्य" (२.१.८९) इति चकारलोपे "युजञ्च-क्रुञ्चो नो ङः" (२.१.७१) इति ङकारे **प्राङ्** ।।६९।।

ऋदुदितः ।१।४।७०।।

बृ०न्यास-**ऋदुदित** इति। शोभना दन्ता यस्येति "वयसि दन्तस्य दतृ" (७.३.१५१) इति दत्रादेशेऽनेन नागमे संयोगान्तलोपे **सुदन्**। करोतेः क्सौ द्विर्वचनादौ कृते सौ **चक्रिवान्**। अथ उदितो धातोः "उदितः स्वरान्नोऽन्तः" (४.४.९८) इत्युपदेशावस्थायामेव नागमविधानात् कृते च नागमे "धुटां प्राग्" (१.४.६६) इत्यनुवर्तनादनेन नागमाभावः, ऋदिल्लक्षणस्तु कस्मान्न भवतीत्याह-**पृथग्योग** इत्यादि। अयमभिप्रायः-तत्र धात्वधिकारे भ्वादेरुदितः "उदितः स्वरान्नोऽन्तः" (४.४.९८) इत्यनेनैव सिद्धत्वादत्रोदितः पृथगारम्भादुदितोऽभ्वादेरेव तत्साहचर्यादुदितोऽपि अभ्वादेरेवेति नियमात् **'सम्राड्'** इत्यादौ न भवति ।।७०।।

ल.न्यास-**ऋदुदीत्यादि। पृथग्योगो भ्वादिव्युदासार्थ** इति-अयमभिप्रायः-"उदितः स्वरान्नोऽन्तः" (४.४.९८) इत्यत्र धात्वधिकाराद् भ्वादेरुदितः "उदितः स्वरान्नोऽन्तः" (४.४.९८) इत्यनेनैव सिद्धत्वादत्र उदितः पृथगारम्भादुदितोऽभ्वादेरेव तत्साहचर्यादुदितोऽपि अभ्वादेरेवेति नियमात् 'सम्राट्' इत्यादौ न भवति ।।७०।।

युञ्रोऽसमासे ।१।४।७१।।

बृ०न्यास-**युञ्र** इत्यादि। 'युञ्रः' इत्यनेन स्याद्याक्षिप्तस्य नाम्नो विशेषणात् तत्र च तदन्तविधेर्भावात् समासेऽपि प्राप्तिरिति **'असमासे'** इति प्रतिषेधोऽर्थवानिति, अयमेव च समासप्रतिषेधो ज्ञापयति-'अत्र प्रकरणे तदन्तविधिरस्ति' इति। **युनक्तेः क्विपि**

सिलोपेऽनेन नागमे संयोगान्तलोपे नस्य "युजञ्चक्रुञ्चः" (२.१.७१) इति ङकारे च **युङ्। अश्वयुग्** इति-अश्वं युनक्तीति क्विपि "ङस्युक्तं कृता" (३.१.४९) इति समासः, अत्र 'असमासे' इति वचनात्र भवति। 'युग्रः' इति ऋकारोऽनुबन्धः किमर्थः? "युजोऽसमासे" इत्युच्यमाने सिद्ध्यत्येवेत्याह-**ऋदिदित्यादि। युजमापन्ना मुनय** इति-युजेः क्रुत्संपदादित्वात् क्विप् ।।७१।।

***ल.न्यास*-युज्र** इत्यादि। **असमास** इति-स्याद्याक्षिप्तस्य नाम्नो युज्र इति विशेषणात् तत्र च तदन्तविधेर्भावात् समासेऽपि प्राप्तिरिति असमासग्रहणम्, इदमेव ज्ञापयति-अत्र प्रकरणे तदन्तविधिरस्तीति ।।७१।।

अनडुहः सौ ।१।४।७२।।

***बृ०न्यास*-अनडुह** इत्यादि। (अनस्पूर्वात् "वहीं प्रापणे" इत्यतः) "अनसो वहे०" (उणा० १००६) इति क्विपि सकारस्य डकारे "यजादि-वचेः किति" (४.१.७९) इति ग्वृति सौ तलुकि "वाः शेषे" (१.४.८२) इति वादेशेऽनेन नागमे "पदस्य०" (२.१.८९) इत्यन्त्यलोपे **अनड्वान्।** प्रिया अनड्वाहो यस्येति, एकत्वे "पुमनडुत्रौ-पयो०" (७.३.१८३) इति कच्प्रसङ्गाद् बहुत्वेन विग्रहे पूर्ववत् स्यादौ **प्रियानड्वान्।** आमन्त्र्यसौ तु "उतोऽनडुच्चतुरो वः" (१.४.८१) इति वत्वे-**हे अनड्वन्!** इत्यादि। सत्यपि *लिङ्ग(नाम)ग्रहणे लिङ्गविशिष्टस्य०* इति न्याये 'अनडुही' इत्यादौ धुडन्तत्वाभावान्न भवतीति ।।७२।।

***ल.न्यास*-अनडुह** इत्यादि। सत्यपि *नामग्रहणे* इति न्याये 'अनडुही' इत्यत्र धुडन्तत्वाभावान्न भवति। ननु 'अनड्वान्' इत्यत्र "स्रंस्-ध्वंस्-क्रस्स०" (२.१.६८) इत्यादिना दकारः कथं न भवति? सत्यम्-प्राप्नोति परं विधानसामर्थ्यान्न भवति ।।७२।।

पुंसोः पुमन्स् ।१।४।७३।।

***बृ०न्यास*-पुंसोरि**त्यादि। "पातेर्डुम्सुः" (उणा० १००२) इति डुम्सौ अन्त्यस्वरादिलोपे सावनेन पुमन्सादेशे "न्स्-महतोः" (१.४.८६) इति दीर्घत्वे "पदस्य०" (२.१.८९) इत्यन्तलोपे **पुमान्।** "नाम्नः प्राग् बहुर्वा" (७.३.१२) इति बहौ **बहुपुमान्।** एकत्वे कच्प्रसङ्गात् प्रियाः पुमांसो यस्येति बहुत्वेन विग्रहे **'प्रियपुमान्'** इत्यादि। प्रकृतेरुदित्त्वात् प्रियाः पुमांसो यस्या इति अधातूदितः" (२.४.२) इति ङीः, सैव प्रकृष्टा "द्वयोर्विभज्ये च तरप्" (७.३.६) इति तरप्यापि च "ऋदुदित्तर-तम-रूप०" (३.२.६३) इति ह्रस्वत्वं पुंवद्भावविकल्पो भवतीत्याह-**पुंसोरि**त्यादि ।।७३।।

***ल.न्यास*-पुंसोरि**त्यादि। **पुंसोरुदित्त्वादि**ति-ननु "पातेर्डुम्सुः" (उणा० १००२) इति उदनुबन्धः कृतोऽस्ति, तेनापि प्रियपुंसीतरेत्यादि रूपत्रयं सेत्स्यति, किमत्रोदनुबन्धेन? उच्यते-यदा अव्युत्पत्त्याश्रयणं तदाऽत्र सूत्रे कृतस्योकारस्य फलम्, व्युत्पत्तौ तु फलमौणादिकस्य, यथा -भवतुशब्दो "भातेर्डवतुः" (उणा० ८८६) इति व्युत्पादितोऽपि सर्वादौ उदनुबन्धः पठितोऽव्युत्पत्तिपक्षार्थम्। **प्रियपुमानिति**-बहुत्वे वाक्यम्, एकत्वे तु "पुमनडुत्रौ०" (७.३.१७३) इति कच् स्यात्। **ङी-ह्रस्व-पुंवद्विकल्पे**ति-ङीर्नित्यं ह्रस्व-पुंवत्त्वयोश्च विकल्पः ।।७३।।

ओत औः ।१।४।७४।।

***बृ०न्यास*-ओत** इत्यादि। **सुगौः, अतिगौः,** कुत्सितो गौः-"किं क्षेपे" (३.१.११०) इति समासे **किंगौः,** न गौः-**अगौः,** "पूजास्वतेः प्राक् टात्" (७.३.७२) इति "न किमः क्षेपे" (७.३.७०) इति "नञ्-तत्पुरुषात्" (७.३.७१) इति च समासान्तप्रतिषेधः। चित्रा गौर्यस्येति "गोश्चान्ते ह्रस्वो०" (२.४.९६) इति ह्रस्वत्वे **चित्रगुः,** अत्र परत्वात् पूर्वं ह्रस्वत्वे कृते पश्चाद् घुट्योकाराभावाद् 'ओतः' इति वचनादौकारो न भवति, वर्णविधित्वात् स्थानिवद्भावो नास्ति। अथ 'हे चित्रगो!' इत्यत्रौकारस्य विद्यमानत्वात् कस्मान्न भवति? उच्यते-सेरभावाल्लाक्षणिकत्वाद् वा न भवति, नह्यस्य "जस्येदोत्" (१.४.२२) इतिवत् साक्षादुच्चारणमस्ति, किन्तु गुण इति

सामान्येन विधानात्। **हे चित्रगव** इति-पूर्ववद् ह्रस्वत्वे "जस्येदोत्" (१.४.२२) इत्योत्वे विहितविशेषणादोकारविधानसामर्थ्याच्चौत्वाभावादवादेशः ।।७४।।

***ल.न्यास*–ओत औरिति। चित्रगुरिति**-अत्र परत्वात् पूर्वं ह्रस्वत्वे कृते पश्चाद् घुटि ओकाराभावाद् 'ओतः' इति वचनादौकारो न भवति, वर्णविधित्वाच्च स्थानिवद्भावो नास्ति। अथ 'हे चित्रगो!' इत्यत्र ओकारस्य विद्यमानत्वाद् *उभयोः स्थानिनोः स्थाने०* इति न्यायेन सेर्व्यपदेशे सति प्राप्नोति कस्मान्न भवति? उच्यते–यदा उकारव्यपदेशस्तदा सेरभावाद् यदा तु सेर्व्यपदेशस्तदा लाक्षणिकत्वान्न भवति।।७४।।

आ अम्-शसोऽता ।१।४।७५।।

***बृ०न्यास*–आ अमित्यादि**। अम्-शस इति षष्ठ्यन्तम् 'अता' इत्यस्य विशेषणमित्याह–**अम्-शसोरकारेणे**ति। स्याद्य-धिकारात् स्यादिसम्बन्धिन एवामो ग्रहणात् त्याद्यमो ग्रहणं न भवतीत्याह–**स्यादावि**त्यादि ।।७५।।

ल.न्यास–आ अमित्यादि। नन्वत्र अतेति किमर्थम्? यत एतद्विनाऽपि 'गाः' इत्यादि प्रयोगजातं "समानानां०" (१.२.१) इति दीर्घे सिद्ध्यतीति, उच्यते–अतेति पदं विना पुल्लिङ्गे"शसोऽता०" (१.४.४९) इति स्त्रीलिङ्गे"लुगातोऽनापः" (२.१.१०७) इति प्रवर्तेयाताम्, ततश्च 'गान्, गः' इत्याद्यनिष्टं स्यात्, स्थिते तु "शसोऽता०" (१.४.४९) इत्यनेनैव दीर्घस्य संनियोगे नकारोऽभाणि। **अचिनवमिति**–अत्र आदौ "समानादमोऽतः" (१.४.४६) इत्यमोऽकारस्यापि लुग् न भवति, तत्रापि स्याद्यधिकारात् ।।७५।।

पथिन्-मथिनृभुक्षः सौ ।१।४।७६।।

बृ०न्यास*–पथिन्नित्यादि**-समाहारद्वन्द्वात् षष्ठी, समाहारेण च समाहार्युपलक्षणमित्याह–**पथिन् मथिन्नि**त्यादि–अत्र घुटीति सम्बन्धात् सीत्यकरणात् सुप् न गृह्यते। "पथे गतौ" "मन्थश् विलोडने" इत्याभ्याम् "पथि-मन्थिभ्याम्०" (उणा० ९२६) इति कितीन्प्रत्यये पथिन् मथिन्, "अर्त्तेर्भुक्षिनक्०" (उणा० ९२८) इति भुक्षिनकि ऋभुक्षिन्, एभ्यः सौ "थो न्थ्" (१.४.७८) इति न्थादेशे "एः" (१.४.७७) इत्याकारेऽनेन नकारस्याकारे "समानानां तेन०" (१.२.१) इति दीर्घादेशे च **पन्थाः। कथमिति**–हे सुपथिन्! इत्यादावामन्त्र्ये नलोपस्य प्रतिषेधात् क्लीबे च पाक्षिकत्वाद् नकारान्तत्वादनेनाकारः कस्मान्न भवति?। समाधत्ते–**अत्रेत्यादि**–अयमर्थः-कृताकृतप्रसङ्गित्वेन "अनतो लुप्" (१.४.५९) इत्याकारात् पूर्वं सेर्लुप्तत्वात् "लुप्यवृल्लेनत्" (७.४.११२) इति च स्थानि-वद्भावस्य प्रतिषेधात् सेरभावात् **सौ** विधीयमान आकारो न भवति। **नकारान्तनिर्देशादि**ति–पन्थानमिच्छति "अमाव्ययात् क्यन् च" (३.४.२३) इति क्यनि नलोपे दीर्घत्वे पथीयतेः क्विपि "अतः" (४.३.८२) इत्यलोपे "व्योः प्वय्व्यञ्जने" (४.४.१२१) इति यलोपे **पथीः**, *नकारान्तनिर्देशादनकारान्तत्वादिह न भवतीत्यर्थः। ***सुखाकरस्त्वकारलोपस्य स्थानिवद्भावाद् व्यवधानादनर्थकत्वाच्च न भवतीति मन्यते, येन ह्यर्थेनार्थवान् पथिशब्दो लोके न तेन पथीः, व्याकरणे रूपवदर्थोऽप्यङ्गीक्रियत इति *स्वं रूपम्०* इत्यत्र रूपावधारणसमये परिग्रहीष्यते, न च तस्य क्यन्नर्थः सम्भवी 'पथिन्' इत्यस्यातदर्थत्वात्, अत एवोच्यते *अर्थान्तरसंक्रमितोऽनर्थकान्न भिद्यते*, तदा तु नकारान्तनिर्देशात् पथिन्शब्दस्यार्थवतो ग्रहणादनकारान्तस्य पथीत्यस्य तदर्थाभावेऽनर्थकत्वान्न भवतीति व्याख्यायते। **पन्था** इत्यादौ सानुनासिकस्याप्यादेशो भवन् "लि लौ" (१.३.६५) इत्यत्र द्विवचनेन ज्ञापितत्वाच्छुद्धस्योच्चारणाद् वा निरनुनासिक एव भवति ।।७६।।

***ल.न्यास*–पथिनित्यादि**-अत्र घुटीति सम्बन्धात् सावितिश्लिष्टनिर्देशेन सुप् न गृह्यते। **पन्था** इति-अत्र सानुनासिकस्याप्यादेशो भवन् "लि लौ" (१.३.६५) इत्यत्र द्विवचनेनैव ज्ञापितत्वाद् निरनुनासिक एव भवति। **पथीरि**ति-पन्थानमिच्छति क्यनि नलोपः, स च "दीर्घश्चियङ्०" (४.३.१०८) इति परे कार्येऽसन्न भवति, यतः "रात् सः" (३.१.९०) इत्यतः प्रागेव यत् सूत्रं तदेवासद् भवति, इदं तु "रात् सः"

---

* ला.सू. सम्पादितपुस्तके 'नकारान्तनिर्देशादकारान्तत्वादिह' इति पाठो दृश्यते।

(२.१.९०) इत्यतः परमिति नासत्, ततः पथीयतीति क्विपि अलोपे यलोपे चेदं रूपम्। नन्वनेनाऽऽत्वरूपे स्यादिविधौ विधातव्ये नलोपस्यासिद्धत्वान्नान्तत्वमस्ति, न च वाच्यम् "अतः" (४.३.८२) इत्यलुकः "स्वरस्य परे०" (७.४.११०) इति स्थानिवद्भावेन नान्तत्वानुपपत्तिरिति, यतः प्रत्यासत्तेर्यन्निमित्तो लुक् विधिरपि यदि तन्निमित्तो भवतीति व्याख्यानात्, अत्र तु अस्य लुक् क्विपि, आत्वं तु सौ प्रत्यये प्राप्नोतीति कृत्वात्र नान्तत्वमस्त्येवेति प्राप्नोत्यात्वम्, सत्यम्-नान्तेति व्यावृत्तिबलादेव न भवति, अन्यथा यत्र कुत्रापि नलोपस्तत्र सर्वत्राप्यमीषां पथ्यादीनां ध्वनीनामनेनाऽऽत्वलक्षणे स्यादिविधौ कर्तव्ये "ण-षमसत्परे०" (२.१.६०) इति न्यायेन नलोपस्यासिद्धत्वे नान्तत्वसद्भावादनेनात्वं भवेदेवेत्यत्र सूत्रे नान्तर्निर्देशोऽनर्थकः स्यात्, तस्माद् यत्र साक्षान्नान्तत्वममीषां भवति तत्रेदं प्रवर्ततेऽन्यत्र तु व्यावृत्तिरिति सर्वं समीचीनम्। तर्हि "दीर्घडयाब्०" (१.४.४५) इति सूत्रेण सेर्लुक् कस्मान्न भवति? यतोऽयमपि स्यादिविधिः, स्यादिविधौ च नलोपोऽसन् भवतीति, सत्यम्-"दीर्घडयाब्०" (१.४.४५) इत्यत्र सावधारणं व्याख्येयम्-व्यञ्जनान्तादेव यदि सिर्भवतीति, विहितविशेषणाद् वा यत्र एभ्यः परः सिर्विहितो भवति तत्र लुग् भवति, अत्र त्वीकारान्ताद् विहितो न व्यञ्जनान्तादिति। तर्हि 'या सा'इत्येवमादिषु सेर्लुक् न प्राप्नोति, सत्यम्-यत्रैतेषां मध्यादेकस्माद् विहितो भवति, कार्यान्तरेषु च कृतेषु पश्चादेतेषामेव मध्येऽन्यतमस्मात् परो भवति, तत्रापि भवति, तेनानयोः प्रयोगयोर्व्यञ्जनान्तात् परो विहितः कार्यान्तरेषु च सत्सु विद्यते आबन्तादिति सेर्लुग् भवत्येव। 'यः सः' इत्यनयोस्तु व्यञ्जनान्ताद् विहितोऽस्ति, परम् "आ द्वेरः" (२.१.४१) इत्यादिकार्येषु कृतेषु सत्सु पश्चादमीषां मध्यादेकस्मादपि परो नास्तीति न सेर्लुक्। **बहुऋभुक्षा** इति-"ऋ-लृति ह्रस्वो वा" (१.२.२) इति ह्रस्वः, स्त्रीत्वाभावादितः कच् न भवति। हे **सुपथिन्!, हे सुपथि!** इति-"क्लीबे वा" (२.१.९३) इत्यनेन वा नस्य लोपः।।७६।।

एः ।१।४।७७।।

***बृ०न्यास*—एरिति**। पथ्यादीनामेकारस्यासंभवाद् 'एः' इति इकारात् षष्ठीत्याह-**एः इकारस्येति**। **सुपन्थानीति**-शोभनः पन्था येष्विती विग्रहे जसि रूपम् ।।७७।।

***ल.न्यास*-एरिति**। पथ्यादीनामेकारस्यासम्भवाद् 'एः' इति इकारात् षष्ठीत्याह-**इकारस्येति** ।।७७।।

थो न्थ् ।१।४।७८।।

***बृ०न्यास*—थो न्थिति**। अनेकवर्णत्वात् सर्वस्य प्राप्तौ 'थः' इति स्थानिविशेषार्थम्, ऋभुक्षिन्निवृत्त्यर्थं च। उदाहरणं तु पूर्वकथितमेवेत्याह-**तथैवोदाहृतमिति** ।।७८।।

***ल.न्यास*-थो न्थिति**-अनेकवर्णत्वात् सर्वस्य प्राप्तौ 'थः' इति स्थानिविशेषार्थमृभुक्षिन्निवृत्त्यर्थं च ।।७८।।

इन् डी-स्वरे लुक् ।१।४।७९।।

***बृ०न्यास*—इन् डीत्यादि**। निमित्तविशेषानुपादाने घुडधिकारस्य निर्णीतत्वात्, 'स्वरे' इति निमित्तविशेषोपादानात्, घुटि च पथ्यादीनामिनो विशेषविधेर्विषयत्वादघुट्स्वर एवावसीयत इत्याह-**अघुट्स्वरादाविति**। **सुपथी** इति-शोभनः पन्था यस्या ययोर्वेति "ऋक्पूःपथ्यपोऽत्" (७.३.७६) इति समासान्तस्य "पूजास्वतेः प्राक् टात्" (७.३.७२) इति प्रतिषेधात्, उणादीनामव्युत्पन्नपक्षस्याश्रयणादिनन्तत्वाभावात् "इनः कच्" (७.३.१७०) इत्यस्याप्यप्रवृत्तेर्नान्तत्वात् "स्त्रियां नृतोऽस्वस्रादेर्ङीः" (२.४.१) इति ङ्याम्, कुलविशेषणत्वे नपुंसकत्वाद् "औरीः" (१.४.५६) इतीकारे वाऽनेनेनो लुक्; एवम्-'सुमथी' इत्यादावपि। **अभेदनिर्देश** इति-भेदनिर्देशे हि "षष्ठ्यान्त्यस्य" (७.४.१०६) इति अन्त्यस्य न एव लोपः स्यादित्यर्थः ।।७९।।

***ल.न्यास*–इन् ङीत्यादि। अघुट्स्वरादाविति**-ङीसाहचर्याद् अघुटीति विशेषणं ज्ञेयम्, तर्हि स्यादिमन्तरेणापि प्राप्नोतीति न वाच्यम्, स्याद्यधिकाराश्रयणात्, ङीग्रहणस्य वैयर्थ्यप्रसङ्गाच्च, निमित्तविशेषानुपादाने घुटीत्यधिकारस्य निर्णीतत्वात् 'स्वरे' इति निमित्तविशेषोपादानाद् घुटि च पथ्यादीनामिनो विशेषविधिविषयत्वादघुट्स्वरे इत्यवसीयते। **सुपथी स्त्री कुले वे**ति-व्युत्पत्तिपक्षे सुभ्वादित्वात्, उणादीनामव्युत्पन्नानि नामानीति पक्षाश्रयणाद् इन्नन्तत्वाभावादिनः कच् न भवति, समासान्तविधेरनित्यत्वाद् "ऋक्पूः०" (७.३.७६) इत्यपि न, नान्तत्वात् "स्त्रियां नृतो०" (२.४.१) इति ङीः ।।७९।।

वोशनसो नश्चामन्त्र्ये सौ ।१।४।८०।।

***बृ०न्यास*–वोशनस** इत्यादि। नकारादादेशात् श्रुतश्चकारोऽन्यस्यासम्भवात् पूर्वसूत्रोपात्तं लुग्लक्षणमादेशान्तरं समुच्चिनोतीत्याह-**नकार** इत्यादि। वष्टेः "वष्टेः कनस्" (उणा० ९८५) इति कनसि "वशेरयङि" (४.१.८३) इति व्यृति उशनस्, तत्रामन्त्र्ये सावनेनान्तस्य नकार-लोपयोः कृतयोः "दीर्घङ्याब्०" (१.४.४५) इति "अदेतः स्यमोर्लुक्" (१.४.४२) इति सेर्लोपे तद्विमुक्तपक्षे च सिलोपरुत्वादौ रूपत्रयम् ।।८०।।

***ल.न्यास*–वोशनस** इत्यादि। यदा ❊सर्वविधिभ्यो लोपः❊ इति न्याय आश्रीयते तदा सेः स्थानिवद्भावेन कार्यम् ।।८०।।

उतोऽनडुच्चतुरो वः ।१।४।८१।।

***बृ०न्यास*–उत** इत्यादि-यद्यपि निमित्तविशेषानुपादाने घुटीत्यधिक्रियते तथाप्युत्तरत्र विशेषग्रहणादामन्त्र्यसिरेवात्रानुवर्तते। सूत्रे सस्वरस्य निर्देशाद् उत्तरत्र वादेशस्य सस्वरस्य विधानात् तत्प्रस्तावात् सस्वर एव भवति। **(हे प्रियानड्वन्!)** प्रिया अनड्वाहो यस्येति, एकत्वे कच्प्रसङ्गाद् बहुत्वेन विग्रहः। **(हे अतिचत्वः!)** चतुःशब्दार्थप्राधान्येनैकामन्त्रणासम्भवे चतुःशब्द उपसर्जनसमास एवोदाहियते। बहुव्रीहौ चतुःशब्दः प्रियशब्दादेवोत्तरः सम्भवति "प्रियः" (३.१.१५७) इति पूर्वनिपातारम्भात्, अन्यत्र तु "विशेषण-सर्वादि-संख्यं०" (३.१.१५०) इति चतुःशब्दस्यैव पूर्वनिपातः संभवतीत्युदाहरति-**हे प्रियचत्वः!** इति। सत्यपि ❊नामग्रहणे लिङ्गविशिष्टस्य०❊ इति 'हे अनडुहि!' इत्यत्र गौरादिनिपातनाद् वत्वाभावः, एवमुत्तरत्रापि ।।८१।।

***ल.न्यास*–उतोऽनडुच्चे**त्यादि-उत्तरत्र शेषग्रहणादामन्त्र्यसिरेवानुवर्तते, न तु विशेषनिमित्तानुपादानाद् घुटीति। सत्यपि ❊नामग्रहणे लिङ्गविशिष्टस्य०❊ इति 'हे अनडुहि!' इत्यत्र गौरादिनिपातनाद् वत्वाभावः, एवमुत्तरत्रापि। चतुःशब्दस्यार्थप्राधान्येन एकामन्त्रणासम्भवे समासे उपसर्जनीभूत एवोदाहियते ।।८१।।

वाः शेषे ।१।४।८२।।

***बृ०न्यास*–वाः शेष** इति। उपयुक्तादन्यः शेष उच्यते, उपयुक्तश्च पूर्वसूत्रे आमन्त्र्यसिरेवात आह-**आमन्त्र्यविहिते**त्यादि।।८२।।

***ल.न्यास*–वाः शेष** इति। **इह शेष** इति-अत्र सूत्रे शेषस्य घुट आघ्रातत्वाद् एतत्सूत्रमुक्तः प्राक्तनसूत्रविषय इति भावः।।८२।।

सख्युरितोऽशावैत् ।१।४।८३।।

***बृ०न्यास*–सख्युरि**त्यादि। इत इति सख्युरित्यस्य स्थानित्वेन विशेषणमित्याह-**सखिशब्दस्ये**त्यादि। "षन भक्तौ" अतः "सनेर्डखिः" (उणा० ६२५) इति डखिप्रत्ययेऽन्त्यस्वरादिलोपे सखि, ततः प्रथमाद्विवचनादौ घुटि अनेनैकारे आयादेशे च **सखायौ** इत्यादि। प्रथमैकवचने "ऋदुशनस्पुरुदंशो०" (१.४.८४) इति विशेषेण डादेशविधानान्नोदाहृतम्। **सख्यौ** इति-सखिशब्दस्य "नारी-

सखी-पङ्गू-श्वश्रू" (२.४.७६) इति निपातनात् सखी, ततो द्विवचनम्। सत्यपि नामग्रहणे ⁂लिङ्गविशिष्टस्य०⁂ इति ⁂एकदेशविकृतस्यानन्यवत्त्वे⁂ अपीति च इत इति वचनान्न भवति, अनयोश्च न्याययोरस्तित्वे इदमेवेद्ग्रहणं ज्ञापकमित्याह-**इदमेवे**त्यादि। अथ शौ सति (⁂आदेशादागमः⁂ इति न्यायाद् ऐत्त्वात् प्रथममेव) नागमेन भवितव्यम्, ततश्च तेन व्यवधानादैकारो न भविष्यति, न च द्वयोरन्यत्र सावकाशत्वात् परत्वादैकारः स्यादिति वाच्यम्, कृतेऽप्यैकारे "क्लीबे" (२.४.९७) इति ह्रस्वत्वे पश्चाद् नागमे दीर्घत्वे च न कश्चिद् दोषः, नैतदस्ति ⁂असिद्धं बहिरङ्गमन्तरङ्गे⁂ इति घुड्निमित्तस्यैकारस्य बहिरङ्गत्वाद् ह्रस्वत्वे कर्तव्येऽसिद्धत्वात्। ननु भवत्वेवं तथापि कृताकृतप्रसङ्गित्वेन नित्यत्वात् पूर्वं नागम एव घुड्व्यवधायको भविष्यति, नैवम्-कृतेऽपि नागमे प्रकृतिभक्तत्वेनाव्यवधायकत्वादैकारोऽपि नित्य इति द्वयोर्नित्यत्वादैकार एव स्यादिति शिप्रतिषेधः ।।८३।।

***ल.न्यास*-सख्युरि**त्यादि। ननु प्रक्रियालाघवार्थं "सख्युरितोऽशावाय्" इति क्रियताम्, किमैत्करणेन? न-"अनेकवर्ण०" (७.४.१०७) इति सकलस्यापि स्यात्। न च ⁂निर्दिश्यमानानां०⁂ इति इत एवायमिति वाच्यम्, यतो विभक्तिसामान्येन सखिशब्दस्य विशेष्यत्वेन इकारस्य विशेषणत्वेन च निर्दिश्यमानत्वाभावात्। **अशावि**ति-अथ शौ सति ⁂आदेशादागमः⁂ इति न्यायाद् ऐत्वात् प्रथममेव नागमेन भाव्यम्, ततस्तेन व्यवधानादैकारो न भविष्यतीति, न च द्वयोरप्यन्यत्र सावकाशत्वादैकारः स्यादिति वाच्यम्, कृतेऽप्यैकारे "क्लीबे" (२.४.९७) इति ह्रस्वत्वे ततो नागमे दीर्घत्वे च न कश्चिद् दोषः, नैवम्-⁂असिद्धं बहिरङ्गम्०⁂ इति घुट्निमित्तस्यैकारस्य बहिरङ्गत्वाद् ह्रस्वत्वे कर्तव्येऽसिद्धत्वात्। ननु भवत्येवं तथापि कृताकृतप्रसङ्गित्वेन नित्यत्वात् पूर्वं नागम इति घुट्व्यवधायको भविष्यति, नैवम्-कृतेऽपि नागमे प्रकृतिभक्तत्वेनाव्यवधायकत्वाद् ऐकारोऽपि नित्य इति द्वयोर्नित्ययोः परत्वादैकार एव स्यादिति शिप्रतिषेधः। **अतिसखीनि** पूजितः सखा येषु कुलेषु, यद्वा सखिशब्दो नपुंसकोऽपि लक्ष्येषु दृश्यते ।।८३।।

ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डा ।१।४।८४।।

***बृ०न्यास*-ऋदुशनसि**त्यादि-समाहारद्वन्द्वात् पञ्चमी। ऋकारान्तस्य "अडौ च" (१.४.३९) इत्यरि प्राप्ते, त्रयाणां तु "दीर्घडयाब्०" (१.४.४५) इति सिलोपे "अभ्वादेरत्वसः सौ" (१.४.९०) इति ("सो रुः" २.१.७२ इति, "रः पदान्ते०" १.३.५३ इति च) दीर्घत्व-सत्व-विसृष्टेषु, सखिशब्दस्य त्वैत्वे प्राप्ते डारम्भः, डकारः "डित्यन्त्यस्वरादेः" (२.१.११४) इति विशेषणार्थः। पुरुं दशतीति "विहायस्सुमनस्पुरुदंशस्०" (उणा० ९७६) इत्यसि **पुरुदंशा**। नञ्पूर्वादीहेः "नञ ईहेरेहेधौ च" (उणा० ९७५) इत्यसि एहादेशे च **अनेहा** ।।८४।।

***ल.न्यास*-ऋदुशनसि**त्यादि-ऋकारान्तस्य "अडौ च" (१.४.३९) इत्यरि त्रयाणां "दीर्घडयाब्०" (१.४.४५) इति सिलोपे "**अभ्वादे**०" (१.४.९०) इति दीर्घत्वे "सो रुः" (२.१.७२) इति रुत्वे च, सखिशब्दस्य तु ऐत्वे प्राप्ते डाऽऽरम्भः। **हे अनेहः!** इत्यत्र "न सौन्धेः" (१.३.५२) इति सन्धिनिषेधः ।।८४।।

नि दीर्घः ।१।४।८५।।

***बृ०न्यास*-नि दीर्घ** इत्यादि। घुटीति नीत्यस्याऽऽधारस्याऽऽधार इत्याह-**घुटि परे यो नकारस्तस्मिन्नि**ति। **स्वरस्ये**ति-अयमभिप्रायः-"एक-द्वि-त्रिमात्रा ह्रस्व-दीर्घ-प्लुताः" (१.१.५) इति 'स्वराः' इत्यनेन संहितायां षष्ठ्यर्थे प्रथमाव्याख्यानात् ⁂ह्रस्व-दीर्घ-प्लुताः स्वराणां स्थाने भवन्ति⁂ इति परिभाषाविज्ञानात् "अवर्ण-कवर्ग-ह-विसर्गाः कण्ठ्याः" इति 'स्रुघ्नः' इत्यत्र सत्यपि घकारस्य कण्ठ्यत्वे दीर्घो न भवति। स्रुचूपूर्वाद्धन्तेः "अचित्ते टक्" (५.१.८३) इति टकि "गम हन-जन०" (४.२.४४) इत्यकारलोपे "हनो ह्रो घ्नः" (२.१.११२) इति घ्नादेशे स्रुघ्नः, तमाचष्टे "णिज् बहुलं०" (३.४.४२) इति णिच् ।।८५।।

***ल.न्यास*–नि दीर्घ** इति। **राजे**ति-स्यादिविधौ कर्तव्ये नलोपस्यासत्त्वात् प्रथमं लुक् न। **सुग्नयते: क्विबि**ति-सुचो हन्ति "अचित्ते टक्" (५.१.८३) अधिकरणे तु "स्यादिभ्य: क:" (५.३.८२) "गम-हन०" (४.२.४४) इत्यलुक्, "हनो ह्नो घ्र:" (२.१.११२) दीर्घविधित्वाद् णे: स्थानिवद्भावो न भवति, सौ "नाम्नो नोऽनह्न:" (२.१.९१) इति नलोप:, तत: "पदस्य" (२.१.८९) इति घलोप: ।।८५।।

न्स्-महतो: ।१।४।८६।।

***बृ०न्यास*–न्स्-महतो**रिति। 'न्स्' इत्यत्र स्वरस्यासम्भवात्, घुटा प्रत्ययेन स्यादित्वादाक्षिप्तं नाम विशिष्यते, विशेषणे च तदन्तविधि:, महच्छब्दस्य च स्वरोऽस्त्येव न तत्र विशेषणात् तदन्तविधिरित्याह–**न्सन्तस्ये**त्यादि। "मह पूजायाम्" अत: "द्रुहि-वृहि-महि-वृषिभ्य: कतृ:" (उणा० ८८४) इति कतृप्रत्यये महत्, महच्छब्दस्तावन्नामत्वं न व्यभिचरति, तत्संनियोगनिर्दिष्टस्य न्सन्तस्यापि नामत्वाव्यभिचारेणैव ग्रहणम् ।।८६।।

***ल.न्यास*–न्स्-महतो**रिति-अत्र औणादिको "द्रुहिवृहि०" (उणा० ८८४) इत्यनेन कतृप्रत्ययान्तो व्युत्पन्नोऽव्युत्पन्नो वा महच्छब्दो ग्राह्य:, यस्तु शत्रन्तस्तस्य महन्नित्येव, न त्वनेन दीर्घ:, ※लक्षण-प्रतिपदोक्तयो:०※ इति न्यायात्, यत: शतृप्रत्ययान्तं महदिति रूपं लाक्षणिकं कतृप्रत्ययान्तं तु प्रतिपदोक्तम्, एतच्च **वत्स-ऋषभा**वूचतु:। **सर्पीषी**ति-अत्र "न्स्-महत:" (१.४.८६) इत्यनेन दीर्घलक्षणे स्यादिविधौ विधातव्ये 'ण-षमसत् परे०" (२.१.६०) इत्यनेन षत्वमसत्। **महत्साहचर्या**दिति-'महत्' इति शुद्धो धातु: क्विबन्तो न सम्भवति, तत्साहचर्यादन्यस्यापि शुद्धधातो: क्विबन्तस्य न भवति, नामधातुस्तु महदपि क्विबन्त: संभवति, अतोऽन्यस्यापि नामधातो: क्विबन्तस्य भवति, महच्छब्दस्तावन्नामत्वं न व्यभिचरति, तत्संनियोगनिर्दिष्टस्य न्सन्तस्यापि नामत्वाव्यभिचारिण एव ग्रहणम्। **महती कुले** इति–श्रेयस: पश्य, श्रेयसी कुले इति तु न दर्श्यते, न्सन्तत्वाभावेन द्व्यङ्गविकलत्वात् ।।८६।।

इन्-हन्-पूषा-ऽर्यम्ण: शि-स्यो: ।१।४।८७।।

***बृ०न्यास*–इन्-हनि**त्यादि। "दमूच् उपशमे" अत: "पञ्चमाङ्ड:" (उणा० १६८) इति डे दण्ड:, सोऽस्त्येषामिति 'अतोऽनेकस्वरात्" (७.२.६) इतीनि जस: शसो वा शावनेन दीर्घत्वे **दण्डीनि।** "सृजंत् विसर्गे" सृज्यत इति "क्रुत्सम्पदादिभ्य:" (५.३.११४) इति क्विप्, "ऋत्विज्-दिश्-दृश्-स्पृश्-स्रज्०" (२.१.६९) इत्यादिज्ञापकनिपातनाद् रत्वे स्रज्, साऽस्ति येषामिति 'अस्तपो-माया-मेधा-स्रजो विन्" (७.२.४७) इति विनि पूर्ववज्जसादौ **स्रग्वीणि। वाग्मीनी**ति प्रशस्ता वागेषामस्तीति "ग्मिन्" (७.२.२५) इति ग्मिनि। इन: प्रत्ययत्वेन केवलस्यासम्भवात् तदन्तस्य ग्रहणमित्याह–**इनन्तस्ये**ति। हन्निति हन्ते: क्विबन्तस्येदं ग्रहणम्, न च हन्ते: केवलस्य क्विब् दृश्यत इति तदन्तमुदाहरति–**भ्रूणहानि,** इत्यादि। भ्रूणपूर्वाद्धन्ते: "ब्रह्म-भ्रूण-वृत्रात् क्विप्" (५.१.१६१) इति क्विपि पूर्ववज्जसादौ **भ्रूणहानि**। बहवो भ्रूणहनो येषु कुलेषु इति बहुव्रीहौ **बहुभ्रूणहानि।** पूषाऽर्यम्णो: स्वप्रधानायां वृत्तौ शेरसम्भवात् तावुपसर्जनसमस्तावुदाहरति–**बहुपूषाणि,** इत्यादि। नन्विन्नादीनां नान्तत्वात् शि-स्योर्घुट्त्वात्, "नि दीर्घ:" (१.४.८५) इत्यनेनैव दीर्घ: सिध्यति, किमनेनेति? उच्यते–※सिद्धे सत्यारम्भो नियमाय※ इति नियमार्थत्वादित्याह–**नियमार्थं वचनमि**ति। नियमश्चेह द्विधा सम्भवति-इन्-हन्-पूषा-ऽर्यम्णां शि-स्योरेव, इन्-हन्-पूषा-ऽर्यम्णामेव शि-स्योरिति, तत्र पाश्चात्ये नियमे शि-स्यो-रिन्नादिभ्योऽन्येषां दीर्घनिवृत्तिरिन्नादीनां पुन: सर्वत्र दीर्घप्रवृत्तिरिति "नि वा" (१.४.८९) "अभ्वादेरत्वस: सौ" (१.४.९०) इति चेन्नादिभ्योऽन्यस्य शि-स्योर्दीर्घारम्भोऽनर्थक: स्यात् तस्मात् पूर्वक एव नियम इत्याह–**एषामि**ति। यद्येषां शिस्योरेव दीर्घ इति नियमसामर्थ्यादेव दीर्घो न भविष्यति (तर्हि) किम् "अहन्पञ्चमस्य०" (४.१.१०७) इत्यत्र हन्वर्जनेन? न च घुट्प्रकरणत्वात् घुट्यैव दीर्घस्य नियमेन निवृत्त्या भाव्यं नान्यत्रेति 'वृत्रहणि' इति सप्तम्येकवचने "ई-ङौ वा" (२.१.१०९) इत्यलोपाभावपक्षे "अहन्पञ्चमस्य क्ङि-क्ङिति" (४.१.१०७) इति दीर्घप्रसङ्ग इति वाच्यम्, योगविभागात्, 'इन्-हन्-पूषा-ऽर्यम्ण:' इत्येको योग:, **'शि-स्यो:'**

इति द्वितीयः, तत्र पूर्वेण योगेन घुटीत्यनुवर्तनाद् इन्नादीनां "नि दीर्घः" (१.४.८५) इति "अहन्पञ्चमस्य क्ति-क्तिङति" (४.१.१०७) इति च दीर्घत्वं प्राप्तम्, घुट्येव दीर्घो भवतीति नियमात् 'वृत्रहणि' इत्यादौ सप्तम्यां दीर्घो निवर्तते, द्वितीयेन तु 'वृत्रहणौ' इत्यादौ घुट्लक्षणः। एकयोगेऽप्यदोषः–अनाश्रितघुट्विशेषणप्रत्ययत्वमात्रसमाश्रयेण शि-स्योर्नियमकरणात्। यद्येवं वृत्रहेवाऽऽचरति वृत्रहायते, दण्डीभूत इति "दीर्घ-श्विव-यङ्-यक्-क्येषु च" (४.३.१०८) इति दीर्घत्वं न प्राप्नोति, नैवम्-प्रकरणादुपान्त्यस्यैव दीर्घस्य व्यावृत्तिर्न स्वरान्तलक्षणस्य। किञ्च, एकस्मिन्नपि योगे घुट्निवृत्तावपि न दोषः, यतो द्विविधो घुट् शिः, स्यमौजसश्च, तत्र शिर्नपुंसकस्य, अन्ये तु स्त्रीपुंसयोरिति, तत्र तुल्यजातीयापेक्षे नियमे समाश्रीयमाणे व्यवच्छेद्याभावादनर्थक एव नियमः स्यादिति नियमविधानसामर्थ्यात् सर्वस्य दीर्घस्य नियमेन व्यावृत्तिरिति, यदाह-***श्रीकय्यटः***-यदि तुल्यजातीयापेक्षो नियम आश्रीयते तदा शेर्नपुंसकलिङ्गसम्बन्धित्वं घुट्त्वं चास्तीति तदाश्रये नियमे विज्ञायमानेऽयमर्थः स्यात्-'इन्नादीनां नपुंसकानां शावेव घुटि दीर्घो भवति, न घुडन्तरे' न च तेषां नपुंसकानामन्यो घुडस्तीति नियमविधानसामर्थ्यात् प्रकरणापन्नं घुट्त्वं, सामर्थ्यप्रापितसन्निधानं च नपुंसकत्वमुभयमप्यविशेषादनपेक्ष्य प्रत्ययमात्रे स्त्री-पुं-नपुंसकसम्बन्धिनी दीर्घत्वव्यावृत्तिः क्रियत इति सर्वमिष्टं सिद्धमिति। "अहन्पञ्चमस्य०" (४.१.१०७) इत्यत्राहन्-ग्रहणं न्यायानुवादकमिति। **अर्थवदि**ति-"ष्ल्रिहि गतौ" अतः "श्वन्-मातरिश्वन्-मूर्धन्-ष्ल्रीहन्०" (उणा०९०२) इत्यनि निपातनाद् दीर्घत्वे ष्ल्रीहन्, अत्र हनोऽर्थवतो ग्रहणात् तेनैव तदन्तविधित्वे, अस्यैव च प्रत्ययान्तरे नियमेन दीर्घत्वव्यावृत्तेः ष्ल्रीहन्नित्येकदेशस्या-नर्थकस्य ग्रहणाभावे नियमाभावात् दीर्घत्वव्यावृत्त्यभाव इत्यर्थः। ननु भवत्वत्र प्रकरणे तदन्तविधिस्तथापीन्निति प्रत्ययग्रहणं भवतीति 'दण्डीनि' इत्यत्रैव दीर्घत्वेन भवितव्यम् ; न तु बहवो दण्डिन एषामिति 'बहुदण्डीनि' इत्यत्र, नैतदस्ति-यत्र हि प्रत्ययस्यैव ग्रहणं तत्रायं न्याय उपतिष्ठते, न चेदं प्रत्ययस्यैव ग्रहणम्, अन्यथा "वाग्मी" इत्यत्रापि दीर्घत्वाभावः स्यात्। ननु मा भूत् तत्रापि दीर्घत्वं का नो हानिरित्याह–**अनिनस्मन्नि**त्यादि ।।८७।।

ल.न्यास–**इन्-हनि**त्यादि। **भ्रूणहानी**ति-हन्निति हन्तेः क्विबन्तस्येदं ग्रहणम्, न च हन्तेः केवलस्य क्विप् दृश्यते इति तदन्तमुदाहरति। **बहुपूषाणी**ति-पूषार्यम्णः स्वप्रधानायां वृत्तौ शेरसंभवात् तौ समासे उपसर्जनभूतावुदाहरति-**एषां शि-स्योरेवे**ति-एषामेव शि-स्योरिति विपरीत-नियमस्तु न भवति "वंश्य-ज्याय०" (६.१.३) इत्यत्र युवेति "पराणि काना०" (३.३.२०) इत्यत्र तु पराणीति निर्देशात्। **वृत्रहणावि**ति-संज्ञायां 'पूर्वपदस्था०" (२.३.६४) इत्यनेन, असंज्ञायां तु "कवर्गैकस्वरवति" (२.३.७६) इति णत्वम्। **तदन्तविधिमि**ति-ननु ⁎अनिनस्मन्०⁎ इत्यत्रातोरनिर्देशात् अनर्थकेन तदन्तविधेरप्रयोगात् ⁎अर्थवद्ग्रहण⁎ न्यायात् 'कियान्' इत्यत्रैव दीर्घः प्राप्नोति, न गोमानित्यादौ, सत्यम्-अतुरनर्थकोऽपि तदन्तविधिं प्रयोजयति, मत्वादीनामुकारानुबन्धकरणात्, अन्यथा तेषामपि शतृवद् ऋकारमेवानुबन्धं कुर्यात् ।।८७।।

अपः ।१।४।८८।।

बृ०न्यास–**अप** इति। अप्शब्दस्य बह्वर्थवाचित्वाद् द्विवचनैकवचने न सम्भवत इति बहुवचने एवोदाहरणमुपन्यस्तम्। आप्नोतेः "आपः क्विप् ह्रस्वश्च" (उणा० ९३१) इति क्विपि अपादेशे च अप्, ततो जसि अनेन दीर्घत्वे **आपः**, एवम्-शोभना आपो यस्य यत्र वा तदन्तविधेरिष्टत्वात् सावनेन दीर्घत्वे **स्वाप्**, एवमन्यदपि। बह्व्य आपो येष्विति "पूजास्वतेः प्राक् टात्" (७.३.७२) इति समासान्तप्रतिषेधाभावात् "ऋक्पूःपथ्यपोऽत्" (७.३.७६) इति समासान्तेऽति तेन घुटो व्यवधानान्न भवतीत्याह–**बह्वपा** इत्यादि ।।८८।।

नि वा ।१।४।८९।।

बृ०न्यास–**नि वे**ति। शोभना आपो येष्विति "पूजास्वतेः प्राक् टात्" (७.३.७२) इति समासान्तनिषेधाज्जसः शसो वा श्यादेशे "धुटां प्राक्" (१.४.६६) इति नागमेऽनेन पक्षे दीर्घत्वे **स्वाम्पि, स्वम्पि** ; एवम्–**अत्याम्पि, अत्यम्पि। समासान्तविधे**रिति-

"ऋक्पूःपथ्यपोऽत्" (७.३.७६) इत्यस्येत्यर्थः। ननु 'नि' इति विषयसप्तम्येव घटते, कथमुक्तम्-नागमे सतीति, यतः "धुटां प्राक्" (१.४.६६) इति नागमो विधीयते, स च नपुंसके, नपुंसकं चार्थः, अर्थे च शब्दानुशासनेऽस्मिन् कार्यासम्भवान्नपुंसकाभिधायी शब्दो नागमं विधातुमाश्रयणीयः, स च शब्दः प्रयोगानुगमनीय इति नागमो बहिरङ्गः, अयं तु दीर्घः साक्षादप्शब्दमुच्चार्य विधीयमानो यथोच्चारितस्यैव क्रियमाणोऽल्पाश्रयत्वादन्तरङ्ग इति पूर्वं प्रवर्तते, पश्चात् तु नागम इति, नैवम्-निग्रहणादेव पूर्वं नागम एव भवति, अन्यथा नागमं बाधित्वा पूर्वं दीर्घत्वे *सकृद्गतत्वात्* पश्चान्नागमो न स्यादिति निग्रहणमनर्थकं स्यात् ।।८९।।

अभ्वादेरत्वसः सौ ।१।४।९०।।

***बृ०न्यास*—अभ्वादेरि**त्यादि। अत्वसोरवयवत्वात् समुदायविशेषणत्वात् "विशेषणमन्तः" (७.४.११३) इति तदन्तस्य ग्रहणमित्याह—**अत्वन्तस्ये**त्यादि। **(भवानि**त्यादि-) एतेषां सौ दीर्घत्वे नागमे "पदस्य" (२.१.८९) इत्यन्तलोपः। **(अप्सराः**, इत्यादि-) आप्नोतेः "आपोऽपाऽप्ता-ऽप्सरा-ऽब्जाश्च" (उणा० ९६४) इत्यसि अप्सरादेशे च अप्सरस्, "अगु गतौ" अस्य "विहायस्सुमनस्पुरुदंशस्पुरुरवोऽङ्गिरसः" (उणा० ९७६) इति निपातनादसि अङ्गिरस्, चन्दतेः "चन्दो रमस्" (उणा० ९८६) इति रमसि चन्द्रमस्, शृणातेः "मिथि-रञ्जयुषि०" (उणा० ९७१) इति कित्यसि ततः स्थूलशब्देन बहुव्रीहिः, मन्यतेरसि सुशब्देन बहुव्रीहिः, एतेषामसन्तत्वात् सौ दीर्घः। नन्वसोऽर्थवतो ग्रहणात् 'पिण्डग्रस्' इत्यादौ धात्वेकदेशस्यानर्थकत्वाद् दीर्घो न भविष्यति, किं भ्वादिवर्जनेनेत्याह—**अर्थवदि**त्यादि-खरपूर्वस्य नासिकाशब्दस्य "खर-खुरान्नासिकाया नस्" (७.३.१६०) इति नसादेशेऽनर्थकस्यापि तदन्तविधित्वेन दीर्घः सिद्ध इति। ननु *अनिनस्मन्* इत्यत्रातोरनिर्दिष्टत्वादनर्थकेन तदन्तविधेरप्रयोगाद् *अर्थवद्ग्रहणे नानर्थकस्य* इति न्यायात् 'कियान्' इत्यत्रैव दीर्घः प्राप्नोति, न 'गोमान्' इत्यादाविति, नैष दोषः-अतुरनर्थकोऽपि तदन्तविधिं प्रयोजयति, मत्वादीनामुकारानुबन्धसामर्थ्यात्, अन्यथा तेषामपि शतृवद् ऋकारमेवानुबन्धं कुर्यादिति। ननु तथापि *तदनुबन्धग्रहणेऽतदनुबन्धस्य ग्रहणं न* इति 'स एवाऽनुबन्धो यस्यासौ तदनुबन्धकः, स चान्यश्चानुबन्धो यस्य सोऽतदनुबन्धक इति' न्यायाद् यत्तदेतदो डावादेर्ग्रहणाप्रसङ्गः, क्तवतोरपि ककारानुबन्धसद्भावाद् ग्रहणाभावः, नैष दोषः-आनन्तर्यलक्षणेऽनुबन्धानुबन्धवतोः सम्बन्धे डावत्-क्तवत्-शब्दस्य डकार-ककारानुबन्धौ प्रत्ययस्य, न त्वतुशब्दस्य, अथवा डकार-ककारावनुबन्धौ प्रत्ययस्य, न तु तदेकदेशस्य, ततश्च प्रत्ययैकदेशग्रहणादव्यापार एव पूर्वोक्तन्यायस्येति। एवं तर्हि गोमन्तमिच्छतीति क्यनि, क्विपि, तदन्तस्य च धातुत्वाहानेः कथं दीर्घ इत्याह—**अधातोरि**त्यादि-अन्यथाऽभ्वादेरित्यपनीय अधातोरित्येव कुर्यात्, न च कृतम्, तस्माद् भ्वादिपठितानामेव वर्जनमित्यर्थः। अतु' इत्यत्र उकारानुबन्धस्य प्रयोजनमाह-**अतु** इत्यादि। पचतीति पचेः "शत्रानशावेष्यति०" (५.२.२०) इति शतरि "कर्तर्यनद्भ्यः शव्" (३.४.७१) इति शवि "लुगस्यादेत्यपदे" (२.१.११३) इत्यलोपे प्रथमैकवचने उदित्करणादत्र ऋदित्त्वाद् दीर्घाभावे नागमे "पदस्य" (२.१.८९) इत्यन्तलोपे **पचन्**, एवम्-**जरन्** इति-"जृषोऽतृः" (५.१.१७३) इत्यतृः ।।९०।।

***ल.न्यास*—अभ्वादेरि**त्यादि। **भवानि**ति-नोऽन्ते सत्यपि *आगमोऽनुपघातेन* इति न्यायाद् भवत्येव दीर्घः ।।९०।।

क्रुशस्तुनस्तृच् पुंसि ।१।४।९१।।

***बृ०न्यास*—क्रुश** इत्यादि। क्रुश इति तुन इत्यस्य तृच्कार्यिणः पञ्चम्यन्तं विशेषणमित्याह-**क्रुश** इत्यादि। "क्रुशं आह्वान-रोदनयोः" अतः "कृसि-कम्यमि०" (उणा० ७७३) इति तुनि गुणे "यज-सृज-मृज०" (२.१.८७) इति षत्वे "**तवर्गस्य श्चवर्ग०**" (१.३.६०) इति टत्वे स्यादौ घुटि अनेन तुनस्तृजादेशे "ऋदुशनस्पुरुदंशो०" (१.४.८४) इति सेर्डादेशेऽन्यत्र "तृ-स्वसृ-नप्तृ" (१.४.३८) इत्यारादेशे **क्रोष्टा** इत्यादि। क्रोष्टारमतिक्रान्त इति तत्पुरुषः-**अतिक्रोष्टा। प्रियक्रोष्टा**-अथ चात्र बहुव्रीहौ तृजादेशे

सति ऋदन्तत्वात् "ऋन्नित्यदितः" (७.३.१७१) इति ऋल्लक्षणः समासान्तः कच् कस्मात्र भवतीत्याह-**बहुव्रीहावित्यादि**-बहुव्रीहाविति कच्प्राप्तिविषयस्य ऋल्लक्षण इति तत्प्रापकलक्षणस्य च स्पर्श इति, अयमर्थः-तृज्भावो हि समासाद् बाह्यं घुटमपेक्ष्य भवन् बहिरङ्ग-स्तदनपेक्षः पुनः समासान्तः कच् समासादेव भवन् अन्तरङ्ग इति ※असिद्धं बहिरङ्गमन्तरङ्गे※ इति बहिरङ्गस्य तृज्भावस्यासिद्धत्वाद् ऋकारान्तत्वाभावात् कच् न भवतीति। **कृशक्रोष्टूनि** इति-कृशाः क्रोष्टारो येष्विति बहुव्रीहौ जसः शसो वा श्यादेशे पुंस्त्वाभावात् तृजादेशाभावः, पुंसीति वचनमन्तरेण च द्वयोरन्यत्र सावकाशत्वात् परत्वात् तृज्भावः स्यादिति, अथ लाघवार्थं "क्रोष्टोः क्रोष्टृ पुंसि" इति किमिति न कृतम्?, एवमपि कृते न काचिल्लक्ष्यक्षतिरिति, नैवम्-तृशब्दस्य विधीयमान आरादेशः क्रोष्टृशब्दस्य न स्यादित्याह-**क्रोष्टोरित्यादि** ।।९१।।

ल.न्यास-**क्रुशस्तुन** इत्यादि-**तृजादेश** इति-आदेश इत्युक्ते सकलस्यापि तुनस्तृजादेशो भवति तथा चोक्तम्-

"एकस्यावयवस्य यो भवति स प्रोक्तो विकारो
बुधैरादेशस्त्वसभूरिव प्रकटितः सर्वोपमर्दात्मकः।।

पुल्लिङ्गविषये इति समासेऽपि यदि पुल्लिङ्गविषय एव, तेन प्रियः क्रोष्टा यस्याः, यस्य वा कुलस्येत्यत्र न भवत्येव आदेशः, अत एव व्यावृत्तिः क्लीबविषये दर्शिता। **क्रोष्टोरिति**-"क्रोष्टोः क्रोष्टृ पुंसि" इति दृश्यम् ।।९१।।

टादौ स्वरे वा ।१।४।९२।।

बृ०न्यास-**टादावित्यादि**। स्वर इति सप्तमी, तत्र च "सप्तम्या आदिः" (७.४.११४) इत्यादिसम्प्रत्यय इत्याह-**टादौ स्वरादाविति**। क्रोष्टुशब्दात् टादौ स्वरादौ पक्षेऽनेन तृज्भावे यथायोगम् "इवर्णादेरस्वे०" (१.२.२१) इत्यादिना रत्वादौ "टः पुंसि ना" (१.४.२४) इत्यादिना नादौ च **क्रोष्ट्रा** इत्यादि। **'क्रोष्टूनाम्'** इति-अत्र क्रोष्टुशब्दात् षष्ठीबहुवचने ※कृताकृतप्रसङ्गित्वात्※ नित्यत्वात् पूर्वं नामादेशे कृते स्वरादित्वाभावात् पश्चात् तृजादेशो न भवतीत्याह-**अत्र त्वित्यादि**। **क्रोष्टून्** इति-अत्र शस्यपि तुन-स्तृजादेशं **कश्चिन्**मन्यते, तन्मतसङ्ग्रहार्थं टादावित्युच्यते, अन्यथा स्वर इति निमित्तविशेषोपादानाद् घुटीत्यधिकाराभावात् टादिसंप्रत्ययो भवत्येव, तेन टाया आदिष्टादिरिति शसोऽपि सङ्ग्रहः सिद्ध इति। अथ किमर्थोऽयं तुनस्तृजादेशः? क्रुशेस्तृच्प्रत्ययेनैव सिद्धत्वात्, अथोच्येत-तृप्रत्ययान्तः क्रियाशब्दो न मृगवचनः, तुन्प्रत्ययान्तः पुनर्मृगे रूढः, तत्र तृप्रत्ययान्तेनापि मृगाभिधानं यथा स्यादित्येव-मर्थमादेश इति, नैतदस्ति-तुन्-प्रत्ययान्तवत् तृप्रत्ययान्तोऽपि रूढ्या मृगं ब्रूयाद्, यथा-परिव्राजको दात्रं प्रकार इति णकादिप्रत्ययान्ता अपि क्रियाशब्दा भवन्ति, अन्यथाऽनेन तृजादेशे सावोचदिति तृप्रत्ययान्त एव ब्रूयादिति, अथ ब्रूयादविशेषोपदेशादुभयोरविशेषेण प्रयोगः स्यादिति तन्निवृत्त्यर्थ आदेश इति, तत्र-अविशेषोपदेशेऽपि हि विशेषेणैव प्रयोगो दृश्यते, यथा घरतिरविशेषेणोपदिश्यते "घृं सेचने" इति, अथ च विशेषेणैव प्रयुज्यते-घृतम्, घृणा, घर्म इति, यतः प्रयुक्तानां शास्त्रेणान्वाख्यानम्, न त्वस्मादपूर्वशब्दप्रतिपत्तिरिति विशेषविषयत्वं भविष्यति, अनेनैव च न्यायेन "अस्ति-ब्रुवोर्भू-वचावशिति" (४.४.१) इत्यादीन्यपि प्रत्याख्येयानीत्याह-**यद्यपीत्यादि**-अयमर्थः-आदेशविषयादन्यत्र क्रोष्टृशब्दः प्रयुज्यमानः क्रोष्टृभ्यामित्यादौ क्रियामेवोपाददानो दृश्यते, अन्वाख्यानं तु यतो दृष्टस्यैव, तत्रासत्यादेशवचने 'क्रोष्टृ' इत्यस्य मृगवाचित्वं दुर्विज्ञेयम्, मृगे प्रयुज्यमानमप्यपप्रयोगं मन्यते; अथ कथञ्चित् तृप्रत्ययान्तो मृगवाचित्वेन प्रतिपन्नस्तथापि प्रयोगनियमो दुर्विज्ञानः-'तृप्रत्ययान्त एव मृगवाची पुंसि घुटि स्त्रियां च टादौ स्वरे चोभयम्, अन्यत्र क्रोष्टुशब्द एव मृगवाची, अमृगवाची पुनः क्रोष्टृशब्दः सर्वत्र इत्ययं विचित्रप्रयोगमनुसृत्य (नियमः) दुष्करः, शास्त्रानुसारेण विशेषेणैव प्रतिपद्यते, एवम्-"अस्ति-ब्रुवोर्भू-वचावशिति" (४.४.१) इत्यादयोऽपि अशिदादिविषयेऽस्त्यादीनां प्रयोगो मा भूदिति प्रयोगे नियमार्था एव विधीयन्ते, अबुधबोधार्थं तु किञ्चिद् वचनेन प्रतिपाद्यते, न्यायव्युत्पादनार्थं तु सूत्रकृतः किञ्चित् प्रत्याचक्षते। नह्यत्रैकः पन्थाः समाश्रीयत इति ।।९२।।

***ल.न्यास*–टादावित्यादि। नित्यत्वादिति**- ❊कृताकृतप्रसङ्गि❊ न्यायेनेति। 'क्रोष्टृन्' इत्यपि कश्चित् तन्मतसङ्ग्रहार्थं टाया आदिष्टादिरिति व्याख्यानं कर्तव्यम्। **मृगवाची**ति-मृगशब्दस्यारण्यपशुवाचित्वेऽपि शृगाल एवार्थेऽत्र वृत्तिर्दृश्या। **दुर्विज्ञान** इति– ननु यदा ऋदन्तेन प्रयोजनं तदा तृचि, यदा तु उदन्तेन तदा तुनि साध्यसिद्धिर्भविष्यति, किं तृजादेशविधानेन? सत्यम्-'शेषे घुटि पुंसि (स्त्रियां) च नित्यम्', 'टादौ स्वरे वा' इत्येतस्माद् विषयादन्यत्रापि तृच्प्रत्ययः स्यात्, स्थिते तु यत्र तुनस्तृजादेशस्तत्रैव मृगवाचित्वम्, तृचि प्रत्यये तु क्रियाशब्दत्वमिति नियमसिद्धिः। **तथापि प्रयोगनियम** इति-अथ परो ब्रूते-'क्रोष्ट्रा, क्रोष्ट्रे, क्रोष्टुः, क्रोष्टुः, क्रोष्ट्रोः, क्रोष्ट्रोः' इत्याद्यर्थं तृच् आनेष्यते, न च वक्तव्यम् तृच्प्रत्ययान्तस्य संज्ञित्वं न प्रतीयते, भीरु-रमणीत्यादिवत् प्रतीयते एव, 'क्रोष्टुना, क्रोष्टवे' इत्यर्थं तुन् विधायिष्यते एव, अतो निरर्थकं सूत्रमिदम्, न-यद्यपि तृप्रत्ययान्तस्यापि मृगवाचित्वमुन्मज्जति तथापि प्रयोगनियमो दुर्घटः, सूत्रं विना न ज्ञायते-कस्मिन् विषये तुन्, कस्मिन् विषये तृच्, यदा व्यञ्जनादावपि तृच् स्यात् तथा चानिष्टानि रूपाणि स्युः-'क्रोष्टृभ्याम्, क्रोष्टृभिः, क्रोष्टृषु' इति, इष्टानि तु तुन्नन्तान्येव व्यञ्जनादौ, कृते सूत्रे मृगे वाच्ये टादौ स्वर एव तृः, पूर्वेण घुट्येव तृः, अन्यत्र तुन्नेव, क्रियाशब्दस्य तु सर्वत्रास्त्येव तृच्। **तथापी**ति-तुन्नन्तो मृगवाच्येव तृच्प्रत्ययान्तस्तु कस्मिन् विषये मृगवाचीति न ज्ञायते, तुनः स्थानप्रवृत्तेन तु तृचा ज्ञाप्यते-यत्र घुटि टादौ स्वरादौ च तृच् तत्रैव मृगवाचित्वम्, तेन मृगे वाच्ये क्रोष्टृभ्यामित्यादि न भवतीति नियमसिद्धिः ।।९२।।

स्त्रियाम् ।१।४।९३।।

***बृ०न्यास*–स्त्रियामिति**। निमित्तविशेषानुपादानेऽपि "क्रुशस्तुनस्तृच् पुंसि स्त्रियां च" इत्येकयोगाकरणाद् घुटीति न संबध्यत इत्याह-**घुटी**त्यादि। मा भूद् घुटीत्यस्यानुवृत्तिः, स्याद्यधिकारस्यानुवृत्तिरस्तु "टादौ स्वरे वा" (१.४.९२) इत्यत्राप्यादिशब्दस्य व्यवस्थावाचित्वात् टादिः स्यादिरेव गृह्यत इति, नैवम्-स्याद्यनुवृत्तौ क्रोष्ट्री भक्तिरस्येति क्रोष्ट्रीभक्तिरिति न सिध्यति, आदेशाभावात्, ❊अन्तरङ्गानपि विधीन् बहिरङ्गा लुब् बाधते❊ इति लुपि सत्यां "लुप्यव्वृल्लेनत्" (७.४.११२) इति स्थानिवत्त्वप्रतिषेधात् प्रत्ययलक्षणाभावात्, "त्रि-चतुरस्तिसृ-चतसृ स्यादौ" (२.१.१) इति पुनः स्यादिविधानाच्च नानुवर्तते स्याद्यधिकार इत्याह-**अत्रे**त्यादि। ननु स्त्रियामीकारस्यावश्यंभावित्वादीकार एवायमादेशो भविष्यति, कथमुक्तं निर्निमित्त इति?, न वाच्यम्-ईकारानिर्देशात्, ननु प्रश्लिष्टनिर्देशान्निर्दिष्ट एव-स्त्री+ई-स्त्रीति स्त्रिया ई स्त्रीत्वस्य द्योतक ईकार इत्यर्थः, अर्थगतं स्त्रीत्वमीकारे आरोप्य "स्त्रीदूतः" (१.४.२९) इत्याम्, तत्रेतरेतराश्रयं भवति-आदेशानिमित्त ईकारस्तदाश्रयश्चादेश इति, इतरेतराश्रयाणि च न प्रकल्प्यन्ते, अस्मादेव ज्ञापकाद् भवत्यत्रेकारः, यदयमीकारे आदेशं शास्ति, तथापि पञ्चभिः क्रोष्ट्रीभिः क्रीत इति पञ्चक्रोष्ट्रीशब्दाद् इकणः "अनाम्यद्विः०" (६.४.१४१) इति लुपि "ङ्यादेर्गौणस्या०" (२.४.४५) इति ङीनिवृत्तौ प्रत्ययलोपलक्षणप्रतिषेधादीकारनिमित्तस्तृजादेशो न प्राप्नोति, अन्तरङ्गाणां च विधीनां लुपा बाधनात् पूर्वमेव तृजादेशो न लभ्यते, पुंवद्भावाद् वा, तस्मान्निर्निमित्त एवायमादेशः। नन्वेवं सत्यपि इकणि परे "जातिश्च णि-तद्धितय-स्वरे" (३.२.५१) इति पुंवद्भावः प्राप्नोति, तस्मिंश्च स्त्रीत्वाभावात् तृजादेशो न स्यात्, नैवम्-"प्रत्ययः प्रकृत्यादेः" (७.४.११५) इति हि यस्माद् 'इकण्' विधीयते तदादेरेवासौ स्वनिमित्तं कार्यं जनयति, न तूनाधिकस्य, अत्र हि समासाद् इकण् विहितः, स कथमूनस्य क्रोष्ट्रीत्यस्य पुंवद्भावं प्रवर्तयितुं पारयति?, अन्तरङ्गाणां च विधीनां लुपा बाधनाद् वा पुंवद्भावानवकाशः। ननु तथापि इकणो लुप्यप्, (इकणः प्लुप्-पित् लुप्,) लुपः पित्त्वस्य पुंवद्भावफलत्वात् "क्यङ्-मानि-पित्तद्धिते" (३.२.५०) इति पुंवद्भावेन स्त्रीत्वनिवृत्तेस्तन्निमित्तस्य तृजादेशस्यापि निवृत्तिः प्राप्नोति, सत्यमेतत्-निर्निमित्तादेशविधानादेव पुंवद्भावो बाध्यते, अन्यथाऽनिमित्तादेशविधानेऽपि तन्निवृत्तौ आदेशस्य निवृत्तिः स्यात्, तत्सनिमित्तादेशेऽपि समानमेव, किं निर्निमित्तादेशविधानेनेत्याह–**अत एवे**त्यादि ।।९३।।

इत्याचार्यश्रीहेमचन्द्रविरचिते स्वोपज्ञतत्त्वप्रकाशिकाप्रकाशे (बृहद्वृत्तौ)
शब्दमहार्णवन्यासे (बृहन्न्यासे) प्रथमस्याध्यायस्य चतुर्थः पादः समाप्तः।।

सोत्कण्ठमङ्गलगनैः कचकर्षणैश्च, वक्त्राब्जचुम्बननखक्षतकर्मभिश्च।
श्रीमूलराजहतभूपतिभिर्विलेसुः, संख्येऽपि खेऽपि च शिवाश्च सुरस्त्रियश्च ।।१।।

(**न्यासानुसन्धानम्**–***श्रीमूलराजहतभूपतिभिः*** संग्रामे मूलराजमारितनृपतिभिः, **संख्ये** संग्रामभूमौ, **शिवाः** शृगालाः, **खे** आकाशरूपे स्वर्गमार्गे, **सुरस्त्रियः** देवाङ्गनाश्च, **विलेसुः** विलासं चक्रुः, संग्रामनिहतशूराणां दिव्यवपुषा स्वर्गश्रवणात्, कथं विलेसुरित्याह –**सोत्कण्ठं** सकौतुकम्, **अङ्गलगनैः** अङ्गसङ्गैः, आलिङ्गनैरित्यर्थः, **कचकर्षणैः** केशाकर्षणैः, **वक्त्राब्जचुम्बननखक्षत-कर्मभिश्च** वक्त्राब्जचुम्बनकर्मभिः–मुखचुम्बनकर्मभिः, नखक्षतकर्मभिः–नखाङ्कनकर्मभिश्च, संख्ये अङ्गलगनादिकं शृगालकर्तृकमेव, खे तु अङ्गलगनमुभयकर्तृकम्, कचकर्षणादिकं भूपतिकर्तृकमिति बोध्यम्। **'सोत्कण्ठमङ्गलगनैः'** इत्येव पाठः साधीयान् प्रतिभाति, **'सोत्कण्ठमङ्गलगतैः'** इति पाठे तु सकौतुकशुभगमनैरित्यर्थः, तच्च गमनं संख्ये शृगालकर्तृकम्, खे तूभयकर्तृकं सम्भवतीति बोध्यम्।। अत्र बीभत्स-शृङ्गारयोः संकरः, दीपकं चालङ्कारः।।)

ल.न्यास–**स्त्रियामि**ति–"स्त्रियां च" इत्येकयोगेऽपि "स्त्रियां च" इत्यसमस्तनिर्देशस्येदं फलम्–यत् 'स्त्रियाम्' इत्युत्तरसूत्रे याति, अन्यथा "पुं-स्त्रियोः" इत्येव कुर्यात्। **निर्निमित्त एवे**ति–ननु निमित्तत्वाश्रयणे ऋकारान्तत्वाभावात् क्रोष्टुशब्दस्य कथं ङीः स्यात्? सत्यम् – गौरादौ पाठात् ङीः स्यादेवेति ङीसिद्धिः, परं निमित्तव्याख्यायां "स्त्रियां ङ्याम्" इति सूत्रं कुर्यात् ।।९३।।

इति मनीषिश्रीकनकप्रभसूरिविरचिते न्याससारसमुद्धारे (लघुन्यासे)
प्रथमाध्यायस्य चतुर्थः पादः समाप्तः।।

:: परिशिष्ट-३ ::

अकारादिक्रमे पारिभाषिक शब्दोनो विस्तृतार्थ

1) ***आमन्त्र्य*** – कोई व्यक्ति आपणी सन्मुख न होय तेने साद विगेरे करी सन्मुख करवो तेने आमंत्राण कहेवाय अने जेने उद्देशीने आमंत्राण करायुं होय ते आमंत्र्य कहेवाय.

2) ***अच्*** – स्वर.

3) ***अजहत्स्वार्थपक्ष*** – वृत्तिमां गौण शब्द पर (प्रधान) शब्दना अर्थनो बोध करावे छे. परंतु शुं ते पोताना अर्थनो त्याग करीने प्रधान शब्दना अर्थने जणावे छे ? के पछी त्याग कर्या विना ? तो अजहत्स्वार्थपक्ष अनुसार ते पोताना अर्थनो त्याग कर्या विना प्रधान शब्दना अर्थने जणावे छे. जेमके राजपुरुष वृत्तिस्थळे गौण राजन् पद पोताना 'राजा' अर्थनो त्याग कर्या विना विग्रहावस्थामां जे 'पुरुष' अर्थ पोताथी बोधित नहोतो थतो तेनो बोध करावे छे. अहीं अजहत्स्वार्थ शब्दनी व्युत्पत्ति ***'न जहति पदानि स्वार्थं यस्मिन् तद् अजहत्स्वार्थम्'*** आ प्रमाणे छे. अहीं प्रश्न थशे के ''जो राजपुरुष वृत्तिस्थळे गौण राजन् पद पोताना अर्थनो त्याग न करे तो ते पोताना अर्थना प्रतिपादनमां तत्पर होवाथी प्रधान 'पुरुष' अर्थनुं प्रतिपादन शी रीते करी शके ?'' परंतु आ प्रश्ननो जवाब विस्तारपूर्ण होवाथी तेने जाणवा वृत्ति शब्दना अर्थमां दर्शावेला ग्रंथो जोई लेवा.

4) ***अतद्गुणसंविज्ञानबहुव्रीहि*** – जे बहुव्रीहिसमासमां विशेष्य अन्यपदार्थनो जे क्रियामां अन्वय थतो होय ते क्रियामां समासना घटकीभूत पदार्थोनो जो अन्वय न थतो होय तो ते अतद्गुणसंविज्ञानबहुव्रीहि समास कहेवाय छे. जेमके चित्रगुमानय स्थळे चित्रा गावो यस्य स विग्रहानुसार चित्रगुः अे बहुव्रीहिसमास पामेल पद छे अने त्यां अन्यपदार्थ चित्र गायोनो स्वामी गोवाळ छे. तो आनयन क्रियामां जेम अन्यपदार्थ गोवाळनो अन्वय थाय छे तेम समासना घटकीभूत चित्र गायोनो अन्वय नथी थतो. अर्थात् चित्रगुम् आनय कहेवाता जेम अन्यपदार्थ गोवाळने लावववामां आवे छे तेम तेनी भेगा चित्र गायोने लावववामां नथी आवती. माटे चित्रगु स्थळे अतद्गुणसंविज्ञानबहुव्रीहि समास छे. जे बहुव्रीहि स्थळे अन्यपदार्थ अने समासना घटकीभूत पदार्थ वच्चे संयोग अने समवाय सिवायना स्व-स्वामीभाव विगेरे संबंधो प्राप्त थता होय त्यां प्रायः अतद्गुण संविज्ञानबहुव्रीहि समास होय छे. आ अंगे विस्तारथी जाणवा 'सर्वादेः स्मै० १.४.७' सूत्रनुं विवरण जोवुं.

5) ***अतिदेश*** – अतिदेश एटले सादश्यने लईने बीजे लागु पडनारी व्याकरणनी प्रक्रिया. आ अतिदेश अनेक प्रकारनो होय छे. जेमके - निमित्तातिदेश, व्यपदेशातिदेश, तादात्म्यातिदेश, रूपातिदेश, शास्त्रातिदेश, कार्यातिदेश, अर्थातिदेश विगेरे.

6) ***अनुकरण*** – અનુકરણ એટલે અનુકાર્ય (= મૂળ વક્તાના શબ્દ) માં જેવા પ્રકારની વર્ણાવલી છે તેવા પ્રકારની જ વર્ણાવલીપૂર્વક પુનઃ ઉચ્ચારાયેલો શબ્દ. જેમકે દૂતના શબ્દો અક્ષરશઃ પોતાના રાજાના કહેણ અનુસાર હોવાથી તે શબ્દોને રાજાના શબ્દોનાં અનુકરણ રૂપે ગણવામાં આવે છે. ભાષાકીય પ્રયોગમાં આ અનુકરણ કરાયેલા શબ્દો પછી મોટાભાગે इति શબ્દનો પ્રયોગ કરવામાં આવતો હોય છે. જેમકે ચૈત્ર 'घटः' આ પ્રમાણે બોલ્યો ત્યારે મૈત્રએ ચૈત્રના શબ્દોનું અનુકરણ કરવું હોય તો તેણે चैत्रः 'घटः' इति अवदत् આમ બોલવાનું રહે. આ અનુકરણ ક્યારેક આખા શબ્દોનું તો ક્યારેક શબ્દોના અંશનું પણ આવશ્યકતાનુસાર કરવામાં આવતું હોય છે. જેમકે 'परिव्यवात् क्रियः ३.३.३७' સૂત્રમાં આખા क्री ધાતુનું અનુકરણ કરી क्रियः રૂપ સાધવામાં આવ્યું છે અને 'संख्या-साय-वेरह्नस्य० १.४.५०' સૂત્રમાં द्व्यह्न શબ્દના અંશભૂત अह्न નું અનુકરણ કરી अह्नस्य રૂપ સાધવામાં આવ્યું છે. આશય એ છે કે એકલો अह्न એવો अ કારાન્ત મૂળ શબ્દ મળતો નથી કે જેને ङस् પ્રત્યય લગાડી अह्नस्य રૂપ સાધી શકાય. તેથી द्व्यह्न શબ્દના અંશભૂત अह्न નું અનુકરણ કરી अह्नस्य રૂપ સાધવામાં આવે છે. બાકી મૂળ શબ્દ તો अहन् છે. અહીં એ ધ્યાનમાં રાખવું કે અનુકરણ કરાયેલ શબ્દ કે શબ્દાંશ 'अधातु-विभक्ति० १.१.२७' સૂત્રાનુસાર સ્વતંત્ર નામ સંજ્ઞાને પામે છે, કેમકે તે ધાતુ, વિભક્તિ કે વાક્ય સ્વરૂપ નથી હોતું અને અનુકરણ શબ્દ કે શબ્દાંશ અનુકાર્ય શબ્દ કે શબ્દાંશ કેવો હતો તેના સ્વરૂપની ઝાંખી કરાવનાર હોવાથી અનુકાર્ય શબ્દના સ્વરૂપાત્મક અર્થનો બોધક હોવાથી અર્થવાન્ પણ બને છે. આમ તેને નામ સંજ્ઞાનો લાભ થતા अह्नस्य અને क्रियः આ પ્રમાણે સ્યાદ્યન્ત પ્રયોગો સાધી શકાય છે. અહીં શંકા થશે કે ''અનુકરણ જો નામ બનતું હોય તો क्रियः સ્થળે क्री અનુકરણ નામ ગણાતા તેના ई નો ધાતુને ઉદ્દેશીને પ્રવર્તતા 'संयोगात् २.१.५२' સૂત્રથી इय् આદેશ શી રીતે થઈ શકે ?'' પરંતુ આ શંકાને અવકાશ નહીં રહે. કેમકે ***'प्रकृतिवदनुकरणम्'*** ન્યાયથી क्री અનુકરણ પોતાની મૂળ પ્રકૃતિ- સદશ (= ધાતુસદશ) પણ ગણાતા તેના ई નો इय् આદેશ સાધી શકાય છે.

7) ***अनुकार्य*** – જેનું અનુકરણ કરવામાં આવે તે.

8) ***अनुप्रयोग*** – દૃષ્ટાંત વિગેરેની પાછળ કરવામાં આવેલ પ્રયોગ.

9) ***अनुबंध*** – વ્યાકરણશાસ્ત્રમાં વપરાતા ધાતુ, પ્રત્યય વિગેરે સાથે જોડાયેલ અમુક સાંકેતિક અક્ષરોને અનુબંધ કહેવાય છે. અનુબંધો 'ઇત્' હોય છે, તેથી તેઓ લૌકિક પ્રયોગમાં ટકતા નથી. પરંતુ તેઓ ગુણ-વૃદ્ધિ ન થવા દેવી, ધાતુને આત્મનેપદ સંજ્ઞા લાગુ પાડવી વિગેરે પોતાની અસર છોડી જતા હોય છે. જેમકે - 'ह्' ધાતુને 'क्त्वा' પ્રત્યય લગાડીએ તો પ્રત્યયમાં રહેલો क् અનુબંધ 'ह्' ધાતુમાં રહેલા ऋ નો ગુણ ન થવા દે. એવી જ રીતે ई કે ग् અનુબંધ જો ધાતુ સાથે જોડાયા હોય અને જો કર્તા ફળવાન હોય તો તેઓ ધાતુને આત્મનેપદ પ્રત્યયોનું વિધાન કરે છે.

10) ***अनुबन्धानैकान्तिकपक्ष*** – एकान्त शब्द 'अवयव' अर्थनो वाचक छे. तेथी न एकान्त = अनेकान्त = अनवयव = જે અવયવ ન બનતો હોય તે. અનુબંધના અનેકાંતપક્ષવાળા કહે છે કે અનુબંધ જેની સાથે જોડાયો હોય તેનો અવયવ બનતો નથી. કેમકે જે અવયવ હોય તે પોતાના અવયવી સાથે સંબદ્ધ હોય છે. જેમકે હાથ, પગ વિગેરે શરીરના અવયવ છે. તો તે અવયવી શરીર સાથે સંબદ્ધ (જોડાયેલા) જોવા મળે છે. અનુબંધ ઈત્ હોવાથી તે જેની સાથે જોડાયો હોય છે તે પ્રત્યયાદિની સાથે પ્રયોગકાળે તે ક્યાંય પણ સંબદ્ધ જોવા મળતો ન હોવાથી અનુબંધ પોતાના સંબંધી પ્રત્યયાદિનો અવયવ બનતો નથી. હવે પ્રશ્ન થાય કે ''જો અનુબંધ અવયવ ન બને તો त (क्त) વિગેરે પ્રત્યયોને कित् આદિ રૂપે ન કહી શકાય ? કેમકે कित् શબ્દનો અર્થ 'क् અવયવ છે ઈત્ જેમાંથી' આવો થાય છે. જ્યારે त (क्त) પ્રત્યયગત क् અનુબંધ અવયવ રૂપ ન હોવાથી ત્યાં कित् શબ્દનો અર્થ ઘટતો નથી. હવે જો त (क्त) પ્રત્યયને कित् ન કહી શકાય તો તે પરમાં વર્તતા પૂર્વના સ્વરના ગુણનો નિષેધ ન થઈ શકે. માટે त (क्त) પ્રત્યયને कित् કહેવડાવવા હવે શું કરવું?'' પરંતુ આ પ્રશ્નનો ઉત્તર આમ સમજવો કે ભલે અનુબંધ વાસ્તવિક રીતે અવયવ ન બને, પણ ***'स्वसमीपोच्चारितेऽनुबन्धे स्वाऽवयवत्वमारोप्यते'*** નિયમાનુસારે તેમાં ઉપચરિત અવયવત્વની કલ્પના કરી શકાય છે. નિયમ એમ કહે છે કે 'અનુબંધ જેની નજીકમાં (અનંતરમાં) ઉચ્ચારાય છે તેના અવયવ રૂપે ઉપચારથી તેને ગણી શકાય છે.' તો त (क्त) પ્રત્યયગત क् અનુબંધ त (क्त) પ્રત્યયની નજીકમાં ઉચ્ચારાતો હોવાથી તેને ઉપચારથી त (क्त) પ્રત્યયના અવયવ રૂપે ગણી શકાય. તેથી त (क्त) પ્રત્યયમાં कित् શબ્દનો 'क् અવયવ છે ઈત્ જેમાંથી' અર્થ ઘટી શકતા તેને कित् કહી શકવાથી તે પરમાં વર્તતા પૂર્વના સ્વરના ગુણનો નિષેધ થઈ શકશે. આમ અનુબંધના અનેકાંતપક્ષવાળા અનુબંધને વાસ્તવિક અવયવ રૂપે સ્વીકારતા નથી, પરંતુ कित् આદિ સ્થળે આવતી આપત્તિને ટાળવા તેને ઉપચારથી અવયવ રૂપે સ્વીકારે છે. આના માટે વિશેષ જાણવા 'अनेकान्ता अनुबन्धा इति (परि. शे. ४)' ન્યાયની ટીકાઓ દ્રષ્ટવ્ય છે.

11) ***अनुबन्धैकान्तपक्ष*** – અનુબંધના એકાન્તપક્ષવાળા કહે છે કે અનુબંધ જેની સાથે જોડાયો હોય તેનો તે વાસ્તવિક અવયવ બને છે. કેમકે અનુબંધ હંમેશા ઉપલબ્ધ થાય તો પોતાના અવયવી સાથે જ ઉપલબ્ધ થાય છે, અન્યત્ર ક્યાંય ઉપલબ્ધ થતો નથી. જે જેની સાથે ઉપલબ્ધ થાય તે તેનો અવયવ કહેવાય. ગુમડું શરીર સાથે જ ઉપલબ્ધ થાય, તો તે શરીરનું અવયવ કહેવાય જ. કાગડો ક્યારેક ગૃહ સાથે સંબદ્ધ હોય છે, તો ક્યારેક વૃક્ષની શાખા સાથે સંબદ્ધ હોય છે, તેથી કાગડો જેમ ગૃહાદિનો અવયવ ગણાતો નથી, તેવું અનુબંધની બાબતમાં નથી. ટૂંકમાં કહેવું હોય તો 'એક જાતીય સંબંધથી જે એકત્ર જ ઉપલબ્ધ થતો હોય તેને અવયવ કહેવાય.' જેમકે અનુબંધ, અને 'એક જાતીય સંબંધથી જે અનેકસ્થળે ઉપલબ્ધ થતો હોય તેને અવયવ ન કહેવાય' જેમકે કાગડો. આમ એકાન્તપક્ષે અનુબંધ પોતાના અવયવી પ્રત્યયાદિનો અવયવ બનતો હોવાથી આ પક્ષે त (क्त) પ્રત્યયને कित् કહેવડાવવા તેના क् અનુબંધને ઉપચારથી અવયવ રૂપે સ્વીકારવો પડતો નથી.

12) ***अनेकान्तपक्ष*** – અનવયવપક્ષ.

13) ***अन्त*** – આગમ.

14) ***अन्तर्गण*** – મોટા ગણની અંદર વર્તતા પેટા ગણને અંતર્ગણ કહેવાય છે. જેમકે ૧.૪.૭ સૂત્રની બૃ.વૃત્તિમાં દર્શાવેલ સર્વાદિ ગણ એક મોટો ગણ છે અને તેની અંદર દર્શાવેલ અન્ય, અન્યતર, ઇતર, ડતર અને ડતમ આ પાંચનો એક અંતર્ગણ છે કે જેનો ઉપયોગ 'પञ्चतोऽन्यादे० ૧.૪.૫૮' સૂત્રમાં થાય છે.

15) ***अन्वय*** – અન્વય એટલે 'तत्सत्त्वे तत्सत्त्वम्' અર્થાત્ વિવક્ષિત એક વસ્તુ હોય તો જ બીજી વસ્તુનું હોવું.

16) ***अन्वर्थसंज्ञा*** – જેમાં વ્યુત્પત્ત્યર્થ ઘટતો હોય તેવા પ્રકારની સંજ્ઞાને અન્વર્થસંજ્ઞા કહેવાય. જેમકે એ-ઐ-ઓ-ઔ સ્વરોને લાગુ પડતી 'સન્ધ્યક્ષર' સંજ્ઞા અન્વર્થ છે. કેમકે એ વિગેરે સ્વરો અ + ઇ = એ આ પ્રમાણે બે સ્વરોની સંધિ થવાના કારણે બનેલા હોવાથી ત્યાં 'સન્ધ્યક્ષર' શબ્દનો 'सन्धौ सति अक्षरम्' આ વ્યુત્પત્ત્યર્થ ઘટે છે.

17) ***अन्वाख्यान*** – પાછળથી પુનઃ કથન.

18) ***अन्वाचय*** – જ્યાં મુખ્ય કાર્યની સાથે ગૌણ કાર્યને જોડવામાં આવે ત્યાં અન્વાચય કર્યો કહેવાય. દા.ત. भिक्षाम् अट गां च आनय સ્થળે ભિક્ષા લાવવાની ક્રિયા સાથે ગાય લાવવાની ક્રિયાને च અવ્યયની સહાય લઈ ગૌણપણે જોડવામાં આવી છે. તેથી અહીં ગાય લાવવાની ક્રિયાનો અન્વાચય કર્યો કહેવાય. ***અર્થ***- ભિક્ષા માટે ફર અને ભેગી ગાય મળતી હોય તો તે પણ લેતો આવ. આ અન્વાચય એ च અવ્યયના સમુચ્ચય, અન્વાચય, ઇતરેતરયોગ અને સમાહાર આ ચાર અર્થો પૈકીનો એક અર્થ છે.

19) ***अन्वादेश*** – કાંઈક વિધાન કરવા માટે કહેવાયેલી અમુક વસ્તુનું ફરી બીજું કાંઈક વિધાન કરવા પુનઃ કથન કરવું તેને અન્વાદેશ કહેવાય. બીજા શબ્દોમાં કહીએ તો 'અમુક વાતના સંદર્ભમાં પૂર્વે કહેવાઈ ગયેલી વસ્તુનું ફરી અન્ય વાતના સંદર્ભમાં જોડાણ કરવું તેને અન્વાદેશ કર્યો કહેવાય.' અન્વાદેશમાં સર્વાદિ अस्मद्, युष्मद् અને एतद् નામોના ક્રમશઃ मे-नौ-नस्-मा, ते-वाम्-वस्-त्वा અને एनद् આદેશ થતા હોય છે. જેમકે यूयं विनीतास्तद्वो गुरवो मानयन्ति સ્થળે પૂર્વે વિનીતતાનું વિધાન કરવા युष्मद् શબ્દ વપરાયો છે અને પાછળથી ગુરૂ દ્વારા માન આપવાની બાબતમાં ફરી युष्मद् શબ્દનું જોડાણ કર્યું હોવાથી અહીં અન્વાદેશ છે, માટે વાક્યના પાછળના અંશમાં युष्मद् નો वस् આદેશ થયો છે.

20) ***अन्विताभिधानवाद***– અન્વિતાભિધાનવાદને મીમાંસક ***પ્રભાકર*** તેમજ ***'પ્રાભાકર'*** નામે ઓળખાતા તેમના અનુયાયીઓ સ્વીકારે છે. તેમનું એવું માનવું છે કે 'કોઈપણ શબ્દ યોગ્ય (= પોતાની સાથે અન્વય પામવાને લાયક એવા) ઇતરપદાર્થોની સાથે અન્વિત (= અન્વય પામેલા) પદાર્થનો જ વાચક બને છે.' જેમકે चैत्रः पचति

સ્થળે ચૈત્ર શબ્દ પાક ક્રિયાની સાથે અન્વય પામેલા ચૈત્ર પદાર્થનો વાચક બને છે. અર્થાત્ 'ચૈત્ર પકાવે છે' આ સંપૂર્ણ અર્થ ચૈત્ર શબ્દથી જ વાચ્ય બની જાય છે. હવે અહીં પ્રશ્ન થશે કે ''એકલો ચૈત્ર શબ્દ જ જો પાક ક્રિયા અને ચૈત્ર પદાર્થ બન્નેનો વાચક બની જતો હોય તો નકામા પચતિ શબ્દનો પ્રયોગ કરવાની જરૂર જ શું છે ?'' આનું સમાધાન એ છે કે કેવળ ચૈત્ર શબ્દનો પ્રયોગ કરીએ તો તેનાથી આખો 'ચૈત્ર પકાવે છે' આ અર્થ વાચ્ય બનવા છતાં વક્તાને અહીં 'ચૈત્ર પકાવે છે' આ અર્થ જણાવવો ઈષ્ટ છે ? કે પછી 'ચૈત્ર ચાલે છે, ખાય છે' વિગેરે અર્થ જણાવવો ઈષ્ટ છે ? તેનો શ્રોતાને સમ્યગ્ નિર્ણય ન થઈ શકે. કેમકે ચૈત્ર પદાર્થમાં તો પાક ક્રિયાની જેમ બીજી અનેક ક્રિયાઓ સાથે અન્વય પામવાની યોગ્યતા છે. માટે પચતિ વિગેરે શબ્દોના પ્રયોગ તો શ્રોતાને વક્તાનું તાત્પર્ય કયા અર્થમાં છે ? તેની બરાબર ખબર પડે તે માટે તાત્પર્યઉપપત્તિક રૂપે કરવામાં આવે છે. અન્વિતાભિધાનવાદ શબ્દની વ્યુત્પત્તિ આ પ્રમાણે છે ***'यस्मिन् वादे योग्येतरपदार्थैः सह अन्वितानामेव पदार्थानां शब्दैः अभिधानं स्वीक्रियते तादृशो वादः अन्विताभिधानवादः'*** અહીં વ્યુત્પત્તિમાં યોગ્ય શબ્દ ઇતરપદાર્થ શબ્દના વિશેષણ રૂપે એટલા માટે લખ્યો છે કે કોઈ વક્તા વહ્નિના સિઞ્ચતિ પ્રયોગ કરે તો ત્યાં સિંચવાની ક્રિયા વહ્નિની સાથે અન્વય પામવા માટે અયોગ્ય છે. કેમકે સિંચવાની ક્રિયા પાણીથી શક્ય છે, વહ્નિથી નહીં. તો અન્વિતાભિધાનવાદમાં ઉપરોક્ત વાક્યગત વહ્નિ શબ્દથી અયોગ્ય ઇતરપદાર્થ રૂપ સિંચવાની ક્રિયા સાથે અન્વિત વહ્નિ પદાર્થનું અભિધાન ન થઈ જાય તે માટે વ્યુત્પત્તિમાં યોગ્ય શબ્દ મૂકવામાં આવ્યો છે. વક્તાના વહ્નિના સિઞ્ચતિ વાક્યથી શ્રોતાને યથાર્થ બોધ થઈ શકે નહીં.

21) ***अपवाद*** – ઉત્સર્ગ એટલે કે સામાન્ય નિયમ અને અપવાદ એટલે વિશેષ નિયમ. સામાન્ય નિયમને બાધિત કરનાર વિશેષ નિયમને અપવાદ કહેવાય.

22) ***अपादान*** – વિવક્ષિત વસ્તુનું છૂટું પડવું તે અપાય કહેવાય, અને આ અપાય જે સ્થળ કે જે વસ્તુથી થાય તેને અપાયનો અવધિ કહેવાય. આવા અપાયના અવધિને અપાદાન કહેવાય. અર્થાત્ વિવક્ષિત વસ્તુ જે સ્થળ કે જે વસ્તુથી છૂટી પડે તે સ્થળ કે તે વસ્તુને અપાદાન સંજ્ઞા પ્રાપ્ત થાય છે. આ અપાદાન ત્રણ પ્રકારે છે : **(a)** ***निर्दिष्टविषय*** - જ્યાં ધાતુ દ્વારા જ વિભાજનક્રિયા (= અપાય) જણાઈ આવતી હોય ત્યાં નિર્દિષ્ટવિષયવાળું અપાદાન હોય છે. દા.ત. ગ્રામાદ્ આગચ્છતિ અહીં આગમન ક્રિયા દ્વારા વ્યક્તિનું ગામથી વિભાજન સહજ જણાઈ આવે છે, તેથી અહીં ગામ નિર્દિષ્ટવિષયવાળું અપાદાન કહેવાય. **(b)** ***उपात्तविषय*** - જ્યાં વિભાજન ક્રિયા જણાવવા ધાતુએ અન્ય ધાતુના અર્થને પોતામાં સમાવવો પડે તેવા સ્થળે ઉપાત્તવિષયવાળું અપાદાન હોય છે. દા.ત. કુશૂલાત્ (તણ્ડુલાન્) પચતિ અહીં કોઠીથી ચોખાનો અપાય જણાવવો છે તો પચ્ ધાતુએ પોતાના 'પાક' અર્થમાં આ + દા ધાતુના 'આદાન' અર્થને સમાવવો પડે છે. કેમકે આદાનક્રિયા વિના કોઠીથી ચોખા છૂટાં શી રીતે પડે ? અને જો છૂટાં ન પડે તો તેઓનો પાક શી રીતે સંભવે ? **(c)** ***अपेक्षितक्रिय*** - જ્યાં ક્રિયાપદ બોલાયું કે લખાયું ન હોય, પરંતુ અપાયાર્થે તેનો અર્થ અપેક્ષિત હોય તેવા સ્થળે અપેક્ષિત ક્રિય અપાદાન

હોય છે. જેમકે કોઈ પૂછે कुतो भवान्? (આપ ક્યાંથી આવ્યા ?) તે વખતે જવાબ આપવામાં આવે પાટલિપુત્રાદ્, તો અહીં પાટલીપુત્રથી વ્યક્તિનો અપાય = વિભાજન જણાવવા ન ઉલ્લેખાયેલી એવી આગમન ક્રિયાની અપેક્ષા રહે છે. માટે અહીં પાટલીપુત્ર એ અપેક્ષિતક્રિય અપાદાન કહેવાય.

વળી અહીં અપાયની જે વાત કરી તે પણ બે પ્રકારનો હોય છે. **(a)** કાયસંસર્ગપૂર્વકનો અને **(b)** બુદ્ધિસંસર્ગપૂર્વકનો. वृक्षात् पर्णं पतति અહીં કાયસંસર્ગપૂર્વકનો અપાય જાણાય છે. કેમકે પૂર્વે વૃક્ષાત્મક કાયાની સાથે પર્ણનો વાસ્તવિકતાએ સંસર્ગ હતો અને પાછળથી પાંદડું છૂટું પડે છે ત્યારે આ વાસ્તવિક સંસર્ગ તૂટે છે. અર્થાત્ અપાય થાય છે. જ્યારે व्याघ्राद् बिभेति અહીં બુદ્ધિસંસર્ગપૂર્વકનો અપાય જાણાય છે. કેમકે અહીં વ્યક્તિનો પૂર્વે વાઘની કાયા સાથે વાસ્તવિક સંસર્ગ હતો અને તે પાછળથી તૂટે છે તેવું નથી. પરંતુ "વાઘ આવ્યો" તેવું સાંભળતા જ ભયને લઈને વ્યક્તિની બુદ્ધિમાં પૂર્વે વાઘ સાથે માનસિક સંયોગ ઊભો થાય છે અને પછી તે માનસિક રીતે જ વાઘથી પાછો નિવર્તતા આ કાલ્પનિક સંસર્ગ તૂટે છે. અર્થાત્ તેનો અપાય થાય છે. અહીં बिभेति ક્રિયાપદમાં રહેલ भि ધાતુએ પોતાના 'ભય' અર્થમાં ધાતુના 'નિવર્તન = પાછા ફરવા' રૂપ અર્થને સમાવવાનો રહે છે, માટે व्याघ्राद् बिभेति સ્થળે व्याघ्राद् એ ઉપાત્તવિષયવાળું અપાદાન છે.

23) ***अभिविधि*** – અભિવિધિ એ અવધિનો એક પ્રકાર છે. જ્યાં અમુક પ્રવૃત્તિની મર્યાદા રૂપે બતાવાતું સ્થળ પણ તે પ્રવૃત્તિમાં આવરી લેવાતું હોય ત્યાં અભિવિધિ રૂપ અવધિ ગણવામાં આવે છે. જેમકે आपाटलिपुत्राद् वृष्टो मेघः, અહીં જો આ (आङ्) દ્વારા અભિવિધિ રૂપ અર્થ વિવક્ષિત હોય તો મેઘની વરસવાની પ્રવૃત્તિમાં મર્યાદા રૂપ પાટલીપુત્ર નગર પણ તે પ્રવૃત્તિમાં આવરી લેવામાં આવે છે. અર્થાત્ મેઘ પાટલીપુત્રના છેડા સુધી વરસ્યો છે એમ સમજવું.

24) ***अभिहितान्वयवाद*** – અભિહિતાન્વયવાદને મીમાંસક ***કુમારિલ્લ ભટ્ટ*** તેમજ ***'ભાટ્ટ'*** નામે ઓળખાતા તેમના અનુયાયીઓ અનુસરે છે. તેમનું એવું માનવું છે કે 'કોઈપણ શબ્દ પૂર્વે સ્વવાચ્ય પદાર્થનું પ્રતિપાદન કરે છે અને ત્યારબાદ તે અર્થ અન્ય શબ્દના અર્થ સાથે અન્વય પામે છે અને વાક્યાર્થ રૂપે પર્યવસાન પામે છે.' અર્થાત્ આમના મતે શબ્દો પોતાના અર્થનું પ્રતિપાદન કરીને છુટા થઈ જાય છે અને ત્યારબાદ તે અર્થો પરસ્પર એકબીજા સાથે અન્વય પામી વાક્યાર્થ રૂપે બને છે. જેમકે चैत्रः पचति સ્થળે चैत्र શબ્દ અને पचति ક્રિયાપદગત पच् ધાત્વાત્મક શબ્દ ક્રમશઃ પોતાના 'ચૈત્ર' પદાર્થ અને 'પાક ક્રિયા' રૂપ પદાર્થનું પ્રતિપાદન કરીને છુટા થઈ જાય છે અને ત્યારબાદ તે બન્ને પદાર્થો પરસ્પર અન્વય સાધીને 'ચૈત્ર પકાવે છે' આમ વાક્યાર્થ રૂપે બને છે. અહીં આ વાત ધ્યાનમાં રાખવી કે કોઈપણ શબ્દ કેવળ કોરા પદાર્થનું પ્રતિપાદન નથી કરતો પણ તે અમુક ધર્મનું અને તે ધર્મવાળા પદાર્થનું પ્રતિપાદન કરે છે. દા.ત. ओदन શબ્દ ઓદનત્વ ધર્મનું અને તે ધર્મવાળા ઓદન (ભાત) પદાર્થનું પ્રતિપાદન કરે છે. હવે ओदन શબ્દથી પ્રતિપાદિત આ બન્ને પણ ઉપર બતાવ્યું તે

પ્રમાણે આપમેળે પરસ્પર અન્વય સાધી લે છે. આને કહેવાય અભિહિતાન્વયવાદ. અભિહિતાન્વયવાદ શબ્દની વ્યુત્પત્તિ આ પ્રમાણે છે ***'यस्मिन् वादे शब्दैः अभिहितानामर्थानाम् (स्वयमेव) अन्वयो भवति तादृशो वादः अभिहितान्वयवादः'***

25) ***अभेदनिर्देश*** – સરખી વિભક્તિપૂર્વકનો નિર્દેશ.

26) ***अयोगवाह*** – જે વર્ણોનો સ્વરોને દર્શાવતા 'औदन्ताः स्वराः १.१.४' સૂત્રમાં યોગ (= ઉપાદાન) ન કર્યો હોય અને વ્યંજનોને દર્શાવતા 'कादिर्व्यञ्जनम् १.१.१०' સૂત્રમાં પણ યોગ ન કર્યો હોય છતાં તે તે પ્રયોગ સ્થળે તેમની વિદ્યમાનતા જોવા મળતી હોય તેવા વર્ણોને અયોગવાહ વર્ણો કહેવાય છે. દા.ત. અનુસ્વાર, વિસર્ગ, જિહ્વામૂલીય અને ઉપધ્માનીય વર્ણો. આ વર્ણોને આવશ્યકતાનુસાર ક્યારેક 'कादिर्व्यञ्जनम् १.१.१०' સૂત્રસ્થ कादिः પદની कस्य आदिः આમ વ્યુત્પત્તિ કરી વ્યંજન સમુદાયમાં સમાવવામાં આવે છે અને ક્યારેક 'औदन्ताः स्वराः १.१.४' સૂત્રસ્થ औदन्ताः પદની औकारस्य अन्ताः આમ વ્યુત્પત્તિ કરી સ્વરસમુદાયમાં સમાવી લેવામાં આવે છે.

ઉપ્પટ અયોગવાહ શબ્દની अकारादिना वर्णसमाम्नायेन संहिताः सन्तः ये वहन्ति आत्मलाभं ते अयोगवाहाः આવી વ્યુત્પત્તિ બતાવી જુદો અર્થ કરે છે. તે કહે છે 'અનુસ્વારાદિ વર્ણો ક્યારે પણ સ્વતંત્ર ઉચ્ચારાતા નથી. પરંતુ અ વિગેરે વર્ણોની સાથે જોડાયેલા જ ઉચ્ચારાય છે. જેમકે અનુસ્વાર અને વિસર્ગ તેમની પૂર્વમાં અ વિગેરે સ્વરોનો યોગ હોય તો જ ઉચ્ચારાય છે અને જિહ્વામૂલીય, ઉપધ્માનીય તેમની પરમાં ક્રમશઃ ક્-ખ્ અને પ્-ફ્ નો યોગ હોય તો જ ઉચ્ચારવામાં આવે છે, માટે અયોગવાહ કહેવાય છે.'

27) ***अर्थापत्ति*** – અપ્રત્યક્ષ પદાર્થની સિદ્ધિ જેના થકી થાય તેને અર્થાપત્તિ પ્રમાણ કહેવાય. દા.ત. 'पीनो देवदत्तो दिवा न भुङ्क्ते' અહીં 'દેવદત્ત દિવસે ખાતો નથી અને છતાંય પીન છે ? ચોક્કસ તે રાત્રે ખાતો હશે.' આમ વાક્યમાં ક્યાંય પણ રાત્રિભોજનનો ઉલ્લેખ કર્યો ન હોવા છતાં દિવાભોજનના ત્યાગપૂર્વકના પીનત્વ દ્વારા અપ્રત્યક્ષ એટલે વાક્યમાં અનુલ્લિખિત રાત્રિભોજન પદાર્થની સિદ્ધિ થાય છે. તો દિવાભોજનના ત્યાગપૂર્વકનું પીનત્વ અર્થાપત્તિ પ્રમાણ કહેવાય. આ અર્થાપત્તિને વેદાંતીઓ સ્વતંત્ર પ્રમાણરૂપે સ્વીકારે છે. જ્યારે નૈયાયિકાદિ તેને અનુમાન પ્રમાણમાં સમાવી લે છે. અર્થાપત્તિના દૃષ્ટાર્થાપત્તિ અને શ્રુતાર્થાપત્તિ આમ બે ભેદ વિગેરે વિશેષ વેદાંતપરિભાષા વિગેરે આકર ગ્રંથો થકી જાણી લેવું જોઈએ.

28) ***अलौकिकविग्रह*** – શાસ્ત્રીય પ્રક્રિયાઓ કરવા માટે જે વિગ્રહ કરાય તે અલૌકિક વિગ્રહ કહેવાય. દા.ત. राजपुरुषः સમાસનો राजन् अस् पुरुष स् આ અલૌકિક વિગ્રહ કહેવાય. અલૌકિક વિગ્રહ પહેલા થાય અને તેને આધારે જે પદો નિષ્પન્ન થાય તે લોકસમક્ષ લૌકિક વિગ્રહ તરીકે મૂકાય.

29) ***अवधि*** – અવધિ એટલે સીમા. તે મર્યાદા અને અભિવિધિ એમ બે પ્રકારની છે અને આ બન્ને અર્થો આઙ્ અવ્યયથી દ્યોતિત થાય છે. અભિવિધિ અને મર્યાદા પૈકીનો કયો અર્થ ક્યારે લેવો તે તો પ્રકરણાદિ વશ સમજવાનો રહે છે.

30) ***अव्यवहित*** – વ્યવધાન વિનાનું = આંતરા વિનાનું.

31) ***अव्युत्पत्तिपक्ष*** – ઉણાદિ નામોમાં પ્રકૃતિ અને પ્રત્યયના ભેદને ન સ્વીકારનારો પક્ષ અવ્યુત્પત્તિપક્ષ કહેવાય છે. આ પક્ષ આચાર્ય પાણિનિનો છે. તેઓશ્રી ઉણાદિ નામોને કોક ધાત્વાત્મક પ્રકૃતિ અને કૃત્ પ્રત્યયોને લઈને નિષ્પન્ન થયેલા નથી માનતા પણ અખંડ શબ્દરૂપે સ્વીકારે છે.

32) ***आकृति*** – જાતિ.

33) ***आकृतिगण*** – આકૃતિગણ એટલે એવા પ્રકારનો શબ્દસમૂહ કે જેમાં શબ્દોની સંખ્યા નિશ્ચિત નથી હોતી. તે ગણમાં ઉદાહરણ તરીકે દર્શાવેલા શબ્દો જેવા આકારવાળા બીજા જે કોઈ શબ્દો અન્યત્ર જોવા મળે તે બધાનો પણ આ ગણમાં સમાવેશ કરવાનો હોય છે. વ્યાકરણમાં 'गौरादिभ्यो० २.४.१९' અને 'श्रेण्यादिकृताद्यै० ३.१.१०४' વિગેરે સૂત્રમાં બતાવેલા ગૌરાદિ, કૃતાદિ વિગેરે આકૃતિગણો છે.

34) ***आख्यात*** – આખ્યાત એટલે ધાતુને લાગતા તિવ્-તસ્ આદિ પ્રત્યયો. અથવા ક્રિયાપદને પણ આખ્યાત રૂપે ગણવામાં આવે છે.

35) ***आन्तर्य*** – આસન્ન.

36) ***आर्षप्रयोग*** – ઋષિમુનિઓનો જે પ્રયોગ વ્યાકરણની દૃષ્ટિએ બંધબેસતો ન હોય છતાં વ્યાજબી મનાતો હોય તેને આર્ષપ્રયોગ કહેવાય.

37) ***आसन्न*** – આસન્ન એટલે અત્યંત સદશ. જ્યારે આસન્ન અને અનાસન્ન કાર્યનો એકસાથે પ્રસંગ હોય ત્યારે સ્થાન (= કંઠ વિગેરે આઠ), અર્થ અને પ્રમાણ (= માત્રા) આદિ કૃત આસન્ન જ કાર્ય થાય છે. ક્રમશઃ તેના દૃષ્ટાંતો આ પ્રમાણે છે –

(a) ***स्थान*** – दण्ड + अग्रम् અવસ્થામાં દણ્ડ ગત સમાનસ્વર અ ને અગ્રમ્ ના સમાનસ્વર અ ની સાથે 'समानानां० १.२.१' સૂત્રથી દીર્ઘ આદેશની પ્રાપ્તિ છે. પરંતુ દીર્ઘ તો આ, ઈ, ઊ, ૠ વિગેરે અનેક છે. તો અહીં કયો દીર્ઘ આદેશ કરવો એ પ્રશ્ન ઉદ્ભવતા આદેશી અ કંઠ્ય હોવાથી તેને કંઠ સ્થાનને લઈને કંઠ્ય આ આદેશ આસન્ન હોવાથી આ આદેશ જ કરવામાં આવે છે. પ્રયોગ दण्डाग्रम् થશે.

(b) ***अर्थ*** - वतण्डी चासौ युवतिः च આ કર્મધારયસમાસ માટેના વિગ્રહમાં વતણ્ડી નામને 'पुंवत् कर्मधारये ३.२.५७' સૂત્રથી પુંવદ્ભાવની પ્રાપ્તિ છે. તો અહીં वातण्ड्य અને વતણ્ડ આમ બે રીતે પુંવદ્ભાવની પ્રાપ્તિ વર્તતા કયો પુંવદ્ભાવ કરવો એ પ્રશ્ન ઉદ્ભવતા વતણ્ડી ને અર્થને આશ્રયીને આસન્નતા वातण्ड्य માં જ સંભવે છે. તેથી वातण्ड्य રૂપે પુંવદ્ભાવ કરવામાં આવે છે. સામાસિક પ્રયોગ वातण्ड्ययुवतिः આમ થાય છે. અહીં અર્થની આસન્નતા એટલા માટે છે કે વતણ્ડી શબ્દ 'વતણ્ડની અપત્ય એવી સ્ત્રી' આ અર્થમાં વર્તે છે. અને वातण्ड्य શબ્દ 'વતણ્ડનો અપત્ય' આ અર્થમાં વર્તે છે. આમ 'અપત્ય' અર્થને લઈને અર્થની આસન્નતા છે. જ્યારે વતણ્ડ શબ્દ 'વતણ્ડીના પિતા' અર્થવાળો હોવાથી તેમાં અર્થને લઈને આસન્નભાવ પ્રાપ્ત થતો નથી.

(c) ***प्रमाण*** - अमुष्मै પ્રયોગસ્થળે સાધનિકાની ક્રમશઃ अदस् + ङे → अद + ङे → अद + स्मै અવસ્થાઓમાંથી પસાર થઈ જ્યારે अम + स्मै અવસ્થા પ્રાપ્ત થાય ત્યારે अम ના म् થી પરમાં રહેલા अ ને 'मादुवर्णो० २.१.४७' સૂત્રથી उ વર્ણ આદેશ કરવાના પ્રસંગે પ્રશ્ન થાય કે આદેશ હ્રસ્વ उ રૂપે કરવો ? કે દીર્ઘ ऊ રૂપે કરવો ? તો એક માત્રિક अ ને પ્રમાણ (= માત્રા)ને લઈને આસન્ન એકમાત્રિક હ્રસ્વ उ હોવાથી તે રૂપે જ આદેશ કરવામાં આવે છે. પ્રયોગ अमुष्मै આ પ્રમાણે થાય છે.

ઉપર સ્થાન, અર્થ અને પ્રમાણ આમ ત્રણ પ્રકારના આસન્ન બતાવ્યા પછી आदि પદ મૂક્યું છે, તે आदि પદથી ગુણ રૂપ આસન્નનું ગ્રહણ કરવાનું છે. ગુણ પદથી સ્થાનાદિ ત્રણે પ્રકારના આસન્નથી ભિન્ન સર્વ પ્રકારના આસન્નોને લઈ લેવાના છે. તેનું દૃષ્ટાંત 'परिभाषेन्दुशेखर-१७' માં वाग्घरि આ પ્રમાણે દર્શાવ્યું છે. તેની પ્રક્રિયા ત્યાંથી જાણી લેવી.

બીજી એક વાત પણ ધ્યાનમાં લેવી કે જે સ્થળે એકસાથે અનેક પ્રકારના આસન્નભાવ પ્રાપ્ત હોય ત્યાં સ્થાનાશ્રિત આસન્નભાવ સૌથી બળવાન બને છે. કેમકે ન્યાય છે કે ***'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः'***; आन्तर्य = આસન્નભાવ.

38) इत् – 'ईत्' આ એક સંજ્ઞા છે અને તે सान्वर्थ છે. ***'एति इति इत्'*** આ પ્રમાણે તેની વ્યુત્પત્તિ થાય છે. અર્થાત્ વ્યાકરણશાસ્ત્રીય પ્રક્રિયાકાળે જે વર્ણો ધાતુ-નામ-પ્રત્યય-આગમ-આદેશ-ઉપદેશ સાથે જોડાયેલા હોય છે પરંતુ લૌકિક પ્રયોગકાળે (= ભાષાકીય પ્રયોગમાં) તેઓ ચાલ્યા જાય છે એટલે કે તેમનો પ્રયોગ થતો નથી. આથી તે વર્ણોને 'ईत्' સંજ્ઞક ગણવામાં આવે છે. આ વર્ણો ईत् અર્થાત્ લૌકિક પ્રયોગકાળે અપ્રયોગી હોય છે. તો તેમનું ફળ શું ? તે અનુબંધફળને દર્શાવતી કારિકાદિથી જાણી લેવું.

39) इत् – વ્યાકરણશાસ્ત્રમાં ધાતુ, પ્રત્યયાદિ સાથે બતાવાતો વર્ણ કે વર્ણ સમુદાય જે લૌકિક શબ્દપ્રયોગમાં ટકતો નથી છતાં પોતાની કાંઈક અસર છોડતો જાય છે તેને 'ईत्' કહેવાય છે. ईत् શબ્દ सान्वर्थ છે. તેની વ્યુત્પત્તિ ***'एति = अपगच्छति इति इत्'*** આમ થાય છે. જેમકે एध् (एधि) અને शी (शीङ्) ધાતુસ્થળે इ અને ङ

ઈત્ છે, તો તેઓ આ બન્ને ધાતુઓને લઈને થતા એધતે અને શેતે વિગેરે લૌકિક પ્રયોગમાં ટકતા નથી. પરંતુ કર્તરી પ્રયોગમાં આ ધાતુઓને આત્મનેપદ પ્રત્યયો જ લાગશે, આવી પોતાની અસર છોડતા જાય છે. એ જ રીતે ત (क्त), त्वा (क्त्वा) વિગેરે પ્રત્યયસ્થળે क् ઈત્ છે, તે जितः વિગેરે લૌકિક પ્રયોગસ્થળે જિ ધાતુના इ નો ગુણ થવા દેતો નથી.

40) उपचार– જે શબ્દ જેનો (જે પદાર્થનો) વાચક નથી, તે શબ્દ દ્વારા તે પદાર્થનું અભિધાન કરવું તેને ઉપચાર કહેવાય. *'अतच्छब्दस्य तेन शब्देनाऽभिधानम् उपचारः'* શાસ્ત્રમાં અનેક પ્રકારના ઉપચારો બતાવવામાં આવ્યા છે. તે આ પ્રમાણે છે –

'[a]सहचरण - [b]स्थान - [c]तादर्थ्य - [d]वृत्त - [e]मान - [f]धारण - [g]सामीप्य - [h]योग - [i]साधनाऽधिपत्येभ्यो। [a]ब्राह्मण - [b]मञ्च - [c]कट - [d]राज - [e]सक्तु - [f]चन्दन - [g]गङ्गा - [h]शाकटाऽत्र - [i]पुरुषेष्वतद्भावेऽपि [j]तदुपचारः।। (न्यायसूत्र २/२/६१)

(a) *सहचरण* – સાહચર્ય સંબંધને લઈને થતા ઉપચારને સહચરણ ઉપચાર કહેવાય છે. દા.ત. 'यष्टिकां भोजय' તું બ્રાહ્મણને જમાડ. યષ્ટિકા શબ્દનો મુખ્યાર્થ 'દંડ' છે. પરંતુ દંડમાં ભોજનક્રિયા બાધિત હોવાથી યષ્ટિકા શબ્દ સાહચર્ય સંબંધથી દંડના સહચારી એવા બ્રાહ્મણનો વાચક બન્યો છે. આમ સાહચર્ય સંબંધને લઈને યષ્ટિકા શબ્દનો બ્રાહ્મણમાં ઉપચાર થયો હોવાથી આ સહચરણોપચાર છે. જેમ – કોઈ દાઢીવાળા વ્યક્તિને દેખીને કહેવામાં આવે કે "એ દાઢી ! અહીં આવ" તો ત્યાં પણ સહચરણ ઉપચાર સમજવો.

(b) *स्थान* – સ્થાનવાચક શબ્દનો સ્થાનગત વસ્તુમાં કરાતો ઉપચાર તે સ્થાનોપચાર.

દા.ત. मञ्चाः क्रोशन्ति। મંચસ્થ પુરૂષો અવાજ કરે છે.

અહીં 'મંચ' માં અવાજ કરવા રૂપ ક્રિયા અનુપપન્ન હોવાથી मञ्च શબ્દ મંચસ્થ પુરૂષોમાં ઉપચરિત છે. 'तास्थ्यात् तद्व्यपदेशः' ન્યાય પણ સ્થાન ઉપચારને જ સૂચવે છે.

(c) *तादर्थ्य* – કાર્યના ઉપાદાન કારણને 'તદર્થ' કહેવાય. કાર્યવાચક શબ્દનો તદર્થમાં કરાતો ઉપચાર 'તાદર્થ્ય ઉપચાર' કહેવાય છે.

દા.ત. कटं करोति। ચટાઈ બનાવે છે. (અર્થાત્ ચટાઈ માટે તૃણાદિ વણે છે.)

તૃણાદિને વણીને નિષ્પન્ન થયેલ વસ્તુને કટ કહેવાય છે. નિષ્પન્ન થયેલા કટને પુનઃ નિષ્પન્ન કરવાનો ન હોય. તેથી 'कटं करोति' શબ્દપ્રયોગની અસંગતતા ટાળવા કટશબ્દનો ઉપચાર કટ માટે વણાતા તેના ઉપાદાન કારણ એવા તૃણાદિમાં કરાય છે જે તાદર્થ્ય ઉપચાર છે.

(d) *वृत्त* - વૃત્ત એટલે આચરણ કે સ્વભાવ. તેના સામ્યને લઈને થતા ઉપચારને વૃત્ત ઉપચાર કહેવાય.

દા.ત. યમો રાજા, કુબેરો રાજા। રાજા યમ છે, રાજા કુબેર છે.

(e) *मान* - માન (માપ) વાચી નામોનો મેય (માપવા યોગ્ય) પદાર્થમાં થતો જે ઉપચાર તેને માન ઉપચાર કહેવાય.

દા.ત. आढकसक्तवः। આઢકથી મપાયેલ સક્તુ. આઢક = માપ વિશેષ અને સક્તુ = સાથવો.

અહીં આઢકથી મપાયેલ સક્તુને આઢક સક્તુ કહેવાય છે. આમ આઢકાત્મક માપ વિશેષનો સાથવામાં ઉપચાર કરવાથી સાથવો આઢક વ્યપદેશને પામે છે.

જેમ વ્યવહારમાં પણ શેર વજનથી મપાયેલા ચોખા શેર ચોખા કહેવાય છે. ત્યાં માનવાચી શેર શબ્દનો મેય એવા ચોખામાં ઉપચાર છે.

(f) *धारण* - ધારકવસ્તુવાચી નામનો ધૃતવસ્તુરૂપે ઉપચાર તે ધારણ ઉપચાર કહેવાય.

દા.ત. तुलाचन्दनं। તુલામાં ધરાયેલું ચંદન.

અહીં ધૃત એવા ચંદનમાં તેના ધારક તુલા શબ્દનો ઉપચાર કરેલો છે.

(g) *सामीप्य* - શબ્દ જ્યારે સ્વવાચ્યાર્થની સમીપમાં રહેલ પદાર્થને જણાવે ત્યારે તેને સામીપ્ય ઉપચાર કહેવાય. અર્થાત્ સામીપ્ય સંબંધને લઈને કરાતો ઉપચાર તે સામીપ્ય ઉપચાર.

દા.ત. गङ्गायां गावश्चरन्ति। ગંગા કિનારે ગાયો ચરે છે.

અહીં ગંગા શબ્દનો સમીપવર્તી કિનારામાં ઉપચાર છે.

(h) *योग* - શબ્દ જ્યારે સ્વવાચ્ય પદાર્થથી યુક્ત એવી વસ્તુને જણાવવામાં તત્પર બને ત્યારે તેને યોગ ઉપચાર કહેવાય.

દા.ત. कृष्णेन रागेण युक्तः शाटकः, कृष्णः इत्यभिधीयते। કાળા રંગથી યુક્ત સાડી 'કાળી' કહેવાય.

કૃષ્ણ શબ્દ આમ તો કાળા વર્ણનો વાચક છે, પણ અહીં તેનાથી યુક્ત એવી સાડીમાં ઉપચરિત છે.

(i) *साधन* - સાધનભૂત વસ્તુનો સાધ્ય રૂપે વ્યપદેશ કરાય તેને સાધન ઉપચાર કહેવાય.

દા.ત. अन्नं प्राणाः। અન્ન પ્રાણ છે.

આમ તો અન્ન પોતે પ્રાણ નથી, પણ તે પ્રાણનું સાધન (= હેતુ) છે. છતાં અહીં સાધનમાં સાધ્યનો ઉપચાર કરી અન્નને પ્રાણ કીધા છે. આને કારણમાં કાર્યનો ઉપચાર પણ કહી શકાય.

(j) ***आधिपत्य*** - કુળ કે ગોત્રના અધિપતિ પુરુષનો 'कुल' કે 'गोत्र' પદથી વ્યપદેશ કરવો તે આધિપત્ય ઉપચાર કહેવાય.

દા.ત. अयं पुरुषः कुलम्, अयं पुरुषः गोत्रम्। આ પુરૂષ કુળનો અધિપતિ છે. આ પુરૂષ ગોત્રનો અધિપતિ છે.

અહીં 'कुल' અને 'गोत्र' શબ્દ કુળ કે ગોત્રના અધિપતિ એવા પુરૂષને જણાવવામાં તત્પર છે. આમ આધિપત્યસંબંધથી અહીં ઉપચાર છે.

41) ***उपदेशावस्था*** – ધાતુ વિગેરેને એકપણ પ્રત્યય ન લાગ્યો હોય તેવી મૂળ અવસ્થા.

42) ***उपधा*** – શબ્દના ઉપાન્ત્ય વર્ણને ઉપધા કહેવાય છે.

43) ***उपपदविभक्ति*** – નજીકમાં ઉચ્ચારાયેલા પદના કારણે જે વિભક્તિ પ્રાપ્ત થતી હોય તેને ઉપપદવિભક્તિ કહેવાય. જેમકે नमो देवेभ्यः, અહીં નજીકમાં રહેલા नमस् અવ્યયના કારણે देव શબ્દને 'शक्तार्थ-वषड्० २.२.६८' સૂત્રથી ચતુર્થી વિભક્તિ લાગી છે, તેથી તે ઉપપદવિભક્તિ કહેવાય.

44) ***उपलक्षण*** – જે શબ્દ પોતાના અર્થનું પ્રતિપાદન કરતો હોય અને સાથે સાથે અન્ય પદાર્થોનું પણ પ્રતિપાદન કરતો હોય તે ઉપલક્ષણ કહેવાય. દા.ત. માતા પોતાના પુત્રને કહે કે "બિલાડીથી દૂધનું રક્ષણ કરજે" તો અહીં 'બિલાડી' શબ્દ રક્ષણ કરવાની બાબતમાં માત્ર બિલાડીનું જ નહીં , દૂધના ભક્ષક કુતરા વિગેરેનું પણ પ્રતિપાદન કરે છે. તેથી તે ઉપલક્ષણ કહેવાય.

45) ***उपश्लिष्ट*** – અત્યંત (= વ્યવધાન વિના) જોડાયેલ.

